
सुवेषा भोगिनो नानाभाषावीरविशारदाः ।
स्वस्थोचितासने सुस्थास्तत्प्रशंसापरायणाः ॥

Such, as carelessly extracted in the *Artha-dyotaniká*, is Mátrigupta's idea of a theatrical auditory. Had all the conditions on which he insists been fulfilled, Hindu spectacles would have had but beggarly patronage.

* III., 2-4. Dhanika says, that the conductor makes his entrance with some such carriage as the *vaishnava-sthánaka.* To our notions, there could not have been much grace in this striding in a crouching posture, as Bharata describes it, in Náráyana Díkshita on the *Viddha-s'ála-bhanjiká :*

यत्र किञ्चिन् नतौ पादौ स्यातां मूलप्रसारितौ ।
वैष्णवं तत् तु निर्दिष्टं स्थानकं विष्णुदैवतम् ॥

Seventeen couplets of the text of the *Das'a-rúpa* I pass by. There are several things mentioned in them, about which Bharata is said to have laid down directions :

सूत्रधारेण सहिताः संलापं यत्र कुर्वते ।
नटो विदूषको वाऽपि पारिपार्श्वक एव वा ॥
आमुखं नाम तस्यैव सैव प्रस्तावना मता ।

प्रवृत्तं कालमाश्रित्य वर्णना या विधीयते ।
तदाश्रयस्य पात्रस्य प्रवेशेन प्रवर्तकम् ॥

अप्रतीतं मिश्रितं वा यत्र कार्थं प्रकाश्यते ।
तदुद्घातकमित्याहुः प्रश्नोत्तरमनोहरम् ॥

These verses are from Jagaddhara. The last stanza is in his gloss on the *Málatí-mádhava ;* the rest, in his gloss on the *Vení-sanhára.*

For *trigata,* "equivoque," see the *Nátya-s'ástra,* V., 27.

† III., 22.

into sixty-four branches. For the episodical action the articulations* should not reach to five; and there are to be none at all in the adventitious incident.†

To every great drama an episode and an adventitious incident appear to be indispensable.

A play is to open with an act, or with an explication,—here equivalent to an induction,—according to expediency. The latter is to be preferred, only when the introductory facts of the fable had better be summarized than dilated upon. Anything left over, at the end of an act, also finds its place in an explication.‡

Things forbidden to be exhibited are such as a long road,§ the taking of life, combat, the subversion of a kingdom, siege, eating, ablution, dalliance, application of unguents, dressing, and, most peremptorily, the death of the leading character.

The proceedings of a single day are to be allotted to an act; which is to maintain unity of interest. In each act the hero is to present himself, with three or four other persons; and, at the conclusion of it, they are all to leave the stage.‖

---

* In the episode they are called *anusandhi*, not *sandhi*.

† III., 23, 24.

‡ III., 25, 26.

§ For *dúrádhwánam*, the *Sáhitya-darpana*, p 127, has *dúr-áhwánam*, "a call from a distance."

‖ III., 31-33. The preparations for an exit are thus stated in a couplet of undesignated source, quoted by Jagaddhara on the *Malati-mádhava*:

बीजार्थयुक्तिमुक्तं च कृत्वा कार्यं यथाक्रमम्।
निष्क्रामं तत्र कुर्वीत सर्वेषां रङ्गवर्तिनाम्॥

No one is to appear unannounced, according to Bharata, in fragments quoted by the same annotator, in his notes on the *Veni-sanhára* and *Malati-mádhava*: नाऽसूचितस्य प्रवेशः and नाऽसूचितं विशेत् पात्रम्.

* So far as is known, Hindu dramas have always been parted into acts: but never have they had scenes. It is somewhat to be wondered

Some of the aforesaid directions concern the *náṭaka* alone; but the most of them apply alike to that and to other forms of the drama. The definitions which are given of these forms might almost be digested tabularly.* Among them we

---

at, that the Hindus, with their inordinate love for subdivision, should have left these uninvented. It is thought, by Muretus, that, among the Romans, they were projected by grammarians who wrote while Terence was still acted.

* III, 31-68. In Jagaddhara on the *Málatí-mádhava* there are quotations from Bharata about the *prakaraṇa* and the *víthiká*.

आत्मशक्त्या कविर्यत्र कथां नायकमेव च ।
औत्पत्तिकं प्रकुरुते तद्धि प्रकरणं विदुः ॥
द्विधा प्रकरणं तत्तु शुद्धं सङ्कीर्णमेव च ।
कुलस्त्रीचरितं शुद्धं सङ्कीर्णं वेश्यया कृतम् ॥

नानारससमायुक्ता सन्धिद्वयविभूषिता ।
सर्वप्रकृतिभिः पूर्णा स्यादेकाङ्का तु वीथिका ॥
त्रिभिः पात्रैः प्रयोज्येयमुत्तमाधममध्यमैः ।
कर्तव्या नायिका चात्र शृङ्गारद्वयसंयुता ॥

As cited in the *Sáhitya-darpaṇa*, p. 200, Bharata says, of the *prakaraṇa*:

वेश्याचेटनपुंसकविटधूर्ता बन्धकी च यत्र स्युः ।
अविकृतवेशपरिच्छदचेष्टितकरणं तु सङ्कीर्णम् ॥

Bharata's description of the *prakaraṇa* does not altogether harmorize with that of Dhananjaya. Yet the two writers agree, in allowing the heroine of this sort of play to be either the wife of the hero, or a woman of pleasure. Professor Wilson says she "may be a maid of family, or a courtezan." This is an error.

The same writer alleges, that the *víthí* "may be performed by one actor, though the *Das'a-rúpaka* admits of two." The *Das'a-rúpa*, following Bharata, prescribes three, absolutely.

It is asserted in the *Das'a-rúpa*, he tells us, that the story of the *náṭaka* need not necessarily be historical, but "may be also fictitious, or mixed; or partly resting on tradition, and partly the creation of the author." In the *Das'a-rúpa* there is no such assertion.

find the *náṭiká,* though no previous mention is made of it.

He confines the use of "low Prákrit, or a local dialect," in the *prahasana*, to "the inferior persons." From the *Das'a-rúpa* it is pretty clear, that all the characters here ought to speak vernacular languages. Be this as it may, he mistakes in the statement, that "The greater part of every play is in Sanskrit." Of the *Karpúra-manjarí* every word is in Prákrit; and the same peculiarity distinguishes all compositions of the class to which it belongs.

For examples of the *vyáyoga*, the *samavakára*, and the *ḍima*, he says, that the *Jamadagnya-jaya*, the *Samudra-mathana*, and the *Tri-pura-dáha* are respectively instanced; and he swells, with these words, his "List of Hindu Plays." I take it, however, that plays are not thereby meant; the intent being simply to indicate fitting subjects. The burning of Tripura is mentioned in the *Náṭya-s'ástra*, IV., 9. Compare the commentary on the *Das'a-rúpa*, p. 132.

The list just referred to could be considerably augmented by names of plays no longer met with. Even the *Avaloka* and the *Sáhitya-darpaṇa* were not made to yield up all their indications; and the *Hayagríva-vadha*, mentioned by the author of the *Kávya-prakás'a*, was left unnoticed. Elsewhere I have seen quotations from the *Amogha-rághava*, the *Karuṇá-kandala*, the *Ánanda-kos'a*, the *Víra-bhadra-vijṛimbhaṇa*, and the *Mahávíránanda* or *Víránanda*. These are not to be confounded with the *Anarghya-rághava*, the *Víra-charita*, &c. Govardhana, author of the *Sapta-s'atí*, wrote a play whose name I have forgotten.

Of the dramas, unknown by inspection to Professor Wilson, which I have seen, are Jayadeva's *Prasanna-rághava*, Rudra Tripáṭhin's *Chaṇḍí-charita*, Kás'ípati's *Mukundánanda*, Kshemes'wara's *Chaṇḍa-kaus'ika*, Bhaṭṭa Ráma's *Ujjívita-madálasa*, Madhusúdana Saraswatí's *Vishṇu-kutúhala*, Mádhava's *Subhadrá-haraṇa*, Anantadeva's *Kṛishṇa-bhakti-chandriká*, Chokkanátha's *Jánakí-pariṇaya*, Ravidása's *Mithyá-jnána-khaṇḍana*, S'ukles'wara's *Pramáṇádars'a*, Bhúdeva S'ukla's *Dharma-vijaya*, Mahes'wara's *Dhúrta-viḍambana*, Trivikrama's *Panchá-yudha-prapancha*, the *Atandra-chandraka*, the *Naishadhánanda*, the *Nágánanda*, the *Lalita-mádhava*, the *Dánakeli-kaumudí*, the *Chaṇḍí-vilása*, the *Prahláda-charita*, the *Vṛishabhánujá*, the *Madana-sanjívana*, the *Hásya-ratnákara*, the *Bálarámáyaṇa*, and the *Karpúra-manjarí*.

This and the *prakaraṇiká* were recognized as species of the genus *náṭi*, by Bharata, according to Dhanika's interpretation of a couplet adduced from him.

Specifications of intellectual and bodily affections take up the bulk of the fourth section.

Moods are of three species; corporeal, inconstant, and permanent. Of the first species there are eight sorts; paralysis, coma, horripilation, perspiring, change of colour, tremor, weeping, and faultering of the voice.* The inconstant moods are thirty-three.† Of the permanent there are eight; or erotic

---

Out of all these dramas, only the last two, both which are by Rája-s'ekhara, had, even as names, fallen under the observation of Professor Wilson. And yet I have made no special search after Sanskrit plays.

* IV., 5. And see the *Náṭya-s'ástra*, VI., 21. Ancient definitions of some of these are as follows :

हर्षभयरोगविस्मयविषादमदरोषसम्भवः स्तम्भः ।
शीतभयहर्षरोगस्पर्शज्वरसम्भवः कम्पः ।
बाष्पो नामाऽश्रुजः पूर्वमसौ सञ्जायते त्रिधा ।
त्रिधा निमित्तसम्भेदादानन्देर्ष्यार्तिसम्भवः ॥
आनन्दे विप्लुतम् भवतोर्ष्यायां स तरङ्गितायामः ।
आर्तौ स्वजनविकल्पैश्च वदनबिन्दुमन्दर्भः ॥
स्वरभेदो भयक्रोधमदहर्षादिभिर्भवेत् ।

Jagaddhara gives all these extracts; the third, in his scholia on the *Vásavadattá*, and the rest, in his notes on the *Málatí-mádhava*. The first and third he attributes to Bharata.

† IV., 7-31. Compare the *Náṭya-s'ástra*, VI., 17, etc. Standard definitions of sundry of these moods are subjoined :

ग्लानौ तनुत्ववैवर्ण्यमन्दतादिनिदर्शनम् ।
इष्टं वाऽनिष्टं वा सुखदुःखे वा न वेत्ति सम्मोहात् ।
तूष्णीकः परवशगः स भवति जडसंज्ञकः पुरुषः ॥
प्राप्ये वाऽप्यप्राप्ये ह्यर्थेऽर्थे प्रियसमागमे वाऽपि ।
हृदयमनोरथलाभे हर्षः सञ्जायते पुंसाम् ॥
क्रोधः कृतापराधेषु स्थिरोऽमर्ष इति स्थितः ।
प्रतिकूलेषु नैष्ठुर्य्य प्रबोधः क्रोध उच्यते ॥

desire, spirit, aversion, anger, laughter, astonishment, dread, and grief.* Generated therefrom are the sentiments, which are

---

गर्वो नाम कुलैश्वर्यरूपविद्यादिकर्मभिः ।
इष्टार्थविषयावाप्तेर्जायते नीचगोचरः ॥

स्वास्थ्याभ्याससमुत्था धृतिर्दर्शनसम्भवाऽनुभूतिः ।
दौर्बल्यालस्यचिन्ताद्यैर्निद्रा स्यात् कपटोऽपि च ।

सदृशैर्दृष्टिभिः चलितैरधोमुखैः चिन्तनै
चेष्टादन्यकार्याणां कथिताऽनुस्मृतिर्यथा ॥

निर्वेदश्चैव चिन्ता च दैन्यं ग्लान्यश्रमेण च ।
जडता मरणं चैव व्याधी तु करुणेऽपि च ॥

बाहू प्रसार्य गमनं सङ्कल्पाकल्पिते प्रिये ।
निद्राभिः सहसा चाऽस्मिन्नुन्मादे हि प्रयोजयेत् ॥

The fifth of these passages is from Jagaddhara on the *Vásavadattá*, and is referred to Bharata. The others are in his notes on the *Málati-mádhava*, and are anonymous.

A full account of the "inconstant moods" will be seen in Professor Wilson's *Select Specimens*, &c., Vol. I., pp. l.—lvii. I should prefer to render *trása* by "alarm;" *apasmára*, by "convulsions;" *mati*, by "right knowledge;" *unmáda*, by "delirium;" *visháda*, by "despondency;" and *autsukhya*, by "longing."

* IV., 33. Its contents are identical with the *Náṭya-s'astra*, VI., 16.

"*Rati* is desire for any object, arising from seeing or hearing it, or having it present to the recollection." So says Professor Wilson. But the truth is, that *rati* in no case means anything but venery, or more.

Laughter, as characterizing the sentiment of mirth, is the subject of IV., 70, 71. Bharata is said to speak of it thus:

ईषत्प्रफुल्लितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः ।
अदृश्यदन्तकुड्मलैरुत्तमानां स्मितं मतम् ॥

स्मितं च हसितं चैव उत्तमस्यैव जायते ।
विकासितकपोलाभ्यामुत्फुल्लायतलोचनम् ।
किञ्चिल्लक्षितदन्ताग्रं हसितं तद्विदो विदुः ॥

reckoned to be eight; the amatory, the heroic, the repulsive, the choleric, the mirthful, the amazing, the terrible, and the piteous. The first four, it is laid down, give rise, respectively, to the last four.*

In connexion with definitions of the moods, the author catalogues, with indefatigable patience, their causes and consequences.†

चाटुस्मितकपोलाद्यं सत्त्वं त्रिवलं तथा ।
प्रभावोत्थं सानुरागमङ्गविक्षिप्तं बुधाः ॥

The first of these extracts is in Jagaddhara's notes on the *Málatí-mádhava;* and the second is from his notes on the *Vásavadattá.* The third is from the annotations on the *Chaṇḍí-vilása.*

A ninth permanent mood, "quiescence," is reckoned by some, says Dhananjaya. Dhanika rejects it. See, also, IV., 43. But, according to Bharata, as Jagaddhara quotes him, in annotating the *Málatí-mádhava,* there is a ninth sentiment, which presupposes a corresponding mood: शान्ताख्य नवमो रसः.

* IV., 41, 42, 45-76.

† On the permanent moods, their causes and consequences, and on the sentiments, Bharata might be quoted profusely, at second hand and directly. See the *Náṭya-s'ástra,* VI., throughout. Many passages that occur there are adduced anonymously by Jagaddhara, among others. These writers, it may hence be concluded, generally intend, that Bharata should be understood, when they bring forward extracts unspecified as to their derivation. I have observed, however, that they take the liberty of versifying his prose, and of crediting him with the result. Quoting from memory, after the ordinary Hindu mode, they, further, not seldom depart more or less from his precise meaning; but always making good Sanskrit, and keeping tolerably close to accepted science.

Máṭrigupta, as transcribed in the *Artha-dyotaniká,* writes thus of the sentiments:

रसास्तु विविधा भाविकर्मैकस्वभावकाः ।
रसानुरूपैरालापैः श्लोकैरङ्कैः परीक्षया ।
नानावस्थारसंयुक्तैर्विविधो रस उच्यते ।

Among relative topics which are treated analytically, but with no valid claim to exhaustiveness, is that of unrequited affection. Prescriptively, it is held to have ten stages. Dhananjaya observes, however, with good sense, that the great poets have practically made out its stages to be innumerable. On many another occasion he might, with equally just reason, have intimated dissent from established restrictions.*

कर्मरूपवयोजातिदेशकालानुवर्तिभिः ।
माल्यभूषणवस्त्राद्यैर्नेपथ्यरस उच्यते ।
रूपयौवनलावण्यस्थैर्यधैर्यादिभिर्गुणैः ।
रसः स्वाभाविको ज्ञेयः स नाट्येऽतिप्रशस्यते ॥

* IV., 47-51. Bharata pronounces to the same intended effect, says Jagaddhara on the *Málati-mádhava* :

अप्राप्तरतिभोगस्य नवस्त्रीरागजन्मनि ।
दश स्थानानि कामस्य कामतन्त्रविशेषतः ॥
अभिलाषोऽत्र प्रथमे द्वितीये चिन्तनं तथा ।
अनुस्मृतिस्तृतीये च चतुर्थे गुणकीर्तनम् ॥
उद्वेगः पञ्चमे ज्ञेयो प्रलापः षष्ठ उच्यते ।
उन्मादः सप्तमे प्रोक्तो भवेद् व्याधिस्तथाऽष्टमे ।
नवमे जडता प्रोक्ता दशमे मरणं भवेत् ॥

The second couplet is quoted by Jagaddhara, in his notes on the *Vásavadattá*, in this wise :

प्रथमे त्वभिलाषः स्याद् द्वितीये चिन्तनं भवेत् ।
तृतीयेऽनुस्मृतिः प्रोक्ता चतुर्थे गुणकीर्तनम् ॥

Narasinha, annotating on the same romance, cites it, but mostly as in the first version. Similar is the case with Ráyamukuṭamaṇi. Both he and Narasinha ascribe it to Bharata.

Jagaddhara, in his notes on the *Málatí-mádhava*, quotes three lines more, of like purport, from some undesignated source :

चक्षुःप्रीतिर्मनःसङ्गः सङ्कल्पोत्पत्तिरेव च ।
निद्राच्छेदस्तनुत्वं च व्यावृत्तिर्विषयान्तरात् ।
लज्जाप्रणाश उन्मादो मूर्छा मरणमेव च ।

From this slight sketch some notion may be formed of the topics reviewed in the *Das'a-rúpa*, and of the order in which they are there disposed. Of this little work I have long had by me a rough translation; but want of leisure has prevented my revising it for the press.

Six manuscripts of the *Das'a-rúpa* and its commentary,* five of them complete, have been collated for the present publication. Only three of them deserve any notice. One of these

---

Again we read there, in the verses of some unknown author, of a quadripartite division of love, according to its causes:

अभ्यासादभिमानाच्च तथा सम्प्रत्ययादपि ।
विषयेभ्यश्च तत्त्वज्ञा विदुः प्रीतिं चतुर्विधाम् ॥

* It should be mentioned, as regards Dhanika's quotations, that some of the manuscripts are much more communicative than others about indications of their sources. These indications I have very rarely rejected. It is impossible to decide how many of them may not have been the work of the commentator himself. Besides, I have succeeded, after much search, in verifying the greater part of them.

The last poetical extract in p. 117, referred to the *Vikramorvas'í*, is not to be found there. The passage in pp. 115, 116, also, is, doubtless, from a *Vikramorvas'í*, and the one that is now current. That, before assuming its present form, it was tampered with by some of the many generations of Hindu recensors through whose hands it has come to us, is not at all unlikely. Other stanzas from the *Vikramorvas'í*, found in our present recension, are the second extract in p. 121, the second in p. 137, and the last in p. 158.

In connexion with the passage from the *Málavikágnimitra*, at pp. 111, 112, see Dr. Tullberg's edition of that drama, p. 21. Also compare the *Sáhitya-darpaṇa*, p. 199, where Dhanika's version is coolly appropriated.

The second stanza from the *Amaru-s'ataka*, in p. 147, is not in Dr. Hæberlin's very indifferent edition of that poem, in the *Kávya-sangraha*. But I have met with it in good old manuscripts.

I myself possess; another I borrowed from a pandit at Almora; and the third belongs to the Asiatic Society of Bengal. The first two would alone have served my purpose amply. A single one of all the aforesaid manuscripts bears a date. It is my own, which was copied in the year 1532 of Vikramáditya. With the exception of a couple of leaves, supplied somewhat recently, it is, in general, exceedingly correct.

To Mr. E. B. Cowell I am indebted for editing the Prákrit passages which are scattered through the commentary, and for rendering them into Sanskrit. In all probability, I should have satisfied myself with printing merely the couplets of the text-work, but for the obliging and valuable help of that versatile and accomplished scholar.

Camp Bhelsá, February 20, 1862.

Several of the extracts left unindicated are in well-known plays and poems. The second stanza in p. 144 I have seen in the eighth canto of the *Kumára-sambhava*: for the whole of that poem is in existence; a fact which few scholars are aware of. I have inspected five or six copies of the entire work.

Among books and authors all but unknown, save through Dhanika's citations, are the *Chhalita-ráma*, the *Priyadars'iká*, the *Páṇḍavánanda*, the *Udátta-rághava*, Padmagupta, Rudra, and Vikaṭanitambá. The last two, or else a poet and a poetess of the same names, are quoted in the *S'árngadhara-paddhati*. Of Munja, or Vákpati, I have spoken near the beginning of this preface.

Several stanzas which only one or two manuscripts exhibit, and which may, therefore, be suspected for interpolations, have been enclosed in brackets. In the same way I have marked a few passages of prose, which, though not Dhanika's, seemed to be useful. At p. 111 a marginal remark has been admitted.

At the foot of p. 71 begins a stanza which an intelligent pandit assures me has read in the *Prasanna-rághava*. If this be so, we may have some clue to the age of the *Gíta-govinda*; it being the native belief, that both those poems are by one and the same Jayadeva.

*** The very day after this preface was finished, a singular chance placed in my hands a complete copy of the *Náṭya-s'ástra* of Bharata; a work which, till then, I knew only from a few of its first chapters, and from detached extracts quoted by commentators. A year ago, if possessed of the "Institute of Mimetics," I should never have thought of editing the *Das'a-rúpa*; rare as it is, and precious as it was while Bharata was supposed to be lost beyond hope of recovery.

With much labour I have prepared a minute account of my manuscripts of the *Das'a-rúpa* and its commentary, and of all the various readings which they exhibit. But these particulars it seems unnecessary to print in their fulness; as I shall give, in the present fasciculus, by way of appendix, the more important portions of Bharata, from which Dhananjaya drew his materials. The reading of that appendix, in its proof sheets, and, in short, substantially the editing of it,—since I am just leaving the country,—will devolve upon my friend, Mr. Cowell, whose valued aid has so often laid me under obligation.

My preface would have presented a very different appearance, had there seemed to me, when writing it, any likelihood that I should ever see Bharata in its entirety. It is, however, too late to pare away from it what have now become excrescences.

F. E. H.

Dhár,
March 21, 1862.

VARIOUS READINGS.

Readings now esteemed preferable to those in the text are marked with asterisks. It was not till after the text was all printed, that the editor first saw the *Náṭya-pradípa,* which repeats verbatim a large portion of the *Das'a-rúpa.* The copy consulted is an old one, as has before been mentioned. It has served to show, that the degree of credit placed in the editor's own copy of the work here published was not in all cases perfectly well-advised.

SECTION I.

12b. (अभिव्यापि) अतिव्यापि. 15c. (ताभ्यां) नाऽन्तो and भेधा. 23a. (-सम्भवा) -संश्रया. 25b. (गुणाख्यानाद्) गुणाख्यानं.* 28a. (लक्ष्यालक्ष्य इवो०) लक्ष्यालक्ष्यतयो०.* 29b. (प्रगयणं) प्रगमनं.* 30a. (रत्यर्थेहा) रत्युत्थेहा. 31b. (प्रगयणं) प्रगमनं.* 32b. (उपन्यासस्तु सोपायं) प्रसादनमुपन्यासः. 32c. (चातुर्वर्ण्यां०) चातुर्वर्ण्यो०.* 39b. (सोऽवमर्शोऽङ्गसङ्ग्रहः) सोऽवमर्श इति स्मृतः. 43a. (संरब्धानां) संरम्भोक्तिर्. 54b. (अन्तः) अन्ते. 55a. (अन्तर्यवनिका०) अन्तर्जवनिका०.* 56a. (पातोऽङ्कस्य) पात्राङ्कस्य.

SECTION II.

9a. (धैर्य०) स्थैर्य०.* b. (सत्त्वजाः) सात्त्विकाः. 14b. (स्वीया) स्वाऽपि. 18b. (मध्या) कान्तं. 19b. (इच्छातः) अन्विच्छन्. 21b. रूपकेष्वनुरक्तैव कार्या प्रहसनेतरे. 23b. (विरहोत्कण्ठितोन्मनाः) विरहोत्कण्ठिता मता. 24b. (विधूते) विभूते. 31b. (हेवाकसः) अल्पालापः. 33a. (मन्मथावापित०) मन्मथाध्यासित०. 35b. (-क्रियादिषु)-क्रियोक्तिषु. 43c. (सपरिच्छदः) सपरिग्रहः. 44c. (-स्फिञ्ज०)-स्फञ्ज०. 47a. (नर्मस्फिञ्जः) नर्मस्फञ्जः 50a. (-रसा मिथः)-रसात्मकः. 58b. (अवगम्य) अधिगम्य, उपगम्य, and अनुगम्य. 60a. (शूरसेनी) सौरसेनी* and शौरसेनी. 65b. (अज्जुका) अज्जका. 66a. कुट्टिन्यनुगतैः पूज्या अम्बेति युवती जनैः. b. (राज्ञी) राज्ञा.

Section III.

9a. वाक्यं वाक्यार्थमथवा प्रस्तुतं यत्र सूचिताः. 14a. (असङ्कुतमिथःस्तोत्रं) असङ्कुतं मिथःस्तोत्रं.* 15a. (छलना) छलनात्.* 18a. (यथोत्तरः) यथोत्तरं. 20a. (अभिगम्य॰) अभिगामि॰ and अधिगम्य॰. 32a. (अम्बर॰) अम्बरस्य. 33a. (-तैकार्थ॰)-तैः कार्य॰. 36a. (सापायं) सोपायं. 41b. (-सङ्गमः)-सङ्गमे. 42a. (नायिका) प्राप्याऽन्या. 48a. (चैव उक्त॰) चाऽन्यदुक्त॰. b. (-कल्पनं) -कथनं. 49c. (वेषभाषाभिः) वेषभाषादि and देशभाषादि. 59, a. and b. (-नालिकः &c.,)-नाडिकः &c., thrice.

Section IV.

1b. (स्वाद्यत्वं) स्वादुत्वं. 2b. आलम्बनोद्दीपनाभ्यां कान्तोद्यानादिना द्विधा. 10b. (-घोषा॰)-घोका॰. 14a. (-क्रौर्य॰)-चौर्य॰. 21b. (उत्स्वप्नतादयः) उच्छ्वसनादयः. 26a. (-नागाभियोगो) -मायाभियोगौ. 28b. (-वस्था)-स्थान॰. 30b. (-त्वनिः॰)-त्वरा॰. 49a. (कान्ते) काम्ये. 51b. (-प्रबन्धेषु)-प्रयोगेषु. 54a. (कोपावसित॰) कोपावेष्टित॰. 61b. (व्याश्रयत्वात्) निराश्रयात्. 67c. (-स्रुञ्जो)-युक्तो. 73a. (-वेपथु॰)-वमथु॰. 74b. (-वैचित्र्य॰)-वैवर्ण्य॰. 75a. (-ग्नौ)-ग्निः. 78b. (अप्यसन्ध्यन्तराङ्गानि) अप्यसन्ध्यन्तराख्यानि. 80d. (-भाजा)-भावाद्.

दशरूपम् ।

इह सदाचारं प्रमाणयद्भिरविघ्नेन प्रकरणस्य समाप्त्यर्थमिष्टयोः प्रकृताभिमतदेवतयोर्नमस्कारः क्रियते श्लोकद्वयेन ।

नमस्तस्मै गणेशाय यत्कण्ठः पुष्करायते ।
मदाभोगघनध्वानो नीलकण्ठस्य ताण्डवे ॥ १ ॥
दशरूपानुकारेण यस्य माद्यन्ति भावकाः ।
नमः सर्वविदे तस्मै विष्णवे भरताय च ॥ २ ॥

यस्य कण्ठः पुष्करायते मृदङ्गवदाचरति मदाभोगेन घनध्वानो निबिडध्वनिः नीलकण्ठस्य शिवस्य ताण्डवे उद्धते नृत्ते तस्मै गणेशाय नमः । अत्र खण्डश्लेषाक्षिप्यमाणोपमाच्छायालङ्कारः । नीलकण्ठस्य मयूरस्य ताण्डवे यथा मेघध्वनिः पुष्करायत इति प्रतीतेः ।

दशरूपानुकारेणेति । एकत्र मत्स्यकूर्मादिप्रतिमानामुद्देशेनाऽन्यत्राऽनुकृतिरूपनाटकादिना यस्य भावकाः ध्यातारो

रचिताय माधन्ति च्यम्बि तस्मै विष्णवेऽभिमताय प्रहृताय भरताय च नमः ।

श्रोतुः प्रवृत्तिनिमित्तं प्रदर्श्यते ।

कस्यचिदेव कदाचिद् दयया विषयं सरस्वती विदुषः ।
घटयति कमपि तमन्यो व्रजति जनो येन वैदग्धीम् ॥ ३ ॥

तं कञ्चिद् विषयं प्रकरणादिरूपं कदाचिदेव कस्यचिदेव कवेः सरस्वती योजयति येन प्रकरणादिना विषयेणाऽन्यो जनो विदग्धो भवति ।

स्वप्रवृत्तिविषयं दर्शयति ।

उद्धृत्योद्धृत्य सारं यमखिलनिगमान् नाट्यवेदं विरिञ्चिश्
चक्रे यस्य प्रयोगं मुनिरपि भरतस्ताण्डवं नीलकण्ठः ।
शर्वाणी लास्यमस्य प्रतिपदमपरं लक्ष्म कः कर्तुमीष्टे
नाट्यानां किन्तु किञ्चित् प्रगुणरचनया लक्षणं सङ्क्षिपामि ॥४॥

यं नाट्यवेदं वेदेभ्यः सारमादाय ब्रह्मा कृतवान् यत्सम्बद्ध-मभिनयं भरतश्चकार करणाङ्गहारात्मकरोत् हरस्ताण्डवमु-द्धतं लास्यं सुकुमारं नृत्तं पार्वती कृतवती तस्य सामस्त्येन लक्षणं कर्तुं कः शक्तः तदेकदेशस्य तु दशरूपस्य सङ्क्षेपः क्रियत इत्यर्थः ।

विषयैक्यप्रसक्तं पौनरुक्त्यं परिहरति ।

व्याकीर्णे मन्दबुद्धीनां जायते मतिविभ्रमः ।
तस्याऽर्थस्तत्पदैस्तेन सङ्क्षिप्य क्रियतेऽञ्जसा ॥ ५ ॥

व्याकीर्णे विक्षिप्ते विस्तीर्णे च रसशास्त्रे मन्दबुद्धीनां पुंसां मतिमोहो भवति तेन तस्य नाट्यवेदस्याऽर्थस्तत्पदैरेव सङ्क्षिप्य ऋजुवृत्त्या क्रियत इति।

इदं प्रकरणं दशरूपज्ञानफलम्। दशरूपं किम्फलमित्याह।

आनन्दनिस्यन्दिषु रूपकेषु
व्युत्पत्तिमात्रं फलमल्पबुद्धिः।
योऽपीतिहासादिवदाह साधुस्
तस्मै नमः स्वादुपराङ्मुखाय॥ ६॥

तत्र केचित्।

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्॥

इत्यादिना त्रिवर्गादिव्युत्पत्तिं काव्यफलत्वेनेच्छन्ति तन्निरासेन स्वसंवेद्यः परमानन्दरूपो रसास्वादो दशरूपाणां फलं न पुनरितिहासादिवत् त्रिवर्गादिव्युत्पत्तिमात्रमिति दर्शितम्। नम इति सोल्लुण्ठम्।

नाट्यानां लक्षणं सङ्क्षिपामीत्युक्तम्। किं पुनस्तन् नाट्यमित्याह।

अवस्थानुकृतिर्नाट्यं

काव्योपनिबद्धधीरोदात्ताद्यवस्थानुकारश्चतुर्विधाभिनयेन तादात्म्यापत्तिर्नाट्यम्।

रूपं दृश्यतयोच्यते।

तदेव नाट्यं दृश्यमानतया रूपमित्युच्यते नीलादिरूपवत्।

रूपकं तत् समारोपाद्

इति। नटे रामाद्यवस्थारोपेण वर्तमानत्वात् रूपकं मुखचन्द्रादिवत् इत्येकस्मिन्नर्थे प्रवर्तमानस्य शब्दत्रयस्य इन्द्रः पुरन्दरः शक्र इतिवत् प्रवृत्तिनिमित्तभेदो दर्शितः।

दशधैव रसाश्रयम् ॥ ७ ॥

इति। रसानाश्रित्य वर्तमानं दशप्रकारकम्। एवेत्यवधारणं शुद्धाभिप्रायेण नाटिकायाः सङ्कीर्णत्वेन वक्ष्यमाणत्वात्।

तानेव दशभेदानुद्दिशति।

नाटकं सप्रकरणं भाणः प्रहसनं डिमः।
व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति ॥ ८ ॥

ननु।

डोम्बी श्रीगदितं भाणो भाणीप्रस्थानरासकाः।
काव्यं च सप्त नृत्यस्य भेदाः स्युस्तेऽपि भाणवत् ॥

इति रूपकान्तराणामपि भावादवधारणानुपपत्तिरित्याशङ्क्याऽऽह।

अन्यद् भावाश्रयं नृत्यं

इति। रसाश्रयान् नाट्याद् भावाश्रयं नृत्यमन्यदेव। तत्र भावाश्रयमिति विषयभेदान् नृत्यमिति नृतेर्गात्रविक्षेपार्थत्वेनाऽऽङ्गिकबाहुल्यात् तत्कारिषु च नर्तकव्यपदेशाल् लोकेऽपि चाऽत्र प्रेक्षणीयकमिति व्यवहारान् नाटकादेरन्यन् नृत्यम्। तद्भेदत्वात् श्रीगदितादेरवधारणोपपत्तिः। नाटकादि च रसविषयम्। रसस्य च पदार्थीभूतविभावादिकसंसर्गात्मकवाक्यार्थ-

हेतुकत्वाद् वाक्यार्थाभिनयात्मकत्वं रसाश्रयमित्यनेन दर्शितम्। नाट्यमिति च नट अवस्यन्दन इति नटेः किञ्चिच्चलनार्थत्वात् सात्त्विकबाहुल्यम्। अतएव तत्कारिषु नटव्यपदेशः। यथा च गात्रविक्षेपार्थत्वे समानेऽप्यनुकारात्मकत्वेन नृत्तादन्यन् नृत्यं तथा वाक्यार्थाभिनयात्मकान् नाट्यात् पदार्थाभिनयात्मकमन्यदेव नृत्यमिति।

प्रसङ्गान् नृत्तं व्युत्पादयति।

नृत्तं तालल्याश्रयम्।

इति। तालश्चञ्चत्पुटादिः लयो द्रुतादिः तन्मात्रापेक्षोऽङ्गविक्षेपोऽभिनयशून्यो नृत्तमिति।

अनन्तरोक्तं द्वितयं व्याचष्टे।

आद्यं पदार्थाभिनयो मार्गो देशी तथा परम्॥ ९॥

नृत्यं पदार्थाभिनयात्मकं मार्ग इति प्रसिद्धम्। नृत्तं च देशीति।

द्विविधस्याऽपि द्वैविध्यं दर्शयति।

मधुरोद्धतभेदेन तद् द्वयं द्विविधं पुनः।
लास्यताण्डवरूपेण नाटकाद्युपकारकम्॥ १०॥

सुकुमारं द्वयमपि लास्यमुद्धतं द्वितयमपि ताण्डवमिति। प्रसङ्गात्तस्योपयोगं दर्शयति। तच्च नाटकाद्युपकारकमिति। नृत्यस्य क्वचिदवान्तरपदार्थाभिनयेन नृत्तस्य च शोभाहेतुत्वेन नाटकादावुपयोग इति।

अनुकारात्मकत्वेन रूपाणामभेदात् किङ्कृतो भेद इत्या-शङ्क्याऽऽह।

वस्तु नेता रसस्तेषां भेदको

इति। वस्तुभेदान् नायकभेदाद् रसभेदाद् रूपाणामन्योन्यं भेद इति। वस्तुभेदमाह।

वस्तु च द्विधा।

कथमित्याह।

तत्राऽऽधिकारिकं मुख्यमङ्गं प्रासङ्गिकं विदुः॥ ११॥

इति। प्रधानभूतमाधिकारिकं यथा रामायणे रामसीतावृत्तान्त। तदङ्गभूतं प्रासङ्गिकं यथा तत्रैव विभीषणसुग्रीवादिवृत्तान्त इति।

निरुक्त्याऽऽधिकारिकं लक्षयति।

अधिकारः फलस्वाम्यमधिकारी च तत्प्रभुः।
तन्निर्वर्त्यमभिव्यापि वृत्तं स्यादाधिकारिकम्॥ १२॥

इति। फलेन स्वस्वामिसम्बन्धोऽधिकारः फलस्वामी चाऽधिकारी तेनाऽधिकारेणाऽधिकारिणा वा निर्वृत्तं फलपर्यन्ततां नीयमानमितिवृत्तमाधिकारिकम्।

प्रासङ्गिकं व्याचष्टे।

प्रासङ्गिकं परार्थस्य स्वार्थो यस्य प्रसङ्गतः।

यस्येतिवृत्तस्य परप्रयोजनस्य सतस्तत्प्रसङ्गात् स्वप्रयोजनसिद्धिस्तत् प्रासङ्गिकमितिवृत्तं प्रसङ्गनिर्वृत्तेः।

प्रासङ्गिकमपि पताकाप्रकरीभेदाद् द्विविधमित्याह।

सानुबन्धं पताकाख्यं प्रकरी च प्रदेशभाक्॥ १३॥

दूरं यदनुवर्तते प्रासङ्गिकं सा पताका सुग्रीवादिवृत्तान्तवत्। पताकेवाऽसाधारणनायकचिह्नवत् तदुपकारित्वात्। यदल्पं सा प्रकरी श्रवणादिवृत्तान्तवत्।

पताकाप्रसङ्गेन पताकास्थानकं व्युत्पादयति।

प्रस्तुतागन्तुभावस्य वस्तुनोऽन्योक्तिसूचकम्।
पताकास्थानकं तुल्यसंविधानविशेषणम्॥ १४॥

प्राकरणिकस्य भाविनोऽर्थस्य सूचकं रूपं पताकावद् भवतीति पताकास्थानकम्। तच्च तुल्येतिवृत्ततया तुल्यविशेषणतया च द्विप्रकारमन्योक्तिसमासोक्तिभेदात्। यथा रत्नावल्याम्।

यातोऽस्मि पद्मनयने समयो ममैष
सुप्ता मयैव भवती प्रतिबोधनीया।
प्रत्यायनामयमितीव सरोरुहिण्याः
सूर्योऽस्तमस्तकनिविष्टकरः करोति॥

यथा च तुल्यविशेषणतया।

उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणाद्
आयासं श्वसनोद्गमैरविरलैरातन्वतीमात्मनः।
अद्योद्यानलतामिमां समदनां नारीमिवाऽन्यां ध्रुवं
पश्यन् कोपविपाटलद्युतिमुखं देव्याः करिष्याम्यहम्॥

एवमाधिकारिकद्विविधप्रासङ्गिकभेदात् त्रिविधस्याऽपि त्रै-विध्यमाह ।

प्रख्यातोत्पाद्यमिश्रत्वभेदात् त्रेधाऽपि तत् त्रिधा ।
प्रख्यातमितिहासादेरुत्पाद्यं कविकल्पितम् ।
मिश्रं च सङ्करात् ताभ्यां दिव्यमर्त्यादिभेदतः ॥ १५ ॥

इति निगदव्याख्यातम् ।

तस्येतिवृत्तस्य किं फलमित्याह ।

कार्यं त्रिवर्गस्तत् शुद्धमेकानेकानुबन्धि च ।

धर्मार्थकामाः फलम् । तच्च शुद्धमेकैकमेकानुबन्धं द्व्यनुबन्धं वा ।

तत्साधनं व्युत्पादयति ।

स्वल्पोद्दिष्टस्तु तद्धेतुर्बीजं विस्तार्यनेकधा ।

स्तोकोद्दिष्टः कार्यसाधकः पुरस्तादनेकप्रकारं विस्तारी हेतुविशेषो बीजवद् बीजम् । यथा रत्नावल्यां वत्सराजस्य रत्नावलीप्राप्तिहेतुरनुकूलदैवो यौगन्धरायणव्यापारो विष्कम्भके न्यस्तः । यौगन्धरायणः । कः सन्देहः । द्वीपादन्यस्मादिति पठति इत्यादिना ।

प्रारम्भेऽस्मिन् स्वामिनो वृद्धिहेतौ ।

इत्यन्तेन । यथा च वेणीसंहारे द्रौपदीकेशसंयमनहेतुर्भीमक्रोधोपचितयुधिष्ठिरोत्साहो बीजमिति । तच्च महाकार्यावान्तरकार्यहेतुभेदादनेकप्रकारमिति ।

अवान्तरबीजस्य संज्ञान्तरमाह।

अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्॥ १६॥

यथा रत्नावल्यामवान्तरप्रयोजनानङ्गपूजापरिसमाप्तौ कथार्थविच्छेदे सत्यनन्तरकार्यहेतुरुदयनस्येन्दोरिवोद्दीच्यते। सागरिका। श्रुत्वा। *कहं एसो सो उदयणणरिन्दो जस्स अहं तादेण दिण्णेत्यादि। बिन्दुर्जले तैलबिन्दुवत् प्रसारित्वात्।

इदानीं पताकाद्यं प्रसङ्गाद् व्युत्क्रमोक्तं क्रमार्थमुपसंहरन्नाह।

बीजबिन्दुपताकाख्यप्रकरीकार्यलक्षणाः।
अर्थप्रकृतयः पञ्च ता एताः परिकीर्तिताः॥ १७॥

अर्थप्रकृतयः प्रयोजनसिद्धिहेतवः।

अन्यदवस्थापञ्चकमाह।

अवस्थाः पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः।
आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः॥ १८॥

यथोद्देशं लक्षणमाह।

औत्सुक्यमात्रमारम्भः फललाभाय भूयसे।

इदमहं सम्पादयामीत्यध्यवसायमात्रमारम्भ इत्युच्यते। यथा रत्नावल्याम्।

प्रारम्भेऽस्मिन् स्वामिनो वृद्धिहेतौ
दैवे चेत्थं दत्तहस्तावलम्बे।

---

* कथं एष स उदयननरेन्द्रः यस्याऽहं तातेन दत्तेत्यादि।

इत्यादिना सचिवायत्तसिद्धेर्वत्सराजस्य कार्यारम्भो यौगन्ध-रायणमुखेन दर्शितः।

अथ प्रयत्नः।

प्रयत्नस्तु तदप्राप्तौ व्यापारोऽतित्वरान्वितः॥ १९ ॥

तस्य फलस्याऽप्राप्तावुपाययोजनादिरूपश्चेष्टाविशेषः प्रयत्नः। यथा रत्नावल्यामालेख्याभिलेखनादिर्वत्सराजसमागमोपायः। *तहावि णत्थि अण्णो दंसणउवाओ त्ति जहा तहा आलिहिअ जधा समीहिअं करिस्समित्यादिना प्रतिपादितः।

प्राप्त्याशामाह।

उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवः।

उपायस्याऽपायशङ्कायाश्च भावादनिर्धारितैकान्ता फल-प्राप्तिः प्राप्त्याशा। यथा रत्नावल्यां तृतीयेऽङ्के वेषपरिवर्ताभि-सरणादौ समागमोपाये सति वासवदत्तालक्षणापायशङ्काया †एवं जदि अआलवादाली विअ आअच्छिअ अन्तरा ण णइ-स्सदि वासवदत्ता इत्यादिना दर्शितत्वादनिर्धारितैकान्ता समागमप्राप्तिरुक्ता।

नियताप्तिमाह।

अपायाभावतः प्राप्तिर्नियताप्तिः सुनिश्चिता।

अपायाभावादवधारितैकान्ता फलप्राप्तिर्नियताप्तिरिति।

---

* विद्व०। तथापि नास्त्यन्यो दर्शनोपाय इति यथा तथा आलिख्य यथा समीहितं करिष्यामि।

† एवं यदि अकालवातालीव आगत्यान्तरा न नेष्यति वासवदत्ता।

यथा रत्नावल्यां विदूषकः। *सागरिका दुक्करं जीविस्सदि इत्युपक्रम्य किं ण उपायं चिन्तेमि। इत्यनन्तरं राजा। वयस्य देवीप्रसादनं मुक्त्वा नाऽन्यमत्रोपायं पश्यामीत्यनन्तराङ्कार्थबिन्दुनाऽनेन देवीलक्षणापायस्य प्रसादनेन निवारणान् नियता फलप्राप्तिः सूचिता।

फलयोगमाह।

समग्रफलसम्पत्तिः फलयोगो यथोदितः॥ २०॥

यथा रत्नावल्यां रत्नावलीलाभचक्रवर्तित्वावाप्तिरिति।

सन्धिलक्षणमाह।

अर्थप्रकृतयः पञ्च पञ्चावस्थासमन्विताः।
यथासङ्ख्येन जायन्ते मुखाद्याः पञ्च सन्धयः॥ २१॥

अर्थप्रकृतीनां पञ्चानां यथासङ्ख्येनाऽवस्थाभिः पञ्चभिर्योगात् यथासङ्ख्येनैव वक्ष्यमाणा मुखाद्याः पञ्च सन्धयो जायन्ते।

सन्धिसामान्यलक्षणमाह।

अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति।

एकेन प्रयोजनेनाऽन्वितानां कथांशानामवान्तरैकप्रयोजनसम्बन्धः सन्धिः।

के पुनस्ते सन्धयः।

मुखप्रतिमुखे गर्भः सावमर्शोपसंहृतिः॥ २२॥

* सागरिका दुष्करं जीविष्यति इत्युपक्रम्य किं न उपाय चिन्तयसि।

यथोद्देशं लक्षणमाह।

मुखं बीजसमुत्पत्तिर्नानार्थरससम्भवा।
अङ्गानि द्वादशैतस्य बीजारम्भसमन्वयात्॥ २३॥

बीजानामुत्पत्तिरनेकप्रकारप्रयोजनस्य रसस्य च हेतुर्मुखसन्धिरिति व्याख्येयम्। तेनाऽत्रिवर्गफले प्रहसनादौ रसोत्पत्तिहेतोरेव बीजत्वमिति। अस्य च बीजारम्भार्थयुक्तानि द्वादशाऽङ्गानि भवन्ति। तान्याह।

उपक्षेपः परिकरः परिन्यासो विलोभनम्।
युक्तिः प्राप्तिः समाधानं विधानं परिभावना।
उद्भेदभेदकरणान्यन्वर्थान्यथ लक्षणम्॥ २४॥

एतेषां स्वसञ्ज्ञाव्याख्यातानामपि सुखार्थं लक्षणं क्रियते।

बीजन्यास उपक्षेपः

यथा रत्नावल्यां नेपथ्ये।

द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात्।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः॥

इत्यादिना यौगन्धरायणो वत्सराजस्य रत्नावलीप्राप्तिहेतुभूतमनुकूलदैवं स्वव्यापारं बीजत्वेनोपक्षिप्तवानित्युपक्षेपः।

परिकरमाह।

तद्बाहुल्यं परिक्रिया।

यथा तत्रैव। अन्यथा क्व सिद्धादेशप्रत्ययप्रार्थितायाः सिंहलेश्वरदुहितुः समुद्रे प्रवहणभङ्गमग्नोत्थितायाः फलका-

सादनमित्यादिना सर्वथा स्पृशन्ति स्वामिनमभ्युदया इत्यन्तेन बीजोत्पत्तेरेव बहुकरणात् परिकरः।

परिन्यासमाह।

तन्निष्पत्तिः परिन्यासो

यथा तत्रैव।

प्रारम्भेऽस्मिन् स्वामिनो वृद्धिहेतो
दैवे चेत्थं दत्तहस्तावलम्बे।
सिद्धेर्भ्रान्तिर्नाऽस्ति सत्यं तथाऽपि
स्वेच्छाकारी भीत एवाऽस्मि भर्तुः॥

इत्यनेन यौगन्धरायणः स्वव्यापारदैवयोर्निष्पत्तिमुक्तवानिति परिन्यासः।

विलोभनमाह।

गुणाख्यानाद् विलोभनम्॥२५॥

यथा रत्नावल्याम्।

अस्तापास्तसमस्तभासि नभसः पारं प्रयाते रवा-
वास्थानीं समये समं नृपजनः सायन्तने सम्पतन्।
सम्प्रत्येष सरोरुहद्युतिमुषः पादांस्तवाऽऽसेवितुं
प्रीत्युत्कर्षकृतो दृशामुदयनस्येन्दोरिवोद्वीक्षते॥

इति वैतालिकमुखेन चन्द्रतुल्यवत्सराजगुणवर्णनया सागरिकायाः समागमहेत्वनुरागबीजानुगुण्येनैव विलोभनाद् विलोभनमिति। यथा च वेणीसंहारे।

मन्थायस्तार्णवाम्भःप्लुतकुहरवलन्मन्दरध्वानधीरः
कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसङ्घट्टचण्डः।

कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः
केनाऽस्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम्॥

इत्यादिना यशोदुन्दुभिरित्यन्तेन द्रौपद्या विलोभनाद् विलोभनमिति।

अथ युक्तिः।

सम्प्रधारणमर्थानां युक्तिः

यथा रत्नावल्यां मयाऽपि चैनां देवीहस्ते सबहुमानं निक्षिपता युक्तमेवाऽनुष्ठितं कथितं च मया यथा बाभ्रव्यः कञ्चुकी सिंहलेश्वरामात्येन वसुभूतिना सह कथं कथमपि समुद्रादुत्तीर्य कोशलोच्छित्तये गतस्य रुमण्वतो घटित इत्यनेन सागरिकाया अन्तःपुरस्थाया वत्सराजस्य सुखेन दर्शनादिप्रयोजनावधारणाद् बाभ्रव्यसिंहलेश्वरामात्ययोः स्वनायकसमागमहेतुप्रयोजनत्वेनाऽवधारणाद् युक्तिरिति।

अथ प्राप्तिः।

प्राप्तिः सुखागमः।

इति। यथा वेणीसंहारे। चेटी। *भट्टिणि परिकुविदो विअ कुमारो लक्खीयदीत्युपक्रमे। भीमः।

मथ्नामि कौरवशतं समरे न कोपाद्
दुःशासनस्य रुधिरं न पिबाम्युरस्तः।
सञ्चूर्णयामि गदया न सुयोधनोरू
सन्धिं करोतु भवतां नृपतिः पणेन॥

* भर्त्रि परिकुपित इव कुमारो लक्ष्यते।

द्रौपदी श्रुत्वा सहर्षं *णाध अस्सुदपुव्वं खु एदं वअणं ता पुणो पुणो भण इत्यनेन भीमक्रोधबीजान्वयेनैव सुखप्राप्त्या द्रौपद्याः प्राप्तिरिति। यथा च रत्नावल्यां सागरिका श्रुत्वा सहर्षं परिवृत्य सस्पृहं पश्यन्ती। †कधं अअं सो राआ उदअणो जस्स अहं तादेण दिस्सा ता परप्पेसणदूसिदं मे जीविदं एदस्स दंसणेण बहुमदं संजादमिति। सागरिकायाः सुखागमात् प्राप्तिरिति।

अथ समाधानम्।

वीजागमः समाधानं

यथा रत्नावल्यां वासवदत्ता। ‡तेण हि उअणेहि मे उवअरणाइं। सागरिका। भट्टिणि एदं सव्वं सज्जम्। वासवदत्ता। निरूप्याऽऽत्मगतं अहो पमादो परिअणस्स जस्स एव्व दंसणपहादो पअत्तेण रक्खीअदि तस्स ज्जेव कहं दिट्ठिगोअरं आअदा भोदु एव्वं दाव। प्रकाशं। हंजे सागरिए कीस तुमं अज्ज पराहीणे परिअणे मअणूसवे सारिअं मोत्तूण

* नाथ अश्रुतपूर्वमेतद्वचनं तत्पुनः पुनर्भण।

† कथमयं स राजा उदयनो यस्याऽहं तातेन दत्ता तत् परप्रेषणदूषितं मे जीवितं एतस्य दर्शनेन बहुमतं सञ्जातं।

‡ तेन हि मे उपकरणानि उपनय। सागरिका। भर्तृदारिके एतत् सर्वं सज्जं। वासवदत्ता निरूप्यात्मगतं, अहो प्रमादः परिजनस्य यस्यैव दर्शनपथात् प्रयत्नेन रक्ष्यते तस्यैव कथं दृष्टिगोचरं आगता भवेत्। एवं तावत्। प्रकाशं। चेटि सागरिके कथं त्वमद्य पराधीने परिजने मदनोत्सवे सारिकां मुक्त्वागता, तस्मा-

इहागदा ता तहिं ज्जेव गच्छ इत्युपक्रमे सागरिका स्वगतं सारिश्रा दाव मए सुसङ्गदाए हत्थे समप्पिदा पेक्खिदुं च मे कुदूहलं ता अलक्खिआ पेक्खिस्सं इत्यनेन वासवदत्तायाः रत्नावलीवत्सराजयोर्दर्शनप्रतीकारात् सारिकायाः सुसङ्गतार्पणेन अलक्षितप्रेक्षणेन च वत्सराजसमागमहेतोर्बीजस्योपादानात् समाधानमिति। यथा च वेणीसंहारे। भीमः। भवतु पाञ्चालराजतनये श्रूयतामचिरेणैव कालेन।

चञ्चद्भुजभ्रमितचण्डगदाभिघात-
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य।
स्त्यानावनद्धघनशोणितशोणपाणि-
रुत्तंसयिष्यति कचांस्तव देवि भीमः॥

इत्यनेन वेणीसंहारहेतोः क्रोधबीजस्य पुनरुपादानात् समाधानम्।

अथ विधानम्।

विधानं सुखदुःखकृत्॥ २६॥

यथा मालतीमाधवे प्रथमेऽङ्के। माधवः।

यान्त्या मुहुर्वलितकन्धरमाननं तद्
आवृत्तवृन्तशतपत्रनिभं वहन्त्या।
दिग्धोऽमृतेन च विषेण च पक्ष्मलाक्ष्या
गाढं निखात इव मे हृदये कटाक्षः॥

तत्रैव गच्छ, इत्युपक्रमे सागरिका स्वगतं सारिका तावन्मया सुसङ्गतायाः हस्ते समर्पिता प्रेक्षितुं च मे कुतूहलं तत् अलक्षिता प्रेक्षिष्ये।

यद्विस्मयस्तिमितमस्तमितान्यभावम्
आनन्दमन्दममृतप्लवनादिवाऽभूत्।
तत्सन्निधौ तदधुना हृदयं मदीयम्
अङ्गारचुम्बितमिव व्यथमानमास्ते॥

इत्यनेन मालत्यवलोकनस्याऽनुरागस्य समागमहेतोर्बीजानुगुणेनैव माधवस्य सुखदुःखकारित्वाद् विधानमिति। यथा च वेणीसंहारे। द्रौपदी। *णाध पुणोवि तुम्हेहिं अहं आअच्छिअ समासासिदव्वा। भीमः।

ननु पाञ्चालराजतनये किमद्याऽप्यलीकाश्वासनया।
भूयः परिभवक्लान्तिलज्जाविधुरिताननम्।
अनिःशेषितकौरव्यं न पश्यसि वृकोदरम्॥

इति सङ्ग्रामस्य सुखदुःखहेतुत्वाद् विधानमिति।

अथ परिभावना।

परिभावोऽद्भुतावेशः

इति। यथा रत्नावल्याम्। सागरिका। दृष्ट्वा सविस्मयम्। †कधं पच्चक्खो ज्जेव अणङ्गो पूअं पडिच्छेदि ता अहंपि इध ट्ठिद ज्जेव्व णं पूजइस्सं। इत्यनेन वत्सराजस्य अनङ्गरूपतया अपह्नवादनङ्गस्य च प्रत्यक्षस्य पूजाग्रहणस्य लोकोत्तरत्वादद्भुतरसावेशः

---

* नाथ पुनरपि त्वयाऽहमागत्य समाश्वासयितव्या।

† कथं प्रत्यक्ष एवानङ्गः पूयं प्रतिच्छेदिता अहमपि इह स्थितैवैनं पूजयिष्यामीति।

D

16050

परिभावना। यथा च वेणीसंहारे। द्रौपदी। *किं दाणिं एसो पलअजलधरत्थणिदमंसलो खणे खणे समरदुन्दुभी ताडीयदि त्ति। इति लोकोत्तरसमरदुन्दुभिध्वनेर्विस्मयरसावेशाद् द्रौपद्याः परिभावना।

अथोद्भेदः।

उद्भेदो गूढभेदनम्।

इति। यथा रत्नावल्यां वत्सराजस्य कुसुमायुधव्यपदेशगूढस्य वैतालिकवचसा अस्तापास्तेत्यादिनोदयनस्येत्यन्तेन बीजानुगुणेनैवोद्भेदनादुद्भेदः। यथा च वेणीसंहारे। आर्य किमिदानीमध्यवस्यति गुरुरित्युपक्रमे। नेपथ्ये।

यत् सत्यव्रतभङ्गभीरुमनसा यत्नेन मन्दीकृतं
यद् विस्मर्तुमपीहितं शमवता शान्तिं कुलस्येच्छता।
तद् द्यूतारणिसम्भृतं नृपसुताकेशाम्बराकर्षणैः
क्रोधज्योतिरिदं महत् कुरुवने यौधिष्ठिरं जृम्भते॥

भीमः। सहर्षम्। जृम्भतां जृम्भतां सम्प्रत्यप्रतिहतमार्यस्य क्रोधज्योतिरित्यनेन कृतस्य द्रौपदीकेशसंयमनहेतोर्युधिष्ठिरक्रोधस्योद्भेदनादुद्भेदः।

अथ करणम्।

करणं प्रकृतारम्भो

---

* किमिदानीमेष प्रलयजलधरस्तनितमांसलः क्षणे क्षणे समरदुन्दुभिस्ताड्यते इति।

यथा रत्नावल्याम्। *णमो दे कुसुमाउह ता अमोहदंसणो मे भविस्ससि त्ति दिट्ठं जं पेक्खिदव्वं ता जाव ण कोवि मं पेक्खइ ता गमिस्सं इत्यनेनाऽनन्तराङ्कप्रकृतनिर्विघ्नदर्शनारम्भणात् करणम्। यथा च वेणीसंहारे। तत् पाञ्चालि गच्छामो वयमिदानीं कुरुकुलक्षयायेति। सहदेवः। आर्य गच्छाम इदानीं गुरुजनानुज्ञाता विक्रमानुरूपमाचरितुमित्यनेनाऽनन्तराङ्कप्रस्तूयमानसङ्ग्रामारम्भणात् करणमिति। सर्वत्र चोद्देश-प्रतिनिर्देशवैषम्यं क्रियाक्रमस्याऽविवक्षितत्वादिति।

अथ भेदः।

भेदः प्रोत्साहना मता॥ २७॥

इति। यथा वेणीसंहारे। †णाध मा क्खु जण्णसेणीपरिभवुद्दीविदकोवा अणवेक्खिदसरीरा परिक्कमिस्सध जदो अप्पमत्तसञ्चरणीयाइं सुणीयन्ति रिउवलाइं। भीमः। अयि सुक्षत्रिये।

अन्योन्यास्फालभिन्नद्विपरुधिरवसामांसमस्तिष्कपङ्के
मग्नानां स्यन्दनानामुपरिकृतपदन्यासविक्रान्तपत्तौ।
स्फीतासृक्पानगोष्ठीरसदशिवशिवातूर्यनृत्यत्कबन्धे
सङ्ग्रामैकार्णवान्तःपयसि विचरितुं पण्डिताः पाण्डुपुत्राः॥

---

* नमस्ते कुसुमायुध तदमोघदर्शनो मे भविष्यसीति, दृष्टं यत् प्रेक्षितव्यं तत् यावन्न कोऽपि मां प्रेक्षते तत् गमिष्यामीति।

† नाथ मा खलु याज्ञसेनीपरिभवोद्दीपितकोपा अनपेक्षितशरीराः परिक्रमिष्यथ यतोऽप्रमत्तसञ्चरणीयानि श्रूयन्ते रिपुबलानि।

इत्यनेन विषण्णायाः द्रौपद्याः क्रोधोत्साहबीजानुगुण्येनैव प्रोत्साहनाद् भेद इति।

एतानि च द्वादशमुखाङ्गानि बीजारम्भद्योतकानि साक्षात् पारम्पर्येण वा विधेयानि। एतेषामुपक्षेपपरिकरपरिन्यासयुक्त्युद्भेदसमाधानानामवश्यं भावितेति।

अथ साङ्गं प्रतिमुखसन्धिमाह।

लक्ष्यालक्ष्य इवोद्भेदस्तस्य प्रतिमुखं भवेत्।
बिन्दुप्रयत्नानुगमादङ्गान्यस्य त्रयोदश॥ २८॥

तस्य बीजस्य किञ्चिल् लक्ष्यः किञ्चिदलक्ष्य इवोद्भेदः प्रकाशनं तत् प्रतिमुखम्। यथा रत्नावल्यां द्वितीयेऽङ्के वत्सराजसागरिकासमागमहेतोरनुरागबीजस्य प्रथमाङ्कोपक्षिप्तस्य सुसङ्गताविदूषकाभ्यां ज्ञायमानतया किञ्चिल् लक्ष्यस्य वासवदत्तया च चित्रफलकवृत्तान्तेन किञ्चिदुन्नीयमानस्य दृश्यादृश्यरूपतयोद्भेदः प्रतिमुखसन्धिरिति। वेणीसंहारेऽपि द्वितीयेऽङ्के भीष्मादिवधेन किञ्चिल् लक्ष्यस्य कर्णाद्यवधाच् चाऽलक्ष्यस्य क्रोधबीजस्योद्भेदः।

संहृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम्।
स्वबलेन निहन्ति संयुगे न चिरात् पाण्डुसुतः सुयोधनम्॥

इत्यादिभिः।

दुःशासनस्य हृदयक्षतजाम्बुपाने
दुर्योधनस्य च यथा गदयोरुभङ्गे।

तेजस्विनां समरमूर्द्धनि पाण्डवानां

ज्ञेया जयद्रथवधेऽपि तथा प्रतिज्ञा॥

इत्येवमादिभिस्त्रोद्भेदः प्रतिमुखसन्धिरिति। अस्य च पूर्वाङ्गोपक्षिप्तबिन्दुरूपबीजप्रयत्नार्थानुगतानि त्रयोदशाऽङ्गानि भवन्ति।

तान्याह।

विलासः परिसर्पश्च विधूतं शमनर्मणी।

नर्मद्युतिः प्रगयणं निरोधः पर्युपासनम्॥ २९॥

वज्रं पुष्पमुपन्यासो वर्णसंहार इत्यपि।

यथोद्देशं लक्षणमाह।

रत्यर्थेहा विलासः स्याद् दृष्टनष्टानुसर्पणम्।

परिसर्पो विधूतं स्यादरतिस्तच्छमः शमः॥ ३०॥

परिहासवचो नर्म धृतिस्तज्जा द्युतिर्मता।

उत्तरा वाक् प्रगयणं हितरोधो निरोधनम्॥ ३१॥

पर्युपास्तिरनुनयः पुष्पं वाक्यं विशेषवत्।

उपन्यासस्तु सोपायं वज्रं प्रत्यक्षनिष्ठुरम्।

चातुर्वर्ण्योपगमनं वर्णसंहार इष्यते॥ ३२॥

रत्यर्थेहेति। यथा रत्नावल्याम्। सागरिका। *हिअअ पसीद पसीद किं इमिणा आआसमेत्तफलेण दुल्लहजणप्पत्थणाणुबन्धेणेत्युपक्रमे तहावि आलेखगदं तं जणं कदुअ जधा समीहिदं करिस्सं। तहावि तस्स णत्थि अण्णो दंसणोवाउत्ति इत्येते-

---

* हृदय प्रसीद प्रसीद किमनेन आयासमात्रफलेन दुर्लभजनप्रार्थनानुबन्धेन। तथापि आलेखगतं तं जनं कृत्वा यथा समीहितं करिष्यामि। तथापि तस्य नास्त्यन्यो दर्शनोपाय इति।

वत्सराजसमागमरतिं चित्रादिजन्यामप्युद्दिश्य सागरिकाया-श्चेष्टाप्रयत्नोऽनुरागबीजानुगतो विलास इति।

अथ परिसर्पः। दृष्टेति। यथा वेणीसंहारे। कञ्चुकी। योऽय-मुद्यतेषु बलवत्सु अथवा किं बलवत्सु वासुदेवसहायेषु अरिषु अद्याऽप्यन्तःपुरसुखमनुभवति। इदमपरमयथायथं स्वामिनः।

आशस्त्रग्रहणादकुण्ठपरशोस्तस्याऽपि जेता मुनेस्
तापायाऽस्य न पाण्डुसूनुभिरयं भीष्मः शरैः शायितः।
प्रौढानेकधनुर्धरारिविजयश्रान्तस्य चैकाकिनो
बालस्याऽयमरातिलूनधनुषः प्रीतोऽभिमन्योर्वधात्॥

इत्यनेन भीष्मादिवधे दृष्टस्याऽभिमन्युवधान् नष्टस्य बलवतां पा-ण्डवानां वासुदेवसहायानां सङ्ग्रामलक्षणबिन्दुबीजप्रयत्नान्वयेन कञ्चुकिमुखेन बीजानुसर्पणं परिसर्प इति। यथा च रत्नावल्यां सा-रिकावचनचित्रदर्शनाभ्यां सागरिकानुरागबीजस्य दृष्टनष्टस्य क्वाऽसौ क्वाऽसावित्यादिना वत्सराजेनाऽनुसरणात् परिसर्प इति।

अथ विधूतम्। विधूतमिति। यथा रत्नावल्याम्। साग-रिका। *सहि अहिअं मे संतावो वाधेदि। सुसङ्गता। दीर्घिकातो नलिनीदलानि मृणालिकाश्चानीयाऽस्या अङ्गे ददाति। सागरिका। तानि क्षिपन्ती। †सहि अवणेहि एदाइं किं अआरणे अत्ताणं आयासेसि णं भणामि।

* सखि अधिकं मे सन्तापो बाधते।

† सखि अपनयैतानि कथमकारणमात्मानमायासयसि, ननु भणामि।

*दुल्लहजणाणुराओ लज्जा गरुई परव्वसो अप्पा।
पिअसहि विसमं पेम्मं मरणं सरणं णवर एक्कं॥

इत्यनेन सागरिकाया बीजान्वयेन शीतोपचारविधूननाद् विधूतम्। यथा च वेणीसंहारे भानुमत्या दुःस्वप्नदर्शनेन दुर्योधनस्याऽनिष्टशङ्कया पाण्डवविजयशङ्कया वा रतेर्विधूननमिति।

अथ शमः। तच्छम इति। तस्या अरतेरुपशमः शमः। यथा रत्नावल्याम्। राजा। वयस्याऽनया लिखितोऽहमिति यत् सत्यमात्मन्यपि मे बहुमानस्तत् कथं न पश्यामीति प्रक्रमे। सागरिका। आत्मगतम्। †हिअअ समस्सस मणोरहो वि दे एत्तिअं भूमिं ण गदो इति किञ्चिदरत्युपशमात् शम इति।

अथ नर्म। परिहासवच इति। यथा रत्नावल्याम्। सुसङ्गता। ‡सहि जस्स कए तुमं आअदा सो अअं पुरदो चिट्ठदि। सागरिका। साभ्यसूयम्। सुसङ्गदे कस्स कए अहं आअदा। सुसङ्गता। अइ अप्पसङ्किदे णं चित्तफलअस्स ता गेण्ह एदमित्यनेन बीजान्वितं परिहासवचनं नर्म। यथा च वेणीसंहारे। दुर्योधनः। चेटीहस्तादर्घपात्रमादाय देव्याः समर्पयति। पुनर्भानु-

---

* दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा।
प्रियसखि विषमं प्रेम मरणं शरणं केवलमेकं।

† हृदय समाश्वसिहि, मनोरथोऽपि त एतावतीं भूमिं न गत इति।

‡ सखि यस्य कृते त्वमागता सोऽयं पुरतस्तिष्ठति। सागरिका साभ्यसूयं सुसङ्गते कस्य कृतेऽहमागता? अयि आत्मशङ्किते ननु चित्रफलकस्य तद्गृहाणैतदिति।

मती। अर्घं दत्वा। *हञ्जा उवणेहि मे कुसुमाइं जाव अवराणं पि देवाणं सवरिअं णिवत्तेमि हस्तौ प्रसारयति। दुर्योधनः। पुष्पाण्युपनयति। भानुमत्यास्तत्स्पर्शजातकम्पाया हस्तात् पुष्पाणि पतन्तीत्यनेन नर्मणा दुःस्वप्नदर्शनोपशमार्थं देवतापूजाविघ्नकारिणा बीजोद्घाटनात् परिहासस्य प्रतिमुखाङ्गत्वं युक्तमिति।

अथ नर्मद्युतिः। द्युतिरिति। यथा रत्नावल्याम्। सुसङ्गता। †सहि अदिणिट्ठुरा दाणिं सि तुमं जा एवं पि भट्टिणा हत्थावलंविदा कोवं ण मुञ्चसि। सागरिका। सभ्रूभङ्गमीषद्विहस्य। सुसङ्गदे दाणिं पि ण विरमसीत्यनेनाऽनुरागबीजोद्घाटनान्वयेन द्युतिर्नर्मजा द्युतिरिति दर्शितमिति।

अथ प्रगयणम्। उत्तरेति। यथा रत्नावल्याम्। विदूषकः। ‡भो वअस्स दिट्ठिआ वड्ढसे। राजा। सकौतुकम्। वयस्य किमेतत्। विदूषकः। §भो एदं क्खु तं जं मए भणिदं तुमं एव्व आलिहिदो को अस्सो कुसुमाउहव्ववदेसेण णिह्णवीअदीत्यादिना।

---

* हञ्जा उपनय मे कुसुमानि यावदपरेषामपि देवानां सपर्यां निवर्तयामि।

† सखि अतिनिष्ठुरासीदानीं त्वं या एवमपि भर्त्रा हस्तावलम्बिता कोपं न मुञ्चसि। सागरिका। सभ्रूभङ्गमीषद्विहस्य सुसङ्गते इदानीमपि न विरमसि।

‡ भो वयस्य दिष्ट्या वर्धसे।

§ भो एतत् खलु तत् यन्मया भणितं त्वमेव आलिखितः। कोऽन्यः कुसुमायुधव्यपदेशेन निह्नूयते।

परिच्युतस्तत्कुचकुम्भमध्यात्
किं शोषमायासि मृणालहार।
न सूक्ष्मतन्तोरपि तावकस्य
तत्रावकाशो भवतः किमु स्यात्॥

इत्यनेन राजविदूषकसागरिकासुसङ्गतानामन्योन्यवचनेनोत्तरोत्तरानुरागबीजोद्घाटनात् प्रगयणमिति।

अथ निरोधः। हितरोध इति। यथा रत्नावल्याम्। राजा। धिङ्मूर्ख।

प्राप्ता कथमपि दैवात् कण्ठमनीतैव सा प्रकटरागा।
रत्नावलीव कान्ता मम हस्ताद् भ्रंशिता भवता॥

इत्यनेन वत्सराजस्य सागरिकासमागमरूपहितस्य वासवदत्ताप्रवेशसूचकेन विदूषकवचसा निरोधात् निरोधनमिति।

अथ पर्युपासनम्। पर्युपास्तिरिति। यथा रत्नावल्याम्। राजा।

प्रसीदेति ब्रूयामिदमसति कोपे न घटते
करिष्याम्येवं नो पुनरिति भवेदभ्युपगमः।
न मे दोषोऽस्तीति त्वमिदमपि हि ज्ञास्यसि मृषा
किमेतस्मिन् वक्तुं क्षममिति न वेद्मि प्रियतमे॥

इत्यनेन चित्रगतयोर्नायकयोर्दर्शनात् कुपिताया वासवदत्ताया अनुनयनं नायकयोरनुरागोद्घाटान्वयेन पर्युपासनमिति।

अथ पुष्पम्। पुष्पमिति। यथा रत्नावल्याम्। राजा। सागरिकां हस्ते गृहीत्वा स्पर्शं नाटयति। विदूषकः। *भो एसा अपुव्वा सिरी तए समासादिदा। राजा। वयस्य सत्यम्।

* भो एषा अपूर्वा श्रीः त्वया समासादिता।

श्रीरेषा पाणिरप्यस्याः पारिजातस्य पल्लवः।
कुतोऽन्यथा स्रवत्येष स्वेदच्छद्मामृतद्रवः॥

इत्यनेन नायकयोः साक्षादन्योन्यदर्शनादिना सविशेषानुरागोद्घाटनात् पुष्पम्।

अथोपन्यासः। उपन्यास इति। यथा रत्नावल्याम्। सुसङ्गता। *भट्टा अलं सङ्काए मएवि भट्टिणो पसाएण कीलिदं एव्व ता किं कण्णाभरणकेण अदोवि मे गरुओ पसाओ जं कीस तए अहं एत्थ आलिहिअ त्ति कुविआ मे पिअसही साअरिआ ता पसादीअदु इत्यनेन सुसङ्गतावचसा सागरिका मया लिखिता सागरिकया च त्वमिति सूचयता प्रसादोपन्यासेन बीजोद्भेदादुपन्यास इति।

अथ वज्रम्। वज्रमिति। यथा रत्नावल्याम्। वासवदत्ता। फलकं निर्दिश्य। †अज्जउत्त एसावि जा तुह समीवे एदं किं वसन्तअस्स विण्णाणं। पुनः अज्जउत्त ममावि एदं चित्तकम्म पेक्खन्तीए सीसवेअणा समुप्पणा इत्यनेन वासवदत्तया वत्सराजस्य सागरिकानुरागोद्भेदनात् प्रत्यक्षनिष्ठुराभिधानं वज्रमिति।

अथ वर्णसंहारः। चातुर्वर्ण्येति। यथा वीरचरिते तृतीयेऽङ्के।

---

* भर्तः अलं शङ्कया मयापि भर्तुः प्रसादेन क्रीडितमेव तत् किं कर्णाभरणेन। असावपि मे गुरुः प्रसादः यत् कथं त्वयाहमत्रालिखितेति कुपिता मे प्रियसखी सागरिका तत् प्रसाद्यतां।

† आर्य्यपुत्र एषापि या तव समीपे। एतत् किं वसन्तकस्य विज्ञानं। आर्यपुत्र ममापि एतत् चित्रकर्म पश्यन्त्याः शीर्षवेदना समुत्पन्ना।

परिषदियमृषीणामेष वृद्धो युधाजित्
सह नृपतिरमात्यैर्लोमपादश्च वृद्धः।
अयमविरतयज्ञो ब्रह्मवादी पुराणः
प्रभुरपि जनकानामद्रुहो याचकस्ते॥

इत्यनेन ऋषिक्षत्रियामात्यादीनां सङ्गतानां वर्णानां वचसा रामविजयाशंसिनः परशुरामदुर्णयस्याऽद्रोहयाच्ञाद्वारेणोद्भेदनाद् वर्णसंहार इति।

एतानि च त्रयोदश प्रतिमुखाङ्गानि मुखसन्ध्युपक्षिप्तबिन्दुलक्षणावान्तरबीजमहाबीजप्रयत्नानुगतानि विधेयानि। एतेषां च मध्ये परिसर्पप्रशमवज्रोपन्यासपुष्पाणां प्राधान्यम्। इतरेषां यथासम्भवं प्रयोग इति।

अथ गर्भसन्धिमाह।

गर्भस्तु दृष्टनष्टस्य बीजस्याऽन्वेषणं मुहुः।
द्वादशाङ्गः पताका स्यान् न वा स्यात् प्राप्तिसम्भवः॥३३॥

प्रतिमुखसन्धौ लक्ष्यालक्ष्यरूपतया स्तोकोद्भिन्नस्य बीजस्य सविशेषोद्भेदपूर्वकः सान्तरायो लाभः पुनर्विच्छेदः पुनः प्राप्तिः पुनर्विच्छेदः पुनश्च तस्यैवाऽन्वेषणं वारंवारं सोऽनिर्धारितैकान्तफलप्राप्त्याशात्मको गर्भसन्धिरिति। तत्र चौत्सर्गिकत्वेन प्राप्तायाः पताकायाः अनियमं दर्शयति। पताका स्यान् नवेत्यनेन। प्राप्तिसम्भवस्तु स्यादेवेति दर्शयति। स्यादिति। यथा रत्नावल्यां तृतीयेऽङ्के वत्सराजस्य वासवदत्तालक्षणापायेन तद्वेषपरिग्रहसागरिकाभिसरणोपायेन च विदूषकवचसा सा-

गरिकाप्राप्त्याशा प्रथमं पुनर्वासवदत्तयाविच्छेदः पुनः प्राप्तिः पुनर्विच्छेदः पुनरपायनिवारणोपायान्वेषणं नाऽस्ति देवीप्रसादनं मुक्ताऽन्य उपाय इत्यनेन दर्शितमिति। स च द्वादशाङ्गो भवति।

तान्युद्दिशति।

अभूताहरणं मार्गो रूपोदाहरणे क्रमः।
सङ्ग्रहश्चाऽनुमानं च तोटकाधिबले तथा॥ ३४॥
उद्वेगसम्भ्रमाक्षेपा लक्षणं च प्रणीयते।

इति। यथोद्देशं लक्षणमाह।

अभूताहरणं छद्म

इति। यथा रत्नावल्याम्। *साधु रे अमच्च वसन्तअ साधु। अदिसइदो तए अमच्चो जोगन्धराअणो इमाए सन्धिविग्गहचिन्ताए इत्यादिना प्रवेशकेन गृहीतवासवदत्तावेषायाः सागरिकाया वत्सराजाभिसरणं छद्म विदूषकसुसङ्गताकृतकाञ्चनमालानुवादद्वारेण दर्शितमित्यभूताहरणम्।

अथ मार्गः।

मार्गस्तत्त्वार्थकीर्तनम्॥ ३५॥

इति। यथा रत्नावल्याम्। विदूषकः। †दिट्ठिआ वड्ढसि समीहिदब्भधिकाए कज्जसिद्धीए। राजा। वयस्य कुशलं प्रि-

---

* साधु रे अमात्य वसन्तक साधु। अतिशयितस्त्वयामात्यो यौगन्धरायणोऽनया सन्धिविग्रहचिन्तया।

† दिष्ट्या वर्धसे समीहिताभ्यधिकया कार्यसिद्ध्या।

याया:। विदूषकः। *अदूरेण सअं ज्जेव्व पेक्खिअ जाणिस्सिसि। राजा। दर्शनमपि भविष्यति। विदूषकः। सगर्वम्। †कीस ण भविस्सदि जस्स दे उवहसिदविहप्फदिबुद्धिविहवो अहं अमच्चो। राजा। तथापि कथमिति श्रोतुमिच्छामि। विदूषकः। कर्णे कथयत्येवमित्यनेन यथा विदूषकेण सागरिका-समागमः सूचितः तथैव निश्चितरूपो राज्ञे निवेदित इति तत्त्वार्थकथनात् मार्ग इति।

अथ रूपम्।

रूपं वितर्कवद् वाक्यं

इति। यथा रत्नावल्याम्। राजा। अहो किमपि कामिजनस्य स्वगृहिणीसमागमपरिभाविनोऽभिनवं जनं प्रति पक्षपातः। तथाहि।

प्रणयविशदां दृष्टिं वक्त्रे ददाति न शङ्किता
घटयति घनं कण्ठाश्लेषे रसान् न पयोधरौ।
वदति बहुशो गच्छामीति प्रयत्नधृताऽप्यहो
रमयतितरां सङ्केतस्था तथापि हि कामिनी॥

कथं चिरयति वसन्तकः। किन्नु खलु विदितः स्यादयं वृत्तान्तो देव्या इत्यनेन रत्नावलीसमागमप्राप्त्याशानुगुण्येनैव देवीशङ्कायाश्च वितर्काद् रूपमिति।

---

* अचिरेण स्वयमेव प्रेक्ष्य ज्ञास्यसि।

† कथं न भविष्यति यस्य ते उपहसितबृहस्पतिबुद्धिविभवोऽहममात्यः।

अथोदाहरणम्।

सोत्कर्षं स्यादुदाहृतिः।

इति। यथा रत्नावल्याम्। विदूषकः। सहर्षम्। ही ही *भो कोसंवीरज्जलाहेणावि ण तादिसो वअस्सस्स परितोसो आसि यादिसो मम सआसादो पिअवअणं सुणिअ भविस्सदि त्ति तक्केमीत्यनेन रत्नावलीप्राप्तिवार्ताऽपि कोशाम्बीराज्यलाभादतिरिच्यत इत्युत्कर्षाभिधानादुदाहृतिरिति।

अथ क्रमः।

क्रमः सञ्चिन्त्यमानाप्तिर्

इति। यथा रत्नावल्याम्। राजा। उपनतप्रियासमागमोत्सवस्याऽपि मे किमिदमत्यर्थमुत्ताम्यति चेतः। अथवा।

तीव्रः स्मरसन्तापो न तथाऽऽदौ बाधते यथाऽऽसन्ने।
तपति प्रावृषि सुतरामभ्यर्णजलागमो दिवसः॥

इति। विदूषकः। आकर्ण्य। †भोदि सागरिए एसो पिअवअस्सो तुमं ज्जेव उद्दिसिअ उक्कण्ठाणिब्भरं मन्तेदि ता णिवेदेमि से तुहागमणमित्यनेन वत्सराजस्य सागरिकासमागममभिलषत एव भ्रान्तसागरिकाप्राप्तिरिति क्रमः।

अथ क्रमान्तरं मतभेदेन।

---

* भोः कौशाम्बीराज्यलाभेनापि न तादृशो वयस्यस्य परितोष आसीद्यादृशो मम सकाशात् प्रियवचनं श्रुत्वा भविष्यतीति तर्कयामि।

† भवति सागरिके एष प्रियवयस्यः त्वामेवोद्दिश्य उत्कण्ठानिर्भरं मन्त्रयति तन्निवेदयामि तस्मै तवागमनं।

भावज्ञानमथाऽपरे ॥ ३६ ॥

इति। यथा रत्नावल्याम्। राजा। उपसृत्य। प्रिये सागरिके।

शीतांशुर्मुखमुत्पले तव दृशौ पद्मानुकारौ करौ
रम्भागर्भनिभं तवोरुयुगलं बाहू मृणालोपमौ।
इत्याह्लादकराखिलाङ्गि रभसान् निःशङ्कमालिङ्ग्य माम्
अङ्गानि त्वमनङ्गतापविधुराण्येह्येहि निर्वापय॥

इत्यादिना इह तदप्यस्त्येव बिम्बाधर इत्यन्तेन वासवदत्तया वत्सराजभावस्य ज्ञातत्वात् क्रमान्तरमिति।

अथ सङ्ग्रहः।

सङ्ग्रहः सामदानोक्तिर्

इति। यथा रत्नावल्याम्। साधु वयस्य साधु इदं ते पारितोषिकं कटकं ददामीत्याभ्यां सामदानाभ्यां विदूषकस्य सागरिकासमागमकारिणः सङ्ग्रहात् सङ्ग्रह इति।

अथाऽनुमानम्।

अभ्यूहो लिङ्गतोऽनुमा।

यथा रत्नावल्याम्। राजा। धिङ् मूर्ख त्वत्कृत एवाऽयमापतितोऽस्माकमनर्थः। कुतः।

समारूढा प्रीतिः प्रणयबहुमानात् प्रतिदिनं
व्यलीकं वीक्ष्येदं कृतमकृतपूर्वं खलु मया।
प्रिया मुञ्चत्यद्य स्फुटमसहना जीवितमसौ
प्रकृष्टस्य प्रेम्णः स्खलितमविषह्यं हि भवति॥

विदूषकः। *भो वअस्स वासवदत्ता किं करइस्सदि त्ति ण जाणामि। सागरिआ उण दुक्करं जीविस्सदि त्ति तक्केमी-त्यत्र प्रकृष्टप्रेमस्खलनेन सागरिकानुरागजन्येन वासवदत्ताया मरणाभ्यूहनमनुमानमिति।

अथाऽधिबलम्।

अधिबलमभिसन्धिः

इति। यथा रत्नावल्याम्। काञ्चनमाला। †भट्टिणि इअं सा चित्तसालिआ ता वसन्तअस्स सण्णं करेमि छोटिकां ददाति इत्यादिना वासवदत्ताकाञ्चनमालाभ्यां सागरिकासुसङ्गता-वेषाभ्यां राजविदूषकयोरभिसन्धीयमानत्वादधिबलमिति।

अथ तोटकम्।

संरब्धं तोटकं वचः ॥ ३७ ॥

इति। यथा रत्नावल्याम्। वासवदत्ता। उपसृत्य। ‡अज्ज-उत्त जुत्तमिणं सरिसमिणं। पुनः सरोषम्। §अज्जउत्त उट्ठेहि किं अज्जवि आहिजाईए सेवादुःखमणुभवीअदि कञ्च-णमाले एदेण ज्जेव पासेण बन्धिअ आणेहि एणं दुट्ठबम्हणम्। एदं पि दुट्ठकण्णअं अग्गदो करेहि इत्यनेन वासवदत्ता

---

* भोः वयस्य वासवदत्ता किं करिष्यतीति न जानामि। सागरिका पुनर्दुष्करं जीविष्यतीति तर्कयामि।

† हे भर्तृदारिके इयं सा चित्रशालिका तत् वसन्तकस्य संज्ञां करोमि।

‡ आर्यपुत्र युक्तमिदं सदृशमिदं।

§ आर्यपुत्रोत्तिष्ठ किमद्यापि आभिजात्याः सेवादुःखमनुभूयते। काञ्चनमाले एतेनैव पाशेन बद्धानयैनं दुष्टब्राह्मणं। एतामपि दुष्ट-कन्यकामग्रतः कुरु।

संरब्धवचसा सागरिकासमागमान्तरायभूतेनाऽनियतप्राप्तिकारणं तोटकमुक्तम्। यथा च वेणीसंहारे।

प्रयत्नपरिबोधितः स्तुतिभिरद्य शेषे निशाम्।

इत्यादिना।

धृतायुधो यावदहं तावदन्यैः किमायुधैः।

इत्यन्तेनाऽन्योन्यं कर्णाश्वत्थाम्नोः संरब्धवचसा सेनाभेदकारिणा पाण्डवविजयप्राप्त्याशान्वितं तोटकमिति। ग्रन्थान्तरे तु।

तोटकस्याऽन्यथाभावं ब्रुवतेऽधिवलं बुधाः।

यथा रत्नावल्याम्। राजा। देवि एवमपि प्रत्यक्षदृष्टव्यलीकः किं विज्ञापयामि।

आताम्रतामपनयामि विलक्ष एव
लाक्षाकृतां चरणयोस्तव देवि मूर्ध्ना।
कोपोपरागजनितां तु मुखेन्दुबिम्बे
हर्तुं क्षमो यदि परं करुणा मयि स्यात्॥

संरब्धवचनं यत् तु तोटकं तदुदाहृतम्।

यथा रत्नावल्याम्। राजा। प्रिये वासवदत्ते प्रसीद प्रसीद। वासवदत्ता। अश्रूणि धारयन्ती। *अज्जउत्त मा एवं भण अण्णसङ्कन्ताइं खु एदाइं अक्खराइं त्ति। यथा च वेणीसंहारे। राजा। अये सुन्दरक कच्चित् कुशलमङ्गराजस्य। पुरुषः। †कुसलं सरीरमेत्तकेण। राजा। किं तस्य किरीटिना हता

* आर्य्यपुत्र मैवं भण अन्यसंक्रान्तानि खलु एतान्यक्षराणीति।
† कुशलं शरीरमात्रकेण।

धौरेयाः। सूतः सारथिः। भग्नो वा रथः। पुरुषः। *देव ण भग्गो रहो भग्गो से मणोरहो। राजा। ससम्भ्रमम्। कथमित्येवमादिना संरब्धवचसा तोटकमिति।

अथोद्वेगः।

उद्वेगोऽरिकृता भीतिः

यथा रत्नावल्याम्। सागरिका। आत्मगतम्। †कहं अ-किदपुस्सेहिं अत्तणो इच्छाए मरिउं पि ण पारीअदि। इत्यनेन वासवदत्तातः सागरिकाया भयमित्युद्वेगः। यो हि यस्याऽप-कारी स तस्याऽरिः। यथा च वेणीसंहारे। सूतः। श्रुत्वा सभयम्। कथमासन्न एवाऽसौ कौरवराजपुत्रमहावनोत्पात-मारुतो मारुतिरनुपलब्धसन्नश्च महाराजः। भवतु दूरमप-हरामि स्यन्दनम्। कदाचिदयमनार्यो दुःशासन इवाऽस्मि-न्नप्यनार्यमाचरिष्यतीति अरिकृता भीतिरुद्वेगः।

अथ सम्भ्रमः।

शङ्कात्रासौ च सम्भ्रमः।

यथा रत्नावल्याम्। विदूषकः। पश्यन्। ‡का उण एसा। ससम्भ्रमम्। कधं देवी वासवदत्ता अत्ताणं वावादेदि। राजा। ससम्भ्रममुपसर्पन्। काऽसौ काऽसावित्यनेन वासव-दत्ताबुद्धिगृहीतायाः सागरिकाया मरणाशङ्कया सम्भ्रम

---

* देव न भग्नो रथः, भग्नोऽस्य मनोरथः।

† कथमकृतपुण्यैरात्मन इच्छया मर्तुमपि न शक्यते।

‡ का पुनरेषा। कथं देवी वासवदत्तात्मानं व्यापादयति।

इति। यथा च वेणीसंहारे। नेपथ्ये कलकलः। अश्वत्थामा। ससम्भ्रमम्। मातुल मातुल कष्टं एष भ्रातुः प्रतिज्ञाभङ्गभीरुः किरीटी समं शरवर्षैर्दुर्योधनराधेयावभिद्रवति। सर्वथा पीतं शोणितं दुःशासनस्य भीमेनेत्याशङ्का। तथा प्रविश्य सम्भ्रान्तः सप्रहारः सूतः। त्रायतां त्रायतां कुमार इति त्रासः। इत्येताभ्यां त्रासशङ्काभ्यां दुःशासनद्रोणवधसूचकाभ्यां पाण्डवविजयप्राप्त्याशान्वितः सम्भ्रम इति।

अथाऽऽक्षेपः।

गर्भबीजसमुद्भेदादाक्षेपः परिकीर्तितः॥ ३८॥

यथा रत्नावल्याम्। राजा। वयस्य देवीप्रसादनं मुक्त्वा नाऽन्यमत्रोपायं पश्यामि। पुनः क्रमान्तरे सर्वथा देवीप्रसादनं प्रति निष्प्रत्याशीभूताः स्मः। पुनस्तत् किमिह स्थितेन देवीमेव गत्वा प्रसादयामीत्यनेन देवीप्रसादायत्ता सागरिकासमागमसिद्धिरिति गर्भबीजोद्भेदादाक्षेपः। यथा च वेणीसंहारे। सुन्दरकः। *अहवा किमेत्थ देव्वं उआलहामि तस्स क्खु एदं णिब्भच्छिदविदुरवअणबीअस्स परिभूदपिदामहहिदोवदेसङ्कुरस्स सउणिप्पोच्छाहणारूढमूलस्स कूडविससाहिणो पञ्चालीकेसग्गहणकुसुमस्स फलं परिणमेदि।

* अथवा किमत्र दैवमुपालभामि तस्य खल्वेतत् निर्भर्त्सितविदुरवचनबीजस्य परिभूतपितामहहितोपदेशाङ्कुरस्य शकुनिप्रोत्साहनारूढमूलस्य कूटविषशाखिनो पाञ्चालीकेशग्रहणकुसुमस्य फलं परिणमति।

इत्यनेन बीजमेव फलोन्मुखतयाऽऽक्षिप्यत इत्याक्षेपः ।

एतानि द्वादश गर्भाङ्गानि प्राप्त्याशाप्रदर्शकत्वेनोपनिबन्धनीयान्येषां च मध्ये अभूताहरणमार्गतोटकाधिबलाक्षेपाणां प्राधान्यम्। इतरेषां यथासम्भवं प्रयोग इति साङ्गो गर्भसन्धिरुक्तः।

अथाऽवमर्शः ।

क्रोधेनाऽवमृशेद् यत्र व्यसनाद् वा विलोभनात्।
गर्भनिर्भिन्नबीजार्थः सोऽवमर्शोऽङ्गसङ्ग्रहः ॥ ३९ ॥

अवमर्शनमवमर्शः पर्यालोचनम्। तच्च च क्रोधेन वा व्यसनाद् वा विलोभनेन वा भवितव्यमनेनाऽर्थेनेत्यवधारितैकान्तफलप्राप्त्यवसायात्मा गर्भसन्ध्युद्भिन्नबीजार्थसम्बन्धो विमर्शोऽवमर्शः। यथा रत्नावल्यां चतुर्थेऽङ्के। अग्निविद्रवपर्यन्तो वासवदत्ताप्रसत्त्या निरपायरत्नावलीप्राप्त्यवसायात्मा विमर्शो दर्शितः। यथा च वेणीसंहारे। दुर्योधनरुधिराक्तभीमसेनागमपर्यन्तः।

तीर्णे भीष्ममहोदधौ कथमपि द्रोणानले निर्वृते
कर्णाशीविषभोगिनि प्रशमिते शल्येऽपि याते दिवम्।
भीमेन प्रियसाहसेन रभसादल्पावशेषे जये
सर्वे जीवितसंशयं वयममी वाचा समारोपिताः॥

इत्यत्र स्वल्पावशेषे जय इत्यादिभिर्विजयप्रत्यर्थिसमस्तभीष्मादिमहारथवधादवधारितैकान्तविजयावमर्शनादवमर्शनं दर्शितमित्यवमर्शसन्धिः ।

तस्याऽङ्गसङ्ख्यमाह।

तत्राऽपवादसम्फेटौ विद्रवद्रवशक्तयः।
द्युतिः प्रसङ्गश्छलनं व्यवसायो विरोधनम्।
प्ररोचना विचलनमादानं च त्रयोदश ॥४०॥

यथोद्देशं लक्षणमाह।

दोषप्रख्याऽपवादः स्यात्

यथा रत्नावल्याम्। सुसङ्गता। *सा खु तवस्सिणी भट्टिणीए उज्जइणिं णीअदित्ति पवादं करिअ उवत्थिदे अद्धरत्ते ण आणीअदि कहिंपि णीदेत्ति। विदूषकः। सोद्वेगम्। †अदिणिग्घिणं क्खु कधं देवीए। पुनः। भो वअस्स मा खु अस्सधा सम्भावेहि। सा खु देवीए उज्जइणीए पेसिदा। अदो अप्पिअंत्ति कहिदं। राजा। अहो निरनुरोधा मयि देवीत्यनेन वासवदत्तादोषप्रख्यापनादपवादः। यथा च वेणीसंहारे। युधिष्ठिरः। पाञ्चालक कच्चिदासादिता तस्य दुरात्मनः कौरवापसदस्य पदवी। पाञ्चालकः। न केवलं पदवी स एव दुरात्मा देवीकेशपाशस्पर्शपातकप्रधानहेतुरुपलब्ध इति दुर्योधनस्य दोषप्रख्यापनादपवाद इति।

---

* सा खलु तपस्विनी भट्टारिकया उज्जयिनीं नीयत इति प्रवादं कृत्वा उपस्थितेऽर्धरात्रे नानीयते कुत्रापि नीतेति।

† अतिनिर्घृणं खलु कथं देव्या। भो वयस्य मा खलु अन्यथा सम्भावय। सा खलु देव्या उज्जयिन्यां प्रेषिता। अतोऽप्रियमिति कथितं।

अथ सम्फेटः।

सम्फेटो रोषभाषणम्।

इति। यथा वेणीसंहारे। भो कौरवराज कृतं बन्धुनाशदर्शनमन्युना मैवं विषादं कृथाः। पर्याप्ताः पाण्डवाः समरायाहमसहाय इति।

पञ्चानां मन्यसेऽस्माकं यं सुयोधं सुयोधन।
दंशितस्यात्तशस्त्रस्य तेन तेऽस्तु रणोत्सवः॥

इत्थं श्रुत्वाऽसूयात्मिकां निक्षिप्य कुमारयोर्दृष्टिमुक्तवान् धार्तराष्ट्रः।

कर्णदुःशासनवधात् तुल्यावेव युवां मम।
अप्रियोऽपि प्रियो योद्धुं त्वमेव प्रियसाहसः॥

इत्युत्थाय च परस्परक्रोधाधिक्षेपपरुषवाक्कलहप्रस्तावितघोरसङ्ग्रामावित्यनेन भीमदुर्योधनयोरन्योन्यरोषसम्भाषणाद् विजयबीजान्वयेन सम्फेट इति।

अथ विद्रवः।

विद्रवो वधबन्धादिः

यथा छलितरामे।

येनाऽऽवृत्य मुखानि सामपठतामत्यन्तमायासितं
बाल्ये येन हृताक्षसूत्रवलयप्रत्यर्पणैः क्रीडितम्।
युष्माकं हृदयं स एष विशिखैरापूरितांसस्थलो।
मूर्च्छाघोरतमःप्रवेशविवशो बध्वा लवो नीयते॥

यथा च रत्नावल्याम्।

हर्म्याणां हेमशृङ्गश्रियमिव शिखरैरर्चिषामादधानः
सान्द्रोद्यानद्रुमाग्रग्लपनपिशुनितात्यन्ततीव्राभितापः।
कुर्वन् क्रीडामहीध्रं सजलजलधरश्यामलं धूमपातैर्
एष प्लोषार्तयोषिज्जन इह सहसैवोत्थितोऽन्तःपुरेऽग्निः॥

इत्यादि। पुनर्वासवदत्ता। *अज्जउत्त ण क्खु अहं अत्तणो कारणादो भणामि। एसा मए णिग्घिणहिअआए सञ्जदा सागरिआ विवज्जदि इत्यनेन सागरिकावधबन्धाग्निभिर्विद्रव इति।

अथ द्रवः।

द्रवो गुरुतिरस्कृतिः॥ ४१॥

इति। यथोत्तरचरिते।

वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु हुं वर्तते
सुन्दस्त्रीदमनेऽप्यखण्डयशसो लोके महान्तो हि ते।
यानि त्रीण्यकुतोमुखान्यपि पदान्यासन् खरायोधने
यद् वा कौशलमिन्द्रसूनुदमने तत्राऽप्यभिज्ञो जनः॥

इत्यनेन लवो रामस्य गुरोस्तिरस्कारं कृतवानिति द्रवः। यथा च वेणीसंहारे। युधिष्ठिरः। भगवन् कृष्णाग्रज सुभद्राभ्रातः।

ज्ञातिप्रीतिर्मनसि न कृता क्षत्रियाणां न धर्मो
रूढं सख्यं तदपि गणितं नाऽनुजस्याऽर्जुनेन।
तुल्यः कामं भवतु भवतः शिष्ययोः स्नेहबन्धः
कोऽयं पन्था यदसि विगुणो मन्दभाग्ये मयीत्थम्॥

---

* आर्य्यपुत्र न खलु अहमात्मनः कारणाद् भणामि। एषा मया निर्घृणहृदयया संयता सागरिका विपद्यते।

इत्यादिना बलभद्रं गुरुं युधिष्ठिरस्तिरस्कृतवानिति द्रवः।

अथ शक्तिः।

विरोधशमनं शक्तिस्

इति। यथा रत्नावल्याम्। राजा।

सव्याजैः शपथैः प्रियेण वचसा चित्तानुवृत्त्याऽधिकं
वैलक्ष्येण परेण पादपतनैर्वाक्यैः सखीनां मुहुः।
प्रत्यापत्तिमुपागता न हि तथा देवी रुदन्त्या यथा
प्रक्षाल्येव तयैव बाष्पसलिलैः कोपोऽपनीतः स्वयम्॥

इत्यनेन सागरिकालाभविरोधिवासवदत्ताकोपोपशमनात् शक्तिः। यथा चोत्तरचरिते। लवः प्राह।

विरोधो विश्रान्तः प्रसरति रसो निर्वृतिघनस्
तदौद्धत्यं क्वाऽपि व्रजति विनयः प्रह्वयति माम्।
झटित्यस्मिन् दृष्टे किमपि परवानस्मि यदि वा
महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः॥

अथ द्युतिः।

तर्जनोद्वेजने द्युतिः।

यथा वेणीसंहारे। एतच्च वचनमुपश्रुत्य रामानुजस्य सकलनिकुञ्जपूरिताशातिरिक्तमुद्भ्रान्तसलिलचरशतसङ्कुलं त्रासोद्वृत्तनक्रग्राहमालोड्य सरः सलिलं भैरवं च गर्जित्वा कुमारवृकोदरेणाऽभिहितम्।

जन्मेन्दोरमले कुले व्यपदिशस्यद्याऽपि धत्से गदां
मां दुःशासनकोष्णशोणितसुराक्षीबं रिपुं भाषसे।

दर्पान्धो मधुकैटभद्विषि हरावप्युद्धतं चेष्टसे
मत्त्रासान् नृपशो विहाय समरं पङ्केऽधुना लीयसे॥

इत्यादिना त्यक्तोत्थितः सरभसमित्यनेन दुर्वचनजलावलोडनाभ्यां दुर्योधनतर्जनोद्वेजनकारिभ्यां पाण्डवविजयानुकूलदुर्योधनोत्थापनहेतुभ्यां भीमस्य द्युतिरुक्ता।

अथ प्रसङ्गः।

गुरुकीर्तनं प्रसङ्गम्

इति। यथा रत्नावल्याम्। देव याऽसौ सिंहलेश्वरेण स्वदुहिता रत्नावली नामाऽऽयुष्मती वासवदत्तां दग्धामुपश्रुत्य देवाय पूर्वप्रार्थिता सती प्रतिदत्तेत्यनेन रत्नावल्या लाभानुकूलाभिजनप्रकाशिना प्रसङ्गाद् गुरुकीर्तनेन प्रसङ्गः। तथा मृच्छकटिकायाम्। चाण्डालकः। *एस सागलदत्तस्स सुओ अज्जविणअदत्तस्स णत्तू चालुदत्तो वावादिदुं वज्झट्ठाणं णीअदि। एदेण किल गणिआ वसन्तसेणा सुवणलोभेण वावादिदत्ति।

चारुदत्तः।

मखशतपरिपूतं गोत्रमुद्भासितं यत्
सदसि निबिडचैत्यब्रह्मघोषैः पुरस्तात्।
मम निधनदशायां वर्तमानस्य पापैस्
तदसदृशमनुष्यैर्घुष्यते घोषणायाम्॥

---

* एष सागरदत्तस्य सुत आर्यविनयदत्तस्य नप्ता चारुदत्तो व्यापादयितुं बध्यस्थानं नीयते। एतेन किल गणिका वसन्तसेना सुवर्णलोभेन व्यापादितेति।

इत्यनेन चारुदत्तवधाभ्युदयानुकूलं प्रसङ्गाद् गुरुकीर्तनमिति प्रसङ्गः।

अथ छलनम्।

छलनं चाऽवमाननम्॥ ४२॥

यथा रत्नावल्याम्। राजा। अहो निरनुरोधा मयि देवीत्यनेन वासवदत्तया इष्टासम्पादनाद् वत्सराजस्याऽवमाननाच् छलनम्। यथा च रामाभ्युदये सीतायाः परित्यागेनाऽवमाननाच् छलनमिति।

अथ व्यवसायः।

व्यवसायः स्वशक्त्युक्तिः

यथा रत्नावल्याम्। ऐन्द्रजालिकः।

*किं धरणीए मिअङ्को आआसे महिहरो जले जलणो।

मज्झण्हम्मि पओसो दाविज्जउ देहि आणत्तिं॥

अहवा किं बहुणा जम्पिएण।

मज्झ पइण्णा एसा भणामि हिअएण जं महसि दट्ठुं।

तं ते दावेमि फुडं गुरुणो मन्तप्पहावेण॥

इत्यनेनैन्द्रजालिको मिथ्याग्निसम्भ्रमोत्थापनेन वत्सराजस्य हृदयस्थसागरिकादर्शनानुकूलां स्वशक्तिमाविष्कृतवान्। यथा च वेणीसंहारे।

---

* किं धरण्यां मृगाङ्कः, आकाशे महीधरो, जले ज्वलनः।
मध्याह्ने प्रदोषो दर्श्यतां देहि आज्ञप्तिं॥
अथवा किं बहुना जल्पितेन।
मम प्रतिज्ञैषा भणामि हृदयेन यद् वाञ्छसि द्रष्टुं।
तत्ते दर्शयामि स्फुटं गुरोर्मन्त्रप्रभावेण॥

नूनं तेनाऽद्य वीरेण प्रतिज्ञाभङ्गभीरुणा
बध्यते केशपाशस्ते स चाऽस्याऽऽकर्षणे क्षमः ॥

इत्यनेन युधिष्ठिरः खड्गशक्तिमाविष्करोति।

अथ विरोधनम्।

संरब्धानां विरोधनम्।

इति। यथा वेणीसंहारे। राजा। रे रे मरुत्तनय किमेवं वृद्धस्य राज्ञः पुरतो निन्दितव्यमात्मकर्म श्लाघसे। अपि च।

कृष्टा केशेषु भार्या तव तव च पशोस्तस्य राज्ञस्तयोर्वा
प्रत्यक्षं भूपतीनां मम भुवनपते राज्ञया द्यूतदासी।
अस्मिन् वैरानुबन्धे तव किमपकृतं तैर्हता ये नरेन्द्राः
बाह्वोर्वीर्यातिसारद्रविणगुरुमदं मामजित्वैव दर्पः ॥

भीमः क्रोधं नाटयति। अर्जुनः। आर्य प्रसीद किमत्र क्रोधेन।

अप्रियाणि करोत्येष वाचा शक्तो न कर्मणा।
हतभ्रातृशतो दुःखी प्रलापैरस्य का व्यथा ॥

भीमः। अरे भरतकुलकलङ्क।

अद्यैव किं न विसृजेयमहं भवन्तं
दुःशासनानुगमनाय कटुप्रलापिन्।
विघ्नं गुरू न कुरुतो यदि मत्कराग्र-
निर्भिद्यमानरणितास्थिनि ते शरीरे ॥

अन्यच्च मूढ।

शोकं स्त्रीवन् नयनसलिलैर्यत् परित्याजितोऽसि
भ्रातुर्वक्षःस्थलविदलने यच्च साक्षीकृतोऽसि।

आसीदेतत् तव कुनृपतेः कारणं जीवितस्य
क्रुद्धे युष्मत्कुलकमलिनीकुञ्जरे भीमसेने ॥

राजा। दुरात्मन् भरतकुलापसद पाण्डवपशो नाऽहं भवानिव विकत्थनाप्रगल्भः। किन्तु।

द्रक्ष्यन्ति न चिरात् सुप्तं बान्धवास्त्वां रणाङ्गणे।
मद्गदाभिन्नवक्षोऽस्थिवेणिकाभङ्गभीषणम् ॥

इत्यादिना संरब्धयोर्भीमदुर्योधनयोः स्वशक्त्युक्तिर्विरोधनमिति।

अथ प्ररोचना।

सिद्धामन्त्रणतो भाविदर्शिका स्यात् प्ररोचना।

यथा वेणीसंहारे। पाञ्चालकः। अहं च देवेन चक्रपाणिनेत्युपक्रम्य कृतं सन्देहेन।

पूर्यन्तां सलिलेन रत्नकलशा राज्याभिषेकाय ते
कृष्णाऽत्यन्तचिरोज्झिते च कबरीबन्धे करोतु क्षणम्।
रामे शातकुठारभासुरकरे क्षत्रद्रुमोच्छेदिनि
क्रोधान्धे च वृकोदरे परिपतत्याजौ कुतः संशयः ॥

इत्यादिना मङ्गलानि कर्तुमाज्ञापयति। देवो युधिष्ठिर इत्यन्तेन द्रौपदीकेशसंयमनयुधिष्ठिरराज्याभिषेकयोर्भाविनोरपि सिद्धत्वेन दर्शिका प्ररोचनेति।

अथ विचलनम्।

विकत्थना विचलनम्

यथा वेणीसंहारे। भीमः। तात अम्ब।

सकलरिपुजयाशा यत्र बद्धा सुतैस्ते
तृणमिव परिभूतो यस्य गर्वेण लोकः।
रणशिरसि निहन्ता तस्य राधासुतस्य
प्रणमति पितरौ वां मध्यमः पाण्डवोऽयम्॥

अपि च। तात।

चूर्णिताशेषकौरव्यः क्षीबो दुःशासनासृजा।
भङ्क्ता सुयोधनस्योर्वोर्भीमोऽयं शिरसाऽञ्चति॥

इत्यनेन विजयबीजानुगतस्वगुणाविष्करणाद् विचलनमिति। यथा च रत्नावल्याम्। यौगन्धरायणः।

देव्या मद्वचनात् यथाऽभ्युपगतः पत्युर्वियोगस्तदा
सा देवस्य कलत्रसङ्घटनया दुःखं मया स्थापिता।
तस्याः प्रीतिमयं करिष्यति जगत्स्वामित्वलाभः प्रभोः
सत्यं दर्शयितुं तथापि वदनं शक्नोमि नो लज्जया॥

इत्यनेनाऽन्यपरेणाऽपि यौगन्धरायणेन मया जगत्स्वामित्वानुबन्धी कन्यालाभो वत्सराजस्य कृत इति स्वगुणानुकीर्तनात् विचलनमिति।

अथाऽऽदानम्।

आदानं कार्यसङ्ग्रहः॥ ४२॥

इति। यथा वेणीसंहारे। भीमः। ननु भो समन्तपञ्चकसञ्चारिणः।

रक्षो नाऽहं न भूतं रिपुरुधिरजलाप्लाविताङ्गः प्रकामं
निस्तीर्णोरुप्रतिज्ञाजलनिधिगहनः क्रोधनः क्षत्रियोऽस्मि।

भो भो राजन्यवीराः समरशिखिशिखादग्धशेषाः कृतं वस्
त्रासेनानेन लीनैर्हतकरितुरगान्तर्हितैरास्यते यत् ॥

इत्यनेन समस्तरिपुवधकार्यस्य सङ्गृहीतत्वादादानम्। यथा च रत्नावल्याम्। सागरिका। दिशोऽवलोक्य। *दिट्ठिआ समन्तादो पज्जलिदो भअवं हुअवहो अज्ज करिस्सदि दुक्खावसाण-मित्यनेनाऽन्यपरेणाऽपि दुःखावसानकार्यस्य सङ्ग्रहादादानम्। यथा च जगत्स्वामित्वलाभः प्रभोरिति दर्शितमेवमित्येतानि त्रयोदशाऽवमर्शाङ्गानि। तत्रैतेषामपवादशक्तिव्यवसायप्ररोचनादानानि प्रधानानीति।

अथ निर्वहणसन्धिः।

बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम्।
ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत् ॥ ४४ ॥

यथा वेणीसंहारे। कञ्चुकी। उपसृत्य सहर्षम्। महाराज वर्धसे वर्धसे अयं खलु कुमारभीमसेनः सुयोधनक्षतजारुणीकृतसकलशरीरो दुर्लक्ष्यव्यक्तिरित्यादिना द्रौपदीकेशसंयमनादिमुखसन्ध्यादिबीजानां निजनिजस्थानोपक्षिप्तानामेकार्थतया योजनम्। यथा च रत्नावल्यां सागरिकारत्नावलीवसुभूतिबाभ्रव्यादीनामर्थानां मुखसन्ध्यादिषु प्रकीर्णानां वत्सराजैककार्यार्थत्वम्। वसुभूतिः। सागरिकां निर्वर्ण्याऽप-

---

* दिष्ट्या समन्तात् प्रज्वलितो भगवान् हुतवहोऽद्य करिष्यति दुःखावसानं।

वार्थं। बाभ्रव्य सुसदृशीयं राजपुत्र्या इत्यादिना दर्शितमिति निर्वहणसन्धिः।

अथ तदङ्गानि।

सन्धिर्विबोधो ग्रथनं निर्णयः परिभाषणम्।
प्रसादानन्दसमयाः कृतिभाषोपगूहनाः।
पूर्वभावोपसंहारौ प्रशस्तिश्च चतुर्दश ॥ ४५ ॥

यथोद्देशं लक्षणमाह।

सन्धिर्बीजोपगमनं

इति। यथा रत्नावल्याम्। वसुभूतिः। बाभ्रव्य सुसदृशीयं राजपुत्र्या। बाभ्रव्यः। ममाऽप्येवमेव प्रतिभातीत्यनेन नायिकाबीजोपगमात् सन्धिरिति। यथा च वेणीसंहारे। भीमः। भवति यज्ञवेदिसम्भवे स्मरति भवती यत् तन् मयोक्तम्।

चञ्चद्भुजभ्रमितचण्डगदाभिघात-
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य।
स्त्यानावबद्धघनशोणितशोणपाणिर्
उत्तंसयिष्यति कचांस्तव देवि भीमः॥

इत्यनेन मुखोपक्षिप्तस्य बीजस्य पुनरुपगमात् सन्धिरिति।

अथ विबोधः।

विबोधः कार्यमार्गणम्।

यथा रत्नावल्याम्। वसुभूतिः। निरूप्य। देव कुत इयं

कन्यका। राजा। देवी जानाति। वासवदत्ता। *अज्जउत्त एसा सागरादो पाविअत्ति भणिअ अमच्चजोगन्धराअणेण मम हत्थे णिक्खिदा। अदो ज्जेव सागरिअत्ति सद्दावीअदि। राजा। आत्मगतम्। यौगन्धरायणेन न्यस्ता। कथमसौ ममाऽनिवेद्य करिष्यतीत्यनेन रत्नावलीलक्षणकार्यान्वेषणाद् विबोधः। यथा च वेणीसंहारे। भीमः। मुञ्चतु मुञ्चतु मामार्यः क्षणमेकम्। युधिष्ठिरः। किमपरमवशिष्टम्। भीमः। सुमहदवशिष्टम्। संयमयामि तावदनेन दुःशासनशोणितोचितेन पाणिना पाञ्चाल्याः दुःशासनावकृष्टं केशहस्तम्। युधिष्ठिरः। गच्छतु भवान्। अनुभवतु तपस्विनी वेणीसंहारमित्यनेन केशसंयमनकार्यस्याऽन्वेषणाद् विबोध इति।

अथ ग्रथनम्।

ग्रथनं तदुपक्षेपो।

यथा रत्नावल्याम्। यौगन्धरायणः। देव क्षम्यतां यद् देवस्याऽनिवेद्य मयैतत् कृतमित्यनेन वत्सराजस्य रत्नावलीप्रापणकार्योपक्षेपाद् ग्रथनम्। यथा च वेणीसंहारे। भीमः। पाञ्चालि न खलु मयि जीवति संहर्तव्या दुःशासनविलुलिता वेणिरात्मपाणिना। तिष्ठतु तिष्ठतु। स्वयमेवाऽहं संहरामीत्यनेन द्रौपदीकेशसंयमनकार्यस्योपक्षेपाद् ग्रथनम्।

---

* आर्य्यपुत्र एषा सागरात् प्राप्तेति भणित्वाऽमात्ययौगन्धरायणेन मम हस्ते निक्षिप्ता, अत एव सागरिकेति शब्द्यते।

अथ निर्णयः।

ऽनुभूताख्या तु निर्णयः॥ ४६॥

यथा रत्नावल्याम्। यौगन्धरायणः। कृताञ्जलिः। देव श्रूयतामियं सिंहलेश्वरदुहिता सिद्धादेशेनोपदिष्टा योऽस्याः पाणिं ग्रहीष्यति स सार्वभौमो राजा भविष्यति। तत्प्रत्ययादस्माभिः स्वाम्यर्थे बहुशः प्रार्थ्यमानाऽपि सिंहलेश्वरेण देव्या वासवदत्तायाश्चित्तखेदं परिहरता यदा न दत्ता तदा लावणिके देवी दग्धेति प्रसिद्धिमुत्पाद्य तदन्तिकं बाभ्रव्यः प्रहित इत्यनेन यौगन्धरायणः स्वानुभूतमर्थं ख्यापितवानिति निर्णयः। यथा च वेणीसंहारे। भीमः। देव देव अजातशत्रो क्वाऽद्याऽपि दुर्योधनहतकः। मया हि तस्य दुरात्मनः।

भूमौ क्षिप्ता शरीरं निहितमिदमसृक्चन्दनाभं निजाङ्गे
लक्ष्मीरार्ये निषिक्ता चतुरुदधिपयःसीमया सार्धमुर्व्या।
भृत्या मित्राणि योधाः कुरुकुलमखिलं दग्धमेतद्रणाग्नौ
नामैकं यद् ब्रवीषि क्षितिप तदधुना धार्तराष्ट्रस्य शेषम्॥

इत्यनेन स्वानुभूतार्थकथनान् निर्णय इति।

अथ परिभाषणम्।

परिभाषा मिथो जल्पः

यथा रत्नावल्याम्। रत्नावली। आत्मगतम्। *कआवराहा देवीए ण सक्कुणोमि मुहं दंसिदुं। वासवदत्ता।

---

* कृतापराधा देव्या न शक्नोमि मुखं दर्शयितुं।

शासनम्। पुनर्बाहू प्रसार्य। *एहि अयि णिठुरे इदाणीं पि वन्धुसिणेहं दंसेहि। अपवार्य। अज्जउत्त लज्जामि क्खु अहं इमिणा णिसंसत्तणेण ता लहुं अवणेहि मे बन्धणं। राजा। यथाऽऽह देवी बन्धनमपनयति। वासवदत्ता। वसुभूतिं निर्दिश्य। †अज्ज अमच्चयोगन्धरायणेण दुज्जणीकदम्हि जेण जाणन्तेण वि णाचक्खिदमित्यनेनाऽन्योन्यवचनात् परिभाषणम्। यथा च वेणीसंहारे। भीमः।

हृष्टा येनाऽसि राज्ञां सदसि नृपशुना तेन दुःशासनेन।

इत्यादिना क्वाऽसौ भानुमती नोपहसति पाण्डवदारानित्यनेन भाषणात् परिभाषणम्।

अथ प्रसादः।

प्रसादः पर्युपासनम्।

इति। यथा रत्नावल्याम्। देव क्षम्यतामित्यादि दर्शितम्। यथा च वेणीसंहारे। भीमः। द्रौपदीमुपसृत्य। देवि पाञ्चालराजतनये दिष्ट्या वर्धसे रिपुकुलक्षयेणेत्यनेन द्रौपद्या भीमसेनेनाऽऽराधितत्वात् प्रसाद इति।

अथाऽऽनन्दः।

आनन्दो वाञ्छितावाप्तिः

इति। यथा रत्नावल्याम्। राजा। यथाऽऽह देवी। रत्नावलीं

---

* एहि अयि निठुरे इदानीमपि बन्धुस्नेहं दर्शय। आर्य्यपुत्र लज्जे खलु अहमनेन नृशंसत्वेन तत् लघु अपनयास्या बन्धनं।

† आर्य्य अमात्ययौगन्धरायणेन दुर्जनीकृताऽस्मि येन जानताऽपि नाख्यातमिति।

गृह्णाति। यथा च वेणीसंहारे। द्रौपदी। *णाध विसुमरिदह्मि एदं वावारं णाधस्स पसादेण पुणो सिक्खिस्सं। केशान् बध्नाति। इत्याभ्यां प्रार्थितरत्नावलीप्राप्तिकेशसंयमनयोर्वत्सराजद्रौपदीभ्यां प्राप्तत्वादानन्दः।

अथ समयः।

समयो दुःखनिर्गमः ॥ ४७ ॥

इति। यथा रत्नावल्याम्। वासवदत्ता। रत्नावलीमालिङ्ग्य। †समस्सस २ बहिणिए इत्यनेन भगिन्योरन्योन्यसमागमेन दुःखनिर्गमात् समयः। यथा च वेणीसंहारे। भगवन् कुतस्तस्य विजयादन्यद् यस्य भगवान् पुराणपुरुषः स्वयमेव नारायणो मङ्गलान्याशास्ते।

> कृतगुरुमहदादिक्षोभसम्भूतमूर्तिं
> गुणिनमुदयनाशस्थानहेतुं प्रजानाम्।
> अजममरमचिन्त्यं चिन्तयित्वाऽपि न त्वां
> भवति जगति दुःखी किं पुनर्देव दृष्ट्वा ॥

इत्यनेन युधिष्ठिरदुःखापगमं दर्शयति।

अथ कृतिः।

कृतिर्लब्धार्थशमनं

इति। यथा रत्नावल्याम्। राजा। को देव्याः प्रसादं न

---

* नाथ विस्मृतास्मि एतं व्यापारं नाथस्य प्रसादेन पुनः शिक्षिष्यामि।

† समाश्वसिहि २ भगिनिके इति।

बहुमन्यते। वासवदत्ता। *अज्जउत्त दूरे मे मादुउलं ता तधा करेसु जधा बन्धुअणं न सुमरेदीत्यन्योन्यवचसा लब्धायां रत्नावल्यां राज्ञः सुश्लिष्टये उपशमनात् कृतिरिति। यथा च वेणीसंहारे। कृष्णः। एते खलु भगवन्तो व्यासवाल्मीकीत्यादिनाऽभिषेकमारब्धवन्तस्तिष्ठन्तीत्यनेन प्राप्तराज्यस्याऽभिषेकमङ्गलैः स्थिरीकरणं कृतिः।

अथ भाषणम्।

मानाद्याप्तिश्च भाषणम्।

इति। यथा रत्नावल्याम्। राजा। अतः परमपि प्रियमस्ति।

यातो विक्रमबाहुरात्मसमतां प्राप्तेयमुर्वीतले
सारं सागरिका ससागरमहीप्राप्त्येकहेतुः प्रिया।
देवी प्रीतिमुपागता च भगिनीलाभाज् जिताः कोशलाः
किं नाऽस्ति त्वयि सत्यमात्यवृषभे यस्मै करोमि स्पृहाम्॥

इत्यनेन कामार्थमानादिलाभाद् भाषणमिति।

अथ पूर्वभावोपगूहने।

कार्यदृष्ट्यद्भुतप्राप्ती पूर्वभावोपगूहने।

इति। कार्यदर्शनं पूर्वभावः। यथा रत्नावल्याम्। यौगन्धरायणः। एवं विज्ञाय भगिन्याः सम्प्रति करणीये देवी प्रमाणम्। वासवदत्ता। †फुडं ज्जेव किं ण भणेसि पडिवादेहि से रअणमालं त्ति इत्यनेन वत्सराजाय रत्नावली दीयतामिति

---

* आर्य्यपुत्र दूरे अस्या मातृकुलं तत्तथा कुरुष्व यथा बन्धुजनं न स्मरति।

† स्फुटमेव किं न भणसि प्रतिपादयास्यै रत्नमालामिति।

कार्यस्य यौगन्धरायणाभिप्रायानुप्रविष्टस्य वासवदत्तया दर्शनात् पूर्वभाव इति। अद्भुतप्राप्तिरुपगूहनम्। यथा वेणीसंहारे। नेपथ्ये। महासमरानलदग्धशेषाय स्वस्ति भवते राजन्यलोकाय।

क्रोधान्धैर्यस्य मोक्षात् क्षतनरपतिभिः पाण्डुपुत्रैः कृतानि
प्रत्याशं मुक्तकेशान्यनुदिनमधुना पार्थिवान्तःपुराणि।
कृष्णायाः केशपाशः कुपितयमसखो धूमकेतुः कुरूणां
दिष्ट्या बद्धः प्रजानां विरमतु निधनं स्वस्ति राजन्यकेभ्यः॥

युधिष्ठिरः। देवि एष ते मूर्द्धजानां संहारोऽभिनन्दितो नभस्तलचारिणा सिद्धजनेनेत्येतेनाऽद्भुतार्थप्राप्तिरुपगूहनमिति। लब्धार्थशमनात् कृतिरपि भवति।

अथ काव्यसंहारः।

वराप्तिः काव्यसंहारः

इति। यथा। किं ते भूयः प्रियमुपकरोमीत्यनेन काव्यार्थसंहरणात् काव्यसंहार इति।

अथ प्रशस्तिः।

प्रशस्तिः शुभशंसनम्॥ ४८॥

इति। यथा वेणीसंहारे। प्रीततरश्चेद् भवान् तदिदमेवमस्तु।

अकृपणमतिः कामं जीव्याज् जनः पुरुषायुषं
भवतु भगवन् भक्तिर्द्वैतं विना पुरुषोत्तमे।
कलितभुवनो विद्वद्बन्धुर्गुणेषु विशेषवित्
सततसुकृती भूयाद् भूपः प्रसाधितमण्डलः॥

इति शुभशंसनात् प्रशस्तिः।

इत्येतानि चतुर्दश निर्वहणाङ्गानि।

एवं चतुःषष्ट्यङ्गसमन्विताः पञ्चसन्धयः प्रतिपादिताः।

षट्प्रकारं चाऽङ्गानां प्रयोजनमित्याह।

उक्ताङ्गानां चतुःषष्टिः षोढा चैषां प्रयोजनम्।

इति। कानि पुनस्तानि षट्प्रयोजनानि।

इष्टस्याऽर्थस्य रचना गोप्यगुप्तिः प्रकाशनम्।
रागः प्रयोगस्याऽऽश्चर्यं वृत्तान्तस्याऽनुपक्षयः॥ ४९ ॥

इति। विवक्षितार्थनिबन्धनं गोप्यार्थगोपनं प्रकाश्यार्थप्रकाशनमभिनेयरागवृद्धिश्चमत्कारित्वं च काव्यस्येतिवृत्तस्य विस्तर इत्यङ्गैः षट्प्रयोजनानि सम्पाद्यन्त इति।

पुनर्वस्तुविभागमाह।

द्वेधा विभागः कर्तव्यः सर्वस्याऽपीह वस्तुनः।
सूच्यमेव भवेत् किञ्चिद् दृश्यश्रव्यमथाऽपरम्॥ ५० ॥

इति। कीदृक् सूच्यं कीदृक् दृश्यश्रव्यमित्याह।

नीरसोऽनुचितस्तत्र संसूच्यो वस्तुविस्तरः।
दृश्यस्तु मधुरोदात्तरसभावनिरन्तरः॥ ५१ ॥

इति। सूच्यस्य प्रतिपादनप्रकारमाह।

अर्थोपक्षेपकैः सूच्यं पञ्चभिः प्रतिपादयेत्।
विष्कम्भचूलिकाङ्कास्याङ्कावतारप्रवेशकैः॥ ५२ ॥

इति। तत्र विष्कम्भः।

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।
सङ्क्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः।

इति। अतीतानां भाविनां च कथावयवानां ज्ञापको मध्यमेन मध्यमाभ्यां वा पात्राभ्यां प्रयोजितो विष्कम्भक इति।

स द्विविधः शुद्धः सङ्कीर्णश्चेत्याह।

एकानेककृतः शुद्धः सङ्कीर्णो नीचमध्यमैः॥ ५३॥

इति। एकेन द्वाभ्यां वा मध्यमपात्राभ्यां शुद्धो भवति। मध्यमाधमपात्रैर्युगपत् प्रयोजितः सङ्कीर्ण इति।

अथ प्रवेशकः।

तद्वदेवाऽनुदात्तोक्त्या नीचपात्रप्रयोजितः।
प्रवेशोऽङ्कद्वयस्याऽन्तः शेषार्थस्योपसूचकः॥ ५४॥

तद्वदेवेति भूतभविष्यदर्थज्ञापकत्वमतिदिश्यते। अनुदात्तोक्त्या नीचेन नीचैर्वा पात्रैः प्रयोजित इति विष्कम्भलक्षणापवादः। अङ्कद्वयस्याऽन्त इति प्रथमाङ्के प्रतिषेध इति।

अथ चूलिका।

अन्तर्यवनिकासंस्थैश्चूलिकाऽर्थस्य सूचना।

नेपथ्यपात्रेणाऽर्थसूचनं चूलिका। यथोत्तरचरिते द्वितीयाङ्कस्याऽऽदौ। नेपथ्ये। स्वागतं तपोधनायाः। ततः प्रविशति तपोधना इति। नेपथ्यपात्रेण वासन्तिकया आत्रेयीसूच-

नाच् चूलिका। यथा वा वीरचरिते चतुर्थाङ्कस्याऽऽदौ। नेपथ्ये। भो भो वैमानिकाः प्रवर्त्यन्तां प्रवर्त्यन्तां मङ्गलानि।

कृशाश्वान्तेवासी जयति भगवान् कौशिकमुनिः
सहस्रांशोर्वंशे जगति विजयि चत्रमधुना।
विनेता चत्रारेर्जगदभयदानव्रतधरः
शरण्यो लोकानां दिनकरकुलेन्दुर्विजयते॥

इत्यत्र नेपथ्यपात्रैर्देवै रामेण परशुरामो जित इति सूचनाच् चूलिका।

अथाऽङ्कास्यम्।

अङ्कान्तपात्रैरङ्कास्यं छिन्नाङ्कस्याऽर्थसूचनात्॥ ५५॥

अङ्कान्ते एव पात्रमङ्कान्तपात्रं तेन विश्लिष्टस्योत्तराङ्कमुखस्य सूचनं तद्वशेनोत्तराङ्कावतारोऽङ्कास्यमिति। यथा वीरचरिते द्वितीयाङ्कान्ते। प्रविश्य सुमन्त्रः। भगवन्तौ वसिष्ठविश्वामित्रौ भवतः सभार्गवानाह्वयतः। इतरे। क्व भगवन्तौ। सुमन्त्रः। महाराजदशरथस्याऽन्तिके। इतरे। तदनुरोधात् तत्रैव गच्छाम इत्यङ्कसमाप्तौ। ततः प्रविशन्त्युपविष्टा वसिष्ठविश्वामित्रपरशुरामा इत्यत्र पूर्वाङ्कान्त एव प्रविष्टेन सुमन्त्रपात्रेण शतानन्दजनककथार्थविच्छेद उत्तराङ्कमुखसूचनादङ्कास्यमिति।

अथाऽङ्कावतारः।

अङ्कावतारस्त्वङ्कान्ते पातोऽङ्कस्याऽविभागतः।
एभिः संसूचयेत् सूच्यं दृश्यमङ्कैः प्रदर्शयेत्॥ ५६॥

यत्र प्रविष्टपात्रेण सूचितमेव पूर्वाङ्काविच्छिन्नार्थतयैवाऽङ्कान्तरमापतति प्रवेशकविष्कम्भकादिशून्यं सोऽङ्कावतारः। यथा मालविकाग्निमित्रे प्रथमाङ्कान्ते। विदूषकः। *तेण हि दुवेवि देवीए पेक्खागेहं गदुअ सङ्गीदोवअरणं करिअ तत्थभवदो दूदं विसज्जेध। अधवा मुदङ्गसद्दो ज्जेव णं उत्थावयिस्सदीत्युपक्रमे मृदङ्गशब्दश्रवणादनन्तरं सर्वाण्येव पात्राणि प्रथमाङ्कप्रक्रान्तपात्रसङ्गान्तिदर्शनं द्वितीयाङ्कादावारभन्त इति। प्रथमाङ्कार्थाविच्छेदेनैव द्वितीयाङ्कस्याऽवतरणादङ्कावतार इति।

पुनस्त्रिधा वस्तुविभागमाह।

नाट्यधर्ममपेक्ष्यैतत् पुनर्वस्तु त्रिधेष्यते।

केन प्रकारेण त्रैधं तदाह।

सर्वेषां नियतस्यैव श्राव्यमश्राव्यमेव च॥ ५७॥

तत्र।

सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं मतम्।

इति। सर्वश्राव्यं यद् वस्तु तत् प्रकाशमित्युच्यते। यत् तु सर्वस्याऽश्राव्यं तत् स्वगतमितिशब्दाभिधेयम्।

नियतश्राव्यमाह।

---

* तेन हि द्वावपि देव्याः प्रेक्षागेहं गत्वा सङ्गीतकोपकरणं कृत्वा तत्रभवतो दूतं विसर्जयतं। अथवा मृदङ्गशब्द एवैनमुत्थापयिष्यति।

द्विधाऽन्यन् नाट्यधर्माख्यं जनान्तमपवारितम् ॥ ५८ ॥

इति। अन्यत् तु नियतश्राव्यं द्विप्रकारं जनान्तिकापवारितभेदेन।

तत्र जनान्तिकमाह।

त्रिपताकाकरेणाऽन्यानपवार्याऽन्तरा कथाम्।
अन्योन्यामन्त्रणं यत् स्याज् जनान्ते तज् जनान्तिकम्।

इति। यस्य न श्राव्यं तस्याऽन्तर ऊर्द्धसर्वाङ्गुलं वक्रानामिकत्रिपताकालक्षणं करं कृत्वाऽन्येन सह यत् मन्त्र्यते तज् जनान्तिकमिति।

अथाऽपवारितम्।

रहस्यं कथ्यतेऽन्यस्य परावृत्त्याऽपवारितम्॥ ५९॥

परावृत्त्याऽन्यस्य रहस्यकथनमपवारितमिति।

नाट्यधर्मप्रसङ्गादाकाशभाषितमाह।

किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत्।
श्रुत्वेवाऽनुक्तमप्येकस्तत् स्यादाकाशभाषितम्॥ ६०॥

इति। स्पष्टार्थः।

अन्यान्यपि नाट्यधर्माणि प्रथमकल्पादीनि कैश्चिदुदाहृतानि। तेषामभारतीयत्वान् नाममालाप्रसिद्धानां केषाञ्चिद् देशभाषात्मकत्वान् नाट्यधर्मत्वाभावाल् लक्षणं नोक्तमित्युपसंहरति।

इत्याद्यशेषमिह वस्तुविभेदजातं
रामायणादि च विभाव्य बृहत्कथां च।
आसूत्रयेत् तदनु नेतृरसानुगुण्याच्
चित्रां कथामुचितचारुवचःप्रपञ्चैः ॥ ६१ ॥

इति। [वस्तुविभेदजातं वस्तु वर्णनीयं तस्य विभेदजातं नाम-भेदाः। रामायणादि बृहत्कथां च गुणाढ्यनिर्मितां विभाव्य आलोच्य। तदनु एतदुत्तरम्। नेत्रिति। नेता वक्ष्यमाणलक्षणः रसाश्च तेषामानुगुण्यात् चित्रां चित्ररूपां कथामाख्यायिकाम्। चारूणि यानि वचांसि तेषां प्रपञ्चैर्विस्तारैः आसूत्रयेत् अनुग्रथयेत्। तत्र बृहत्कथामूलं मुद्राराक्षसं चाणक्यनाम्ना तेनाथ शकटालगृहे रहःकृत्यां विधाय सहसा सपुत्रो निहतो नृपः।

योगानन्दयशः शेषे पूर्वनन्दसुतस्ततः।
चन्द्रगुप्तः कृतो राजा चाणक्येन महौजसा ॥

इति बृहत्कथायां सूचितं श्रीरामायणोक्तं रामकथादिशेयम्।]

इति श्रीविष्णुसूनोर्धनिकस्य कृतौ दशरूपावलोके
प्रथमप्रकाशः समाप्तः।

रूपकाणामन्योन्यं भेदसिद्धये वस्तुभेदं प्रतिपाद्येदानीं नायकभेदः प्रतिपाद्यते।

नेता विनीतो मधुरस्त्यागी दक्षः प्रियम्वदः।
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा ॥ १ ॥
बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः।
शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः।

नेता नायको विनयादिगुणसम्पन्नो भवतीति।

तत्र विनीतः। यथा वीरचरिते।

यद् ब्रह्मवादिभिरुपासितवन्द्यपादे
विद्यातपोव्रतनिधौ तपतां वरिष्ठे।
दैवात् कृतस्त्वयि मया विनयापचारम्
तत्र प्रसीद भगवन्नयमञ्जलिस्ते ॥

मधुरः प्रियदर्शनः। यथा तत्रैव।

राम राम नयनाभिरामताम्
आशयस्य सदृशीं समुद्वहन्।
अप्रतर्क्यगुणरामणीयकः
सर्वथैव हृदयङ्गमोऽसि मे ॥

त्यागी सर्वस्वदायकः। यथा।

त्वचं कर्णः शिविर्मांसं जीवं जीमूतवाहनः।
ददौ दधीचिरस्थीनि नास्त्यदेयं महात्मनाम् ॥

दक्षः क्षिप्रकारी। यथा वीरचरिते।

स्फूर्जद्वज्रसहस्रनिर्मितमिव प्रादुर्भवत्यग्रतो
रामस्य त्रिपुरान्तकृद् दिविषदां तेजोभिरिद्धं धनुः।
शुण्डारः कलभेन यद्वदचले वत्सेन दोर्दण्डकस्
तस्मिन्नाहित एव गर्जितगुणं कृष्टं च भग्नं च तत्॥

प्रियंवदः प्रियभाषी। यथा तत्रैव।

उत्पत्तिर्जमदग्नितः स भगवान् देवः पिनाकी गुरुर्
वीर्यं यत् तु न तद् गिरां पथि ननु व्यक्तं हि तत् कर्मभिः।
त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः
सत्यब्रह्मतपोनिधेर्भगवतः किंवा न लोकोत्तरम्॥

रक्तलोकः। यथा तत्रैव।

त्रय्यास्त्राता यस्तवाऽयं तनूजस्
तेनाऽद्यैव स्वामिनस्ते प्रसादात्।
राजन्वत्यो रामभद्रेण राज्ञा
लब्धक्षेमाः पूर्णकामाश्चरामः॥

एवं शौचादिष्वप्युदाहार्यम्। [तत्र शौचं नाम मनोनैर्मल्यादिना कामाद्यनभिभूतत्वम्। यथा रघौ।

का त्वं शुभे कस्य परिग्रहो वा
किंवा मदभ्यागमकारणं ते।
आचक्ष्व मत्वा वशिनां रघूणां
मनः परस्त्रीविमुखप्रवृत्ति॥

वाग्मी। यथा हनुमन्नाटके।

बाह्वोर्बलं न विदितं न च कार्मुकस्य
त्रैयम्बकस्य तनिमा तत एष दोषः।
तच् चापलं परशुराम मम क्षमस्व
डिम्भस्य दुर्विलसितानि मुदे गुरूणाम्॥

रूढवंशो यथा।

ये चत्वारो दिनकरकुलक्षत्रसन्तानमल्ली-
मालाम्लानस्तबकमधुपा जज्ञिरे राजपुत्राः।
रामस्तेषामचरमभवस्ताडकाकालरात्रि
प्रत्यूषोऽयं सुचरितकथाकन्दलीमूलकन्दः॥]

स्थिरो वाङ्मनःक्रियाभिरचञ्चलः। यथा वीरचरिते।

प्रायश्चित्तं चरिष्यामि पूज्यानां वो व्यतिक्रमात्।
न त्वेवं दूषयिष्यामि शस्त्रग्रहमहाव्रतम्॥

यथा वा भर्तृहरिशतके।

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमगुणास्त्वमिवोद्वहन्ति॥

युवा प्रसिद्धः। बुद्धिर्ज्ञानम्। गृहीतविशेषकरी तु प्रज्ञा।
यथा मालविकाग्निमित्रे।

यद् यत् प्रयोगविषये भाविकमुपदिश्यते मया तस्यै।
तत् तद् विशेषकरणात् प्रत्युपदिशतीव मे बाला॥

स्पष्टमन्यत्।

नेतृविशेषानाह।

भेदैश्चतुर्धा ललितशान्तोदात्तोद्धतैरयम्॥ २॥

यथोद्देशं लक्षणमाह।

निश्चिन्तो धीरललितः कलासक्तः सुखी मृदुः।

सचिवादिविहितयोगक्षेमत्वाच् चिन्तारहितः। अतएव गीतादिकलाविष्टो भोगप्रवणश्च शृङ्गारप्रधानत्वाच् च सुकुमारसत्त्वाचारो मृदुरिति ललितः। यथा रत्नावल्याम्।

राज्यं निर्जितशत्रु योग्यसचिवे न्यस्तः समस्तो भरः
सम्यक्पालनलालिताः प्रशमिताशेषोपसर्गाः प्रजाः।
प्रद्योतस्य सुता वसन्तसमयस्त्वं चेति नाम्ना धृतिं
कामः काममुपैत्वयं मम पुनर्मन्ये महानुत्सवः॥

अथ शान्तः।

सामान्यगुणयुक्तस्तु धीरशान्तो द्विजादिकः॥ ३॥

विनयादिनेतृसामान्यगुणयोगी धीरशान्तो द्विजादिक इति विप्रवणिक्सचिवादीनां प्रकरणनेतृणामुपलक्षणम्। विवक्षितं चैतत्। तेन नैश्चिन्त्यादिगुणसम्भवेऽपि विप्रादीनां शान्ततैव न लालित्यम्। यथा मालतीमाधवमृच्छकटिकादौ माधवचारुदत्तादिः।

तत उदयगिरेरिवैक एव
स्फुरितगुणद्युतिसुन्दरः कलावान्।

इह जगति महोत्सवस्य हेतुर्
नयनवतामुदियाय बालचन्द्रः ॥

इत्यादि। यथा वा।

मखशतपरिपूतं गोत्रमुद्भासितं यत्
सदसि निबिडचैत्यब्रह्मघोषैः पुरस्तात्।
मम निधनदशायां वर्तमानस्य पापैस्
तदसदृशमनुष्यैर्घुष्यते घोषणायाम् ॥

अथ धीरोदात्तः।

महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः।
स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रतः ॥ ४ ॥

महासत्त्वः शोकक्रोधाद्यनभिभूतान्तःसत्त्वः। अविकत्थनोऽनात्मश्लाघनः। निगूढाहङ्कारो विनयच्छन्नावलेपः दृढव्रतोऽङ्गीकृतनिर्वाहकः धीरोदात्तः। यथा नागानन्दे। जीमूतवाहनः।

शिरामुखैः स्यन्दत एव रक्तम्
अद्याऽपि देहे मम मांसमस्ति।
तृप्तिं न पश्यामि तवैव तावत्
किं भक्षणात् त्वं विरतो गरुत्मन् ॥

यथा च रामं प्रति।

आहूतस्याऽभिषेकाय विसृष्टस्य वनाय च।
न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः ॥

यत् च केषाञ्चित् स्थैर्यादीनां सामान्यगुणानामपि विशेषलक्षणे कीर्तनं तत् तेषां तत्राऽऽधिक्यप्रतिपादनार्थम्।

ननु च कथं जीमूतवाहनादिर्नागानन्दादावुदात्त इत्युच्यते। औदात्त्यं हि नाम सर्वोत्कर्षेण वृत्तिः। तच्च विजिगीषुत्व एवोपपद्यते। जीमूतवाहनस्तु निर्जिगीषुतयैव कविना प्रतिपादितः। यथा।

तिष्ठन् भाति पितुः पुरो भुवि यथा सिंहासने किं तथा
यत् संवाहयतः सुखं हि चरणौ तातस्य किं राज्यतः।
किं भुक्ते भुवनत्रये धृतिरसौ भुक्तोज्झिते या गुरोर्
आयासः खलु राज्यमुज्झितगुरोस्तन् नाऽस्ति कश्चिद् गुणः॥

इत्यनेन।

पित्रोर्विधातुं शुश्रूषां त्यक्त्वैश्वर्यं क्रमागतम्।
वनं याम्यहमप्येष यथा जीमूतवाहनः॥

इत्यनेन च। अतोऽस्याऽत्यन्तशमप्रधानत्वात् परमकारुणिकत्वाच्च वीतरागवत् शान्तत्वम्। अन्यच्चाऽत्राऽयुक्तं यत् तथाभूतं राज्यसुखादौ निरभिलाषं नायकमुपादायाऽन्तरा तथाभूतमलयवत्यनुरागोपवर्णनम्। यच्चोक्तं सामान्यगुणयोगी द्विजादिर्धीरशान्त इति। तदपि पारिभाषिकत्वादवास्तवमित्यभेदकम्। अतो वस्तुस्थित्या बुद्धयुधिष्ठिरजीमूतवाहनादिव्यवहाराः शान्ततामाविर्भावयन्ति। अत्रोच्यते। यत् तावदुक्तं सर्वोत्कर्षेण वृत्तिरौदात्त्यमिति। न तज् जीमूतवाहनादौ परिहीयते। न ह्येकरूपैव विजिगीषुता यः केनाऽपि शौर्यत्यागदयादिनाऽन्यानतिशेते स विजिगीषुर्न यः परापकारेणाऽर्थग्रहादिप्रवृत्तः। तथात्वे च मार्गदूषकादे-

रपि धीरोदात्तत्वप्रसक्तिः। रामादेरपि जगत्पालनीयमिति दुष्टनिग्रहे प्रवृत्तस्य नान्तरीयकत्वेन भूम्यादिलाभः। जीमूतवाहनादिस्तु प्राणैरपि परार्थसम्पादनाद् विश्वमप्यतिशेत इत्युदात्ततमः। यथोक्तम्। तिष्ठन् भातीत्यादिना विषयसुखपराङ्मुखतेति। तत् सत्यम्। कार्पण्यहेतुषु स्वसुखतृष्णासु निरभिलाषा एव जिगीषवः। यदुक्तम्।

स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते वृत्तिरेवंविधैव।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम्॥

इत्यादिना मलयवत्यनुरागोपवर्णनं त्वशान्तरसाश्रयं शान्तनायकतां प्रत्युत निषेधति। शान्तत्वं चाऽनहङ्कृतत्वं तच्च विप्रादेरौचित्यप्राप्तमिति वस्तुस्थित्या विप्रादेः शान्तता न स्वपरिभाषामात्रेण। बुद्धजीमूतवाहनयोस्तु कारुणिकत्वाविशेषेऽपि सकामनिष्कामकरुणत्वादिधर्मत्वाद् भेदः। अतो जीमूतवाहनादेर्धीरोदात्तत्वमिति।

अथ धीरोद्धतः।

दर्पमात्सर्यभूयिष्ठो मायाछद्मपरायणः।
धीरोद्धतस्त्वहङ्कारी चलश्चण्डो विकत्थनः॥ ५॥

दर्पः शौर्यादिमदः। मात्सर्यमसहनता। मन्त्रबलेनाऽविद्यमानवस्तुप्रकाशनं माया। छद्म वञ्चनामात्रम्। चलोऽनव-

स्थितः चण्डो रौद्रः स्वगुणश्लाघी विकत्थनः धीरोद्धतो भवति यथा जामदग्न्यः।

कैलासोद्धारसारत्रिभुवनविजय-।

इत्यादि। यथा च रावणः।

त्रैलोक्यैश्वर्यलक्ष्मीहठहरणसहा बाहवो रावणस्य।

धीरललितादिशब्दाश्च यथोक्तगुणसमारोपितावस्थाभिधायिनो वत्सवृषभमहोक्षादिवन् न जात्या कश्चिदवस्थितरूपो ललितादिरस्ति। तदा हि महाकविप्रबन्धेषु विरुद्धानेकरूपाभिधानमसङ्गतमेव स्याज् जातेरनपायित्वात्। तथा च भवभूतिनैक एव जामदग्न्यः।

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये।
जामदग्न्यश्च वो मित्रमन्यथा दुर्मनायते॥

इत्यादिना रावणं प्रति धीरोदात्तत्वेन कैलासोद्धारसारेत्यादिभिश्च रामादीन् प्रति प्रथमं धीरोद्धतत्वेन पुनः पुण्या ब्राह्मणजातिरित्यादिभिश्च धीरशान्तत्वेनोपवर्णितः। न चाऽवस्थान्तराभिधानमनुचितमङ्गभूतनायकानां नायकान्तरापेक्षया महासत्त्वादेरव्यवस्थितत्वादङ्गिनस्तु रामादेरेकप्रबन्धोपात्तान् प्रत्येकरूपत्वादारम्भोपात्तावस्थातोऽवस्थान्तरोपादानमन्याय्यम्। यथोदात्तत्वाभिमतस्य रामस्य छद्मना वालिवधादमहासत्त्वतया स्वावस्थापरित्याग इति। वक्ष्यमाणानां च दक्षिणाद्यवस्थानां पूर्वां प्रत्यन्यथात्वत इति नित्यसापेक्षत्वेनाऽऽविर्भावादुपात्तावस्थातोऽवस्थान्तराभिधानमङ्गाङ्गिनोरप्यविरुद्धम्।

अथ शृङ्गारनेत्रवस्थाः।

स दक्षिणः शठो धृष्टः पूर्वां प्रत्यन्यया हृतः।

नायकप्रकरणात् पूर्वां नायिकां प्रत्यन्ययाऽपूर्वनायिकयाऽपहृतचित्तस्त्र्यवस्थो वक्ष्यमाणभेदेन स चतुरवस्थः। तदेवं पूर्वोक्तानां चतुर्णां प्रत्येकं चतुरवस्थत्वेन षोडशधा नायकः।

तत्र।

दक्षिणोऽस्यां सहृदयः

योऽस्यां ज्येष्ठायां हृदयेन सह व्यवहरति स दक्षिणः। यथा ममैव।

प्रसीदत्यालोके किमपि किमपि प्रेमगुरवो
रतिक्रीडाः कोऽपि प्रतिदिनमपूर्वोऽस्य विनयः।
सविश्रम्भः कश्चित् कथयति च किञ्चित् परिजनो
न चाऽहं प्रत्येमि प्रियसखि किमप्यस्य विकृतिम्॥

यथा वा।

उचितः प्रणयो वरं विहन्तुं
बहवः खण्डनहेतवो हि दृष्टाः।
उपचारविधिर्मनस्विनीनां
ननु पूर्वाभ्यधिकोऽपि भावशून्यः॥

अथ शठः।

गूढविप्रियकृत् शठः।

दक्षिणस्याऽपि नायिकान्तरापहृतचित्ततया विप्रियकारित्वाविशेषेऽपि सहृदयत्वेन शठाद् विशेषः। यथा।

शठाऽन्यस्याः काञ्चीमणिरणितमाकर्ण्य सहसा
यदाऽऽश्लिष्यन्नेव प्रशिथिलभुजग्रन्थिरभवः।
तदेतत् क्वाऽऽचक्षे घृतमधुमयत्वद्बहुवचो-
विषेणाऽऽघूर्णन्ती किमपि न सखी मे गणयति।

अथ धृष्टः।

व्यक्ताङ्गवैकृतो धृष्टो

यथाऽमरुशतके।

लाक्षालक्ष्म ललाटपट्टमभितः केयूरमुद्रा गले
वक्त्रे कज्जलकालिमा नयनयोस्ताम्बूलरागोऽपरः।
दृष्ट्वा कोपविधायिमण्डनमिदं प्रातश्चिरं प्रेयसो
लीलातामरसोदरे मृगदृशः श्वासाः समाप्तिं गताः॥

भेदान्तरमाह।

ऽनुकूलस्त्वेकनायिकः॥ ६॥

यथा।

अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यद्
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः।
कालेनाऽऽवरणात्ययात् परिणते यत् स्नेहसारे स्थितं।
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत् प्राप्यते॥

किमवस्थः पुनरेषां वत्सराजादिर्नाटिकानायकः स्यादित्युच्यते। पूर्वमनुपजातनायिकान्तरानुरागोऽनुकूलः। परतस्तु दक्षिणः। ननु च गूढविप्रियकारित्वाद् व्यक्तविप्रियत्वाच्च शाठ्यधार्ष्ट्येऽपि कस्मान् न भवतः। न तथाविधविप्रियत्वेऽपि

वत्सराजादेराप्रबन्धसमाप्तेर्ज्येष्ठां नायिकां प्रति सहृदयत्वाद् दक्षिणतैव। न चोभयोर्ज्येष्ठाकनिष्ठयोर्नायकस्य स्नेहेन न भवितव्यमिति वाच्यमविरोधात्। महाकविप्रबन्धेषु च।

स्नाता तिष्ठति कुन्तलेश्वरसुता वारोऽङ्गराजस्वसुर्
द्यूते रात्रिरियं जिता कमलया देवी प्रसाद्याऽद्य च।
इत्यन्तःपुरसुन्दरीः प्रति मया विज्ञाय विज्ञापिते
देवेनाऽप्रतिपत्तिमूढमनसा द्वित्राः स्थितं नाडिकाः॥

इत्यादावपक्षपातेन सर्वनायिकासु प्रतिपत्त्युपनिबन्धनात्। तथा च भरतः।

मधुरस्त्यागी रागं न याति मदनस्य नाऽपि वशमेति।
अवमानितस्य नार्या विरज्यते स तु भवेज् ज्येष्ठः॥

इत्यत्र न रागं याति न मदनस्य वशमेतीत्यनेनाऽसाधारण एकस्यां स्नेहो निषिद्धो दक्षिणस्येति। अतो वत्सराजादेराप्रबन्धसमाप्ति स्थितं दाक्षिण्यमिति। षोडशानामपि प्रत्येकं ज्येष्ठमध्यमाधमत्वेनाऽष्टाचत्वारिंशन् नायकभेदा भवन्ति।

सहायानाह।

पताकानायकस्त्वन्यः पीठमर्दो विचक्षणः।
तस्यैवाऽनुचरो भक्तः किञ्चिदूनश्च तद्गुणैः॥ ७॥

प्रागुक्तप्रासङ्गिकेतिवृत्तविशेषः पताका तन्नायकः पीठमर्दः प्रधानेतिवृत्तनायकस्य सहायः। यथा मालतीमाधवे मकरन्दः रामायणे सुग्रीवः।

सहायान्तरमाह।

एकविद्यो विटश्चाऽन्यो हास्यकृच्च विदूषकः।

गीतादिविद्यानां नायकोपयोगिनीनामेकस्या विद्याया वेदिता विटः। हास्यकारी विदूषकः। अस्य विकृताकारवेषादित्वं हास्यकारित्वेनैव लभ्यते। यथा शेखरको नागानन्दे विटः। विदूषकः प्रसिद्ध एव।

अथ प्रतिनायकः।

लुब्धो धीरोद्धतस्तब्धः पापकृद् व्यसनी रिपुः॥ ८॥

तस्य नायकस्येत्थम्भूतः प्रतिपक्षनायको भवति। यथा रामयुधिष्ठिरयोः रावणदुर्योधनौ।

अथ सात्त्विका नायकगुणाः।

शोभा विलासो माधुर्यं गाम्भीर्यं धैर्यतेजसी।
ललितौदार्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः॥ ९॥

तत्र।

नीचे घृणाऽधिके स्पर्धा शोभायां शौर्यदक्षते।

नीचे घृणा। यथा वीरचरिते।

उत्तालताडकोत्पातदर्शनेऽप्यप्रकम्पितः।
नियुक्तस्तत्प्रमाथाय स्त्रैणेन विचिकित्सति॥

गुणाधिकैः स्पर्धा यथा।

एतां पश्य पुरःस्थलीमिह किल क्रीडाकिरातो हरः
कोदण्डेन किरीटिना सरभसं चूडान्तरे ताडितः।

इत्याकर्ण्य कथाद्भुतं हिमनिधावद्रौ सुभद्रापतेर्
मन्दं मन्दमकारि येन निजयोर्दोर्दण्डयोर्मण्डलम् ॥

शौर्यशोभा यथा। ममैव।

अन्त्रैः स्वैरपि संयताग्रचरणो मूर्च्छाविरामक्षणे
स्वाधीनव्रणिताङ्गशस्त्रनिचितो रोमोद्गमं वर्मयन्।
भग्नानुद्वलयन् निजान् परभटान् सन्तर्जयन् निष्ठुरं
धन्यो धाम जयश्रियः पृथुरणस्तम्भे पताकायते ॥

दक्षशोभा। यथा वीरचरिते।

स्फूर्जद्वज्रसहस्रनिर्मितमिव प्रादुर्भवत्यग्रतो
रामस्य त्रिपुरान्तकृद् दिविषदां तेजोभिरिद्धं धनुः।
शुण्डारः कलभेन यद्वदचले वत्सेन दोर्दण्डकस्
तस्मिन्नाहित एव गर्जितगुणं कृष्टं च भग्नं च तत् ॥

अथ विलासः।

गतिः सधैर्या दृष्टिश्च विलासे सस्मितं वचः ॥ १० ॥

यथा।

दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा
धीरोद्धता नमयतीव गतिर्धरित्रीम्।
कौमारकेऽपि गिरिवद् गुरुतां दधानो
वीरो रसः किमयमेत्युत दर्प एव ॥

अथ माधुर्यम्।

श्लक्ष्णो विकारो माधुर्यं सङ्क्षोभे सुमहत्यपि।

महत्यपि विकारहेतौ मधुरो विकारो माधुर्यम्। यथा।

कपोले जानक्याः करिकलभदन्तद्युतिमुषि
स्मरस्मेरं गण्डोड्डमरपुलकं वक्त्रकमलम्।
मुहुः पश्यन् शृण्वन् रजनिचरसेनाकलकलं
जटाजूटग्रन्थिं द्रढयति रघूणां परिवृढः॥

अथ गाम्भीर्यम्।

गाम्भीर्यं यत्प्रभावेन विकारो नोपलक्ष्यते॥ ११॥

मृदुविकारोपलम्भाद् विकारानुपलब्धिरन्येति माधुर्यादन्यद् गाम्भीर्यम्। यथा।

आहूतस्याऽभिषेकाय विसृष्टस्य वनाय च।
न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः॥

अथ स्थैर्यम्।

व्यवसायादचलनं स्थैर्यं विघ्नकुलादपि।

यथा वीरचरिते।

प्रायश्चित्तं चरिष्यामि पूज्यानां वो व्यतिक्रमात्।
न त्वेवं दूषयिष्यामि शस्त्रग्रहमहाव्रतम्॥

अथ तेजः।

अधिक्षेपाद्यसहनं तेजः प्राणात्ययेष्वपि॥ १२॥

यथा।

ब्रूत नूतनकूष्माण्डफलानां के भवन्त्यमी।
अङ्गुलीदर्शनाद् येन न जीवन्ति मनस्विनः॥

अथ ललितम्।

शृङ्गाराकारचेष्टात्वं सहजं ललितं मृदु।

स्वाभाविकः शृङ्गारो मृदुः। तथाविधा शृङ्गारचेष्टा च ललितम्। यथा ममैव।

लावण्यमन्मथविलासविजृम्भितेन
स्वाभाविकेन सुकुमारमनोहरेण।
किंवा ममैव सखि योऽपि ममोपदेष्टा
तस्यैव किं न विषमं विदधीत तापम्॥

अथौदार्यम्।

प्रियोक्त्याऽऽजीविताद् दानमौदार्यं सदुपग्रहः॥ १३॥

प्रियवचनेन सहाऽऽजीवितावधेर्दानमौदार्यं सतामुपग्रहश्च। यथा नागानन्दे।

शिरामुखैः स्यन्दत एव रक्तम्
अद्यापि देहे मम मांसमस्ति।
तृप्तिं न पश्यामि तवैव तावत्
किं भक्षणात् त्वं विरतो गरुत्मन्॥

सदुपग्रहो यथा।

एते वयममी दाराः कन्येयं कुलजीवितम्।
ब्रूत येनाऽत्र वः कार्यमनास्था बाह्यवस्तुषु॥

अथ नायिका।

स्वाऽन्या साधारणस्त्रीति तद्गुणा नायिका त्रिधा।

तद्गुणेति यथोक्तसम्भवे नायकसामान्यगुणयोगिनी नायिकेति। स्वस्त्री परस्त्री साधारणस्त्रीत्यनेन विभागेन त्रिधा।

तत्र स्वीयाया विभागगर्भं सामान्यलक्षणमाह।

मुग्धा मध्या प्रगल्भेति स्वीया शीलार्जवादियुक्॥ १४॥

शीलं सुवृत्तम्। पतिव्रताऽकुटिला लज्जावती पुरुषोपचारनिपुणा स्वीया नायिका।

तत्र शीलवती यथा।

*कुलवालिआए पेच्छह जोव्वणलाअण्णविब्भमविलासा।
पवसन्ति व्व पवसिए एन्ति व्व पिये घरं एन्ते॥

आर्जवादियोगिनी यथा।

†हसिअमविआरमुद्धं भमिअं विरहिअविलाससुच्छाअं।
भणिअं सहावसरलं धण्णाण घरे कलत्ताणं॥

लज्जावती यथा।

‡लज्जापज्जत्तपसाहणाइं परतित्तिणिप्पिवासाइं।
अविणअदुम्मेहाइं धण्णाण घरे कलत्ताइं॥

सा चैवंविधा स्वीया मुग्धामध्याप्रगल्भाभेदात् त्रिविधा।

---

* कुलबालिकायाः प्रेक्षध्वं यौवनलावण्यविभ्रमविलासाः।
प्रवसन्तीव प्रवसिते आगच्छन्तीव प्रिये गृहमागते॥

† हसितमविचारमुग्धं भमितं विरहितविलाससुच्छायं।
भणितं स्वभावसरलं धन्यानां गृहे कलत्राणां॥

‡ लज्जापर्याप्तप्रसाधनानि परतृप्तिनिष्पिपासानि।
अविनयदुर्मेधांसि धन्यानां गृहे कलत्राणि॥

तत्र।

मुग्धा नववयःकामा रतौ वामा मृदुः क्रुधि।

प्रथमावतीर्णतारुण्यमन्मथा रमणे वामशीला सुखोपायप्रसादना मुग्धनायिका।

तत्र वयोमुग्धा यथा।

विस्तारी स्तनभार एष गमितो न स्वोचितामुन्नतिं
रेखोद्भासिकृतं वलित्रयमिदं न स्पष्टनिम्नोन्नतम्।
मध्येऽस्या ऋजुरायतार्धकपिशा रोमावली निर्मिता
रम्यं यौवनशैशवव्यतिकरोन्मिश्रं वयो वर्तते॥

यथा च ममैव।

उच्छ्वसन्मण्डलप्रान्तरेखमाबद्धकुड्मलम्।
अपर्याप्तमुरोवृद्धेः शंसत्यस्याः स्तनद्वयम्॥

काममुग्धा यथा।

दृष्टिः सालसतां बिभर्ति न शिशुक्रीडासु बद्धादरा
श्रोत्रे प्रेषयति प्रवर्तितसखीसम्भोगवार्तास्वपि।
पुंसामङ्कमपेतशङ्कमधुना नाऽऽरोहति प्राग्यथा
बाला नूतनयौवनव्यतिकराऽवष्टभ्यमाना शनैः॥

रतवामा यथा।

व्याहृता प्रतिवचो न सन्दधे
गन्तुमैच्छदवलम्बितांशुका।
सेवतेस्म शयनं पराङ्मुखी
सा तथापि रतये पिनाकिनः॥

मृदुः कोपे यथा।

प्रथमजनिते बाला मन्यौ विकारमजानती
कितवचरिते नासज्याङ्के विनम्रमुखैव सा।
चिबुकमलिकं चोन्नम्योच्चैरकृत्रिमविभ्रमा
नयनसलिलस्यन्दिन्योष्ठैरुदत्यपि चुम्बिता॥

एवमन्येऽपि लज्जासंवृतानुरागनिबन्धना मुग्धा व्यवहारा निबन्धनीयाः। यथा।

न मध्ये संस्कारं कुसुममपि बाला विषहते
न निश्वासैः सुभ्रूर्जनयति तरङ्गव्यतिकरम्।
नवोढा पश्यन्ती लिखितमिव भर्तुः प्रतिमुखं
प्ररोहद्रोमाञ्चा न पिबति न पात्रं चलयति॥

अथ मध्या।

मध्योद्यद्यौवनानङ्गा मोहान्तसुरतक्षमा॥ १५॥

सम्प्राप्ततारुण्यकामा मोहान्तरतयोग्या मध्या।

तत्र यौवनवती यथा।

आलापान् भ्रूविलासो विरलयति लसद्बाहुविक्षिप्तियातं
नीवीग्रन्थिं प्रथिम्ना प्रतनयति मनाङ् मध्यनिम्नो नितम्बः।
उत्पुष्यत्पार्श्वमूर्च्छत्कुचशिखरमुरो नूनमन्तः स्मरेण
स्पृष्टा कोदण्डकोट्या हरिणशिशुदृशो दृश्यते यौवनश्रीः॥

कामवती यथा।

स्मरनवनदीपूरेणोढाः पुनर्गुरुसेतुभिर्
यदपि विधृतास्तिष्ठन्त्यारादपूर्णमनोरथाः।

तदपि लिखितप्रख्यैरङ्गैः परस्परमुन्मुखा
नयननलिनीनालानीतं पिबन्ति रसं प्रियाः ॥

मध्यासम्भोगो यथा।

*ताव च्चिअ रइसमए महिलाणं विब्भमा विराअन्ति।
जाव ण कुवलयदलसच्छहाइं मउलेन्ति णअणाइं ॥

एवं धीरायामधीरायां धीराधीरायामप्युदाहार्यम्।

अथाऽस्या मानवृत्तिः।

धीरा सोत्प्रासवक्रोक्त्या मध्या साश्रु कृतागसम्।
खेदयेद् दयितं कोपादधीरा परुषाक्षरम्॥ १६ ॥

मध्याधीरा कृतापराधं प्रियं सोत्प्रासवक्रोक्त्या खेदयेत्। यथा माघे।

न खलु वयममुष्य दानयोग्याः
पिबति च पाति च याऽसकौरहस्त्वाम्।
व्रज विटपममुं ददस्व तस्यै
भवतु यतः सदृशोश्चिराय योगः ॥

धीराधीरा साश्रु सोत्प्रासवक्रोक्त्या खेदयेत्। यथाऽमरुशतके।

बाले नाथ विमुञ्च मानिनि रुषं रोषान् मया किं कृतं
खेदोऽस्मासु न मेऽपराध्यति भवान् सर्वेऽपराधा मयि।
तत् किं रोदिषि गद्गदेन वचसा कस्याऽग्रतो रुद्यते
नन्वेतन् मम का तवाऽस्मि दयिता नाऽस्मीत्यतो रुद्यते ॥

---

* तावदेव रतिसमये महिलानां विभ्रमा विराजन्ते।
यावन्न कुवलयदलसच्छभानि मुकुलयन्ति नयनानि ॥

अधीरा साश्रु परुषाक्षरम्। यथा।

यातु यातु किमनेन तिष्ठता
मुञ्च मुञ्च सखि मा ऽऽदरं कृथाः।
खण्डिताधरकलङ्कितं प्रियं
शक्नुमो न नयनैर्निरीक्षितुम्॥

एवमपरेऽपि व्रीडानुपहिताः स्वयमनभियोगकारिणो मध्याव्यवहारा भवन्ति। यथा।

स्वेदाम्भःकणिकाञ्चितेऽपि वदने जातेऽपि रोमोद्गमे
विस्रम्भेऽपि गुरौ पयोधरभरोत्कम्पेऽपि वृद्धिं गते।
दुर्वारस्मरनिर्भरेऽपि हृदये नैवाऽभियुक्तः प्रियम्
तन्वङ्ग्या हठकेशकर्षणघनाश्लेषामृते लुब्धया॥

स्वतोऽनभियोजकत्वं हठकेशकर्षणघनाश्लेषामृते लुब्धयेत्युत्प्रेक्षाप्रतीतेः।

अथ प्रगल्भा।

यौवनान्धा स्मरोन्मत्ता प्रगल्भा दयिताङ्कके।
विलीयमानेवाऽऽनन्दाद् रतारम्भेऽप्यचेतना॥ १७॥

गाढयौवना। यथा ममैव।

अभ्युन्नतस्तनमुरो नयने च दीर्घे
वक्रे भ्रुवावतितरां वचनं ततोऽपि।
मध्योऽधिकं तनुरतीवगुरुर्नितम्बो
मन्दा गतिः किमपि चाऽद्भुतयौवनायाः॥

यथा च।

स्तनतटमिदमुत्तुङ्गं निम्नो मध्यः समुन्नतं जघनम्।
विषमे मृगशावाक्ष्या वपुषि नवे क इव न स्खलति ॥

भावप्रगल्भा यथा।

न जाने सम्मुखायाते प्रियाणि वदति प्रिये।
सर्वाण्यङ्गानि किं यान्ति नेत्रतामुत कर्णताम् ॥

रतप्रगल्भा यथा।

कान्ते तल्पमुपागते विगलिता नीवी स्वयं बन्धनात्
वासः प्रश्लथमेखलागुणधृतं किञ्चिन् नितम्बे स्थितम्।
एतावत् सखि वेद्मि केवलमहं तस्याऽङ्गसङ्गे पुनः
कोऽसौ काऽस्मि रतं नु किं कथमिति स्वल्पाऽपि मे न स्मृतिः॥

एवमन्येऽपि परित्यक्तव्रीडयन्त्रणावैदग्ध्यप्राया: प्रगल्भाव्यवहारा वेदितव्याः। यथा।

क्वचित् ताम्बूलाक्तः क्वचिदगरुपङ्काङ्कमलिनः
क्वचिच् चूर्णोद्गारी क्वचिदपि च सालक्तकपदः।
वलीभङ्गाभोगैरलकपतितैः शीर्णकुसुमैः
स्त्रियाः सर्वावस्थं कथयति रतं प्रच्छदपटः ॥

अथाऽस्याः कोपचेष्टा।

सावहित्थादरोदास्ते रतौ धीरेतरा क्रुधा।
सन्तर्ज्य ताडयेन् मध्या मध्याधीरेव तं वदेत्।

सहाऽवहित्थेनाऽऽकारसंवरणेनाऽऽदरेण चोपचाराधिक्येन वर्तते सा सावहित्थादरा। रतावुदासीना क्रुधा कोपेन भवति।

सावहित्थादरा। यथाऽमरुशतके।

एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद्दूरतस्
ताम्बूलाहरणच्छलेन रभसाऽऽश्लेषोऽपि संविघ्नितः।
आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्याऽन्तिके
कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः॥

एतावुदाहरणे यथा।

आयस्ता कलहं पुरेव कुरुते न स्रंसने वाससो
भग्नभ्रूगतिखण्ड्यमानमधरं धत्ते न केशग्रहे।
अङ्गान्यर्पयति स्वयं भवति नो वामा हठालिङ्गने
तन्व्या शिक्षित एष सम्प्रति कुतः कोपप्रकारोऽपरः॥

इतराऽधीरप्रगल्भा कुपिता सती सन्तर्ज्य ताडयति। यथाऽमरुशतके।

कोपात्कोमललोलबाहुलतिकापाशेन बद्ध्वा दृढं
नीत्वा केलिनिकेतनं दयितया सायं सखीनां पुरः।
भूयोऽप्येवमिति स्खलत्कलगिरा संसूच्य दुश्चेष्टितं
धन्यो हन्यत एष निह्नुतिपरः प्रेयान्रुदन्त्या हसन्॥

धीराधीरप्रगल्भा मध्याधीरेव तं वदति सोल्लुण्ठवक्रोक्त्या।
यथा तत्रैव।

कोपो यत्र भ्रुकुटिरचना निग्रहो यत्र मौनं
यत्राऽन्योन्यस्मितमनुनयो दृष्टिपातः प्रसादः।
तस्य प्रेम्णस्तदिदमधुना वैशसं पश्य जातं
त्वं पादान्ते लुठसि न च मे मन्युमोक्षः खलायाः॥

पुनश्च।

द्वेधा ज्येष्ठा कनिष्ठा चेत्यमुग्धा द्वादशोदिताः॥ १८॥

मध्याप्रगल्भाभेदानां प्रत्येकं ज्येष्ठाकनिष्ठात्वभेदेन द्वादश भेदा भवन्ति। मुग्धा त्वेकरूपैव। ज्येष्ठाकनिष्ठे। यथाऽमरुशतके।

दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्याऽऽदराद्
एकस्या नयने निमील्य विहितक्रीडानुबन्धच्छलः।
ईषद्वक्रितकन्धरः सपुलकः प्रेमोल्लसन्मानसाम्
अन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति॥

न चाऽनयोर्दाक्षिण्यप्रेमभ्यामेव व्यवहारः। अपितु प्रेम्णाऽपि। यथा चैतत् तथोक्तं दक्षिणलक्षणावसरे। [एवां च धीरमध्याधीरमध्याधीराधीरमध्याधीरप्रगल्भाधीरप्रगल्भाधीराधीरप्रगल्भाभेदानां प्रत्येकं ज्येष्ठाकनिष्ठाभेदात् द्वादशानां वासवदत्तारत्नावलीवत् प्रबन्धनायिकानामुदाहरणानि महाकविप्रबन्धेष्वनुसर्तव्यानि।]

अथाऽन्यस्त्री।

अन्यस्त्री कन्यकोढा च नाऽन्योढाऽङ्गिरसे क्वचित्।
कन्यानुरागमिच्छातः कुर्यादङ्गाङ्गिसंश्रयम्॥ १९॥

नायकान्तरसम्बन्धिनी अन्योढा। यथा।

दृष्टिं हे प्रतिवेशिनि क्षणमिहाऽप्यस्मिन् गृहे दास्यसि
प्रायेणाऽस्य शिशोः पिता न विरसाः कौपीरपः पास्यति।
एकाकिन्यपि यामि तद् वरमितः स्रोतस्तमालाकुलं
नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नलग्रन्थयः॥

इयं त्वङ्गिनि प्रधाने रसे न क्वचिन् निबन्धनीयेति न

प्रपञ्चिता। कन्यका तु पित्राद्यायत्तत्वादपरिणीताऽप्यन्यस्त्रीत्युच्यते। तस्यां पित्रादिभ्योऽलभ्यमानायां सुलभायामपि परोपरोधस्वकान्ताभयात् प्रच्छन्नं कामित्वं प्रवर्तते। यथा मालत्यां माधवस्य सागरिकायां च वत्सराजस्येति। तदनुरागस्य स्वेच्छया प्रधानाप्रधानरससमाश्रयो निबन्धनीयः। यथा रत्नावलीनागानन्दयोः सागरिकामलयवत्यनुराग इति।

साधारणस्त्री गणिका कलाप्रागल्भ्यधौर्त्ययुक्।

तद्व्यवहारो विस्तरतः शास्त्रान्तरे निदर्शितः। दिङ्मात्रं तु।

छन्नकामसुखार्थाज्ञस्वतन्त्राहंयुपण्डकान्॥ २०॥
रक्तेव रञ्जयेदाढ्यान् निःस्वान् मात्रा विवासयेत्।

छन्नं ये कामयन्ते ते छन्नकामाः श्रोत्रियवणिक्लिङ्गिप्रभृतयः। सुखार्थोऽप्रयासावाप्तधनः सुखप्रयोजनो वा। अज्ञो मूर्खः। स्वतन्त्रो निरङ्कुशः। अहंयुरहङ्कृतः। पण्डको वातपण्डादिः। एतान् बहुवित्तान् रक्तेव रञ्जयेदर्थार्थम्। तत्प्रधानत्वात् तद्वृत्तेः। गृहीतार्थान् कुट्टन्यादिना निष्कासयेत् पुनः प्रतिसन्धानाय। इदं तासामौत्सर्गिकं रूपम्।

रूपकेषु तु।

रक्तैव त्वप्रहसने नैषा दिव्यनृपाश्रये॥ २१॥

प्रहसनवर्जिते प्रकरणादौ रक्तैवैषा विधेया। यथा मृच्छकटिकायां वसन्तसेना चारुदत्तस्य। प्रहसने त्वरक्ताऽपि हास्यहेतुत्वात्। नाटकादौ तु दिव्यनृपनायके नैव विधेया।

अथ भेदान्तराणि।

आसामष्टाववस्थाः स्युः स्वाधीनपतिकादिकाः।

स्वाधीनपतिका वासकसज्जा विरहोत्कण्ठिता खण्डिता कलहान्तरिता विप्रलब्धा प्रोषितप्रियाऽभिसारिकेत्यष्टौ स्वस्त्रीप्रभृतीनामवस्थाः। नायिकाप्रभृतीनामप्यवस्थारूपत्वे सत्यवस्थान्तराभिधानं पूर्वासां धर्मित्वप्रतिपादनायाऽष्टाविति न्यूनाधिकव्यवच्छेदः। न च वासकसज्जादेः स्वाधीनपतिकादावन्तर्भावः। अनासन्नप्रियत्वाद् वासकसज्जाया न स्वाधीनपतिकात्वम्। यदि चैव्यत्प्रियाऽपि स्वाधीनपतिका प्रोषितप्रियाऽपि न पृथग् वाच्या। न चैयता व्यवधानेनाऽऽसत्तिरिति नियन्तुं शक्यम्। न चाऽविदितप्रियव्यलीकायाः खण्डितात्वं नाऽपि प्रवृत्तरतिभोगेच्छायाः प्रोषितप्रियात्वं स्वयमगमनान् नायकं प्रत्यप्रयोजकत्वान् नाऽभिसारिकात्वम्। एवमुत्कण्ठिताऽप्यन्यैव पूर्वाभ्यः। औचित्यप्राप्तप्रियागमनसमयातिवृत्तिविधुरा न वासकसज्जा। तथा विप्रलब्धाऽपि वासकसज्जावदन्यैव पूर्वाभ्यः। उक्त्वा नायात इति प्रतारणाधिक्याच्च वासकसज्जोत्कण्ठितयोः पृथक्। कलहान्तरिता तु यद्यपि विदितव्यलीका तथाऽप्यगृहीतप्रियानुनया पश्चात्तापप्रकाशितप्रसादा पृथगेव खण्डितायाः। तत् स्थितमेतदष्टावस्था इति।

तत्र।

आसन्नायत्तरमणा हृष्टा स्वाधीनभर्तृका॥ २२॥

यथा।

मा गर्वमुद्वह कपोलतले चकास्ति
कान्तस्वहस्तलिखिता मम मञ्जरीति ।
अन्याऽपि किं न सखि भाजनमीदृशानां
वैरी न चेद् भवति वेपथुरन्तरायः ॥

अथ वासकसज्जा।

मुदा वासकसज्जा स्वं मण्डयत्येष्यति प्रिये ।

स्वमात्मानं वेश्म च हर्षेण भूषयत्येष्यति प्रिये। वासकसज्जा यथा।

निजपाणिपल्लवतटस्खलनाद्
अभिनासिकाविवरमुत्पतितैः।
अपरा परीक्ष्य शनकैर्मुमुदे
मुखवाससास्यकमलश्वसनैः ॥

अथ विरहोत्कण्ठिता।

चिरयत्यव्यलीके तु विरहोत्कण्ठितोन्मनाः ॥ २३ ॥

यथा।

सखि स विजितो वीणावाद्यैः कयाऽप्यपरस्त्रिया
पणितमभवत् ताभ्यां तत्र क्षपाललितं ध्रुवम्।
कथमितरथा शेफालीषु स्खलत्कुसुमास्वपि
प्रसरति नभोमध्येऽपीन्दौ प्रियेण विलम्ब्यते ॥

अथ खण्डिता।

ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता ।

यथा।

नवनखपदमङ्गं गोपयस्यंशुकेन
स्थगयसि पुनरोष्ठं पाणिना दन्तदष्टम्।
प्रतिदिशमपरस्त्रीसङ्गशंसी विसर्पन्
नवपरिमलगन्धः केन शक्यो वरीतुम्॥

अथ कलहान्तरिता।

कलहान्तरिताऽमर्षाद् विधूतेऽनुशयार्तियुक्॥ २४॥

यथा।

निःश्वासा वदनं दहन्ति हृदयं निर्मूलमुन्मथ्यते
निद्रा नैति न दृश्यते प्रियमुखं नक्तन्दिवं रुद्यते।
अङ्गं शोषमुपैति पादपतितः प्रेयांस्तथोपेक्षितः
सख्यः कं गुणमाकलय्य दयिते मानं वयं कारिताः॥

अथ विप्रलब्धा।

विप्रलब्धोक्तसमयमप्राप्तेऽतिविमानिता।

यथा।

उत्तिष्ठ दूति यामो यामो यातस्तथापि नाऽऽयातः।
याऽतः परमपि जीवेज् जीवितनाथो भवेत् तस्याः॥

अथ प्रोषितप्रिया।

दूरदेशान्तरस्थे तु कार्यतः प्रोषितप्रिया।

यथाऽमरुशतके।

आदृष्टिप्रसरात् प्रियस्य पदवीमुद्वीक्ष्य निर्विण्णया
विश्रान्तेषु पथिष्वहःपरिणतौ ध्वान्ते समुत्सर्पति।

इत्येकं सप्रुचा गतं प्रति पदं पान्यस्त्रियाऽस्मिन् क्षणे
माऽभूदागत इत्यमन्दवलितग्रीवं पुनर्वीक्षितम् ॥

अथाऽभिसारिका।

कामार्ताऽभिसरेत् कान्तं सारयेद् वाऽभिसारिका ॥२५॥

यथाऽमरुशतके।

उरसि निहितस्तारो हारः कृता जघने घने
कलकलवती काञ्ची पादौ रणन्मणिनूपुरौ।
प्रियमभिसरस्येवं मुग्धे त्वमाहतडिण्डिमा
यदि किमधिकत्रासोत्कम्पं दिशः समुदीक्षसे ॥

यथा च।

न च मेऽवगच्छति यथा लघुतां
करुणां यथा च कुरुते स मयि।
निपुणं तथैनमुपगम्य वदेर्
अभिदूति काचिदिति सन्दिदिशे ॥

तत्र।

चिन्तानिःश्वासखेदाश्रुवैवर्ण्यग्लान्यभूषणैः।
युक्ताः षडन्त्या द्वे चाऽऽद्ये क्रीडौज्ज्वल्यप्रहर्षितैः ॥ २६ ॥

परस्त्रियौ तु कन्यकोढे। सङ्केतात् पूर्वं विरहोत्कण्ठिते पश्चाद् विदूषकादिना सहाऽभिसरन्त्यावभिसारिके। कुतोऽपि सङ्केतस्थानमप्राप्ते नायके विप्रलब्धे इति व्यवस्थितैवाऽनयोरिति। अस्वाधीनप्रिययोरवस्थान्तरायोगात्। यत् तु माल-

विकाग्निमित्रादौ योऽप्येवं धीरः सोऽपि दृष्टो देव्याः पुरत इति मालविकावचनानन्तरम्। राजा।

दाक्षिण्यं नाम बिम्बोष्ठि नायकानां कुलव्रतम्।
तन् मे दीर्घाक्षि ये प्राणास्ते त्वदाशानिबन्धनाः॥

इत्यादि तन् न खण्डितानुनयाभिप्रायेणाऽपितु सर्वथा मम देव्यधीनत्वमाशङ्क्य निराशा माभूदिति कन्याविस्रम्भणायेति। तथाऽनुपसञ्जातनायकसमागमाया देशान्तरव्यवधानेऽप्युत्कण्ठितात्वमेवेति न प्रोषितप्रियात्वमनायत्तप्रियत्वादेवेति॥

अथाऽऽसां सहायिन्यः।

दूत्यो दासी सखी कारुर्धात्रेयी प्रतिवेशिका।
लिङ्गिनी शिल्पिनी स्वं च नेतृमित्रगुणान्विताः॥ २७॥

दासी परिचारिका। सखी स्नेहनिबद्धा। कारुः रजकीप्रभृतिः। धात्रेयी उपमातृसुता। प्रतिवेशिका प्रतिगृहिणी। लिङ्गिनी भिक्षुकादिका। शिल्पिनी चित्रकारादिस्त्री। स्वयं चेति दूतीविशेषः। नायकमित्राणां पीठमर्दादीनां निसृष्टार्थत्वादिना गुणेन युक्ताः। तथा च मालतीमाधवे कामन्दकीं प्रति।

शास्त्रेषु निष्ठा सहजश्च बोधः प्रागल्भ्यमभ्यस्तगुणा च वाणी।
कालानुरोधः प्रतिभानवत्त्वमेते गुणाः कामदुघाः क्रियासु॥

तत्र सखी। यथा।

मृगशिशुदृशस्तस्यास्तापं कथं कथयामि ते
दहनपतिता दृष्टा मूर्तिर्मया न हि वैधवी।

इति तु विदितं नारीरूपः स लोकदृशां सुधा।
तव शठतया शिल्पोत्कर्षो विधेर्विघटिष्यते॥

यथा च।

*सच्चं जाणइ दट्ठुं सरिसम्मि जणम्मि जुज्जए राओ।
मरउ ण तुमं भणिस्सं मरणं पि सलाहणिज्जं से॥

स्वयं दूती। यथा।

†मऊ एहि किं णिवालअ हरसि णिअं वाउ जइ वि मे सिचअं।
साहेमि कस्स सुन्दर दूरे गामो अहं एक्का॥

इत्याद्यूह्यम्।

अथ योषिदलङ्काराः।

यौवने सत्त्वजाः स्त्रीणामलङ्कारास्तु विंशतिः।

यौवने सत्त्वोद्भूता विंशतिरलङ्काराः स्त्रीणां भवन्ति।

तत्र।

भावो हावश्च हेला च त्रयस्तत्र शरीरजाः॥ २८॥
शोभा कान्तिश्च दीप्तिश्च माधुर्यं च प्रगल्भता।
औदार्यं धैर्यमित्येते सप्त भावा अयत्नजाः॥ २९॥

तत्र भावहावहेलास्त्रयोऽङ्गजाः। शोभा कान्तिर्दीप्तिर्माधुर्यं प्रागल्भ्यमौदार्यं धैर्यमित्ययत्नजाः सप्त।

---

* सत्यं जानाति द्रष्टुं सदृशे जने युज्यते रागः।
म्रियतां न त्वां भणिष्यामि मरणमपि श्लाघनीयमस्याः॥

† मुखरेहि किं निवारक हरसि निजं वायो यद्यपि मे सिचयं।
साधयामि कस्य सुन्दर दूरे ग्रामोऽहमेका॥

लीला विलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम्।
मोट्टायितं कुट्टमितं बिब्बोको ललितं तथा।
विहृतं चेति विज्ञेया दश भावाः स्वभावजाः ॥ ३० ॥

तानेव निर्दिशति।

निर्विकारात्मकात् सत्त्वाद् भावस्तत्राऽऽद्यविक्रिया।

तत्र विकारहेतौ सत्यपि अविकारकं सत्त्वम्। यथा कुमारसम्भवे।

श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्
हरः प्रसङ्ख्यानपरो बभूव।
आत्मेश्वराणां न हि जातु विघ्नाः
समाधिभेदप्रभवो भवन्ति ॥

तस्मादविकाररूपात् सत्त्वाद् यः प्रथमो विकारोऽन्तर्विपरिवर्ती बीजस्योच्छूनतेव स भावः। यथा।

दृष्टिः सालसतां बिभर्ति न शिशुक्रीडासु बद्धादरा
श्रोत्रे प्रेषयति प्रवर्तितसखीसम्भोगवार्तास्वपि।
पुंसामङ्कमपेतशङ्कमधुना नाऽऽरोहति प्राक् यथा
बाला नूतनयौवनव्यतिकरावष्टभ्यमाना शनैः ॥

यथा वा कुमारसम्भवे।

हरस्तु किञ्चित् परिलुप्तधैर्यश्
चन्द्रोदयारम्भ इवाऽम्बुराशिः।
उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि ॥

यथा वा ममैव।

*तं च्चिअ वअणं ते च्चेअ लोअणे जोव्वणं पि तं च्चेअ।
अखा अणङ्गलच्छी अखं च्चिअ किं पि साहेइ॥

अथ हावः।

हेवाकसस्तु शृङ्गारो हावोऽक्षिभ्रूविकारकृत्॥ ३१॥

प्रतिनियताङ्गविकारकारी शृङ्गारः स्वभावविशेषो हावः। यथा ममैव।

†जं किं पि पेच्छमाणं भणमाणं रे जहा तह च्चेअ।
णिज्झाअ णेहमुद्धं वअस्स मुद्धं णिअच्छेहि॥

अथ हेला।

स एव हेला सुव्यक्तशृङ्गाररससूचिका।

हाव एव स्पष्टभ्रूयोविकारत्वात् सुव्यक्तशृङ्गाररससूचको हेला। यथा ममैव।

‡तह झत्ति से पअत्ता सव्वङ्गं विब्भमा थणुब्भेए।
संसइअवालभावा होइ चिरं जह सहीणं पि॥

अथाऽयत्नजाः सप्त। तत्र शोभा।

---

* तदेव वचनं ते चैव लोचने यौवनमपि तदेव।
अन्यानङ्गलक्ष्मीरन्यदेव किमपि साधयति॥

† यत् किमपि प्रेक्षमाणां भणमानां रे यथा तथैव।
निर्ध्याय स्नेहमुग्धां वयस्य मुग्धां पश्य॥

‡ तथा झटित्यस्याः प्रवृत्ताः सर्वाङ्गं विभ्रमाः स्तनोद्भेदे।
संशयितबालभावा भवति चिरं यथा सखीनामपि॥

रूपोपभोगतारुण्यैः शोभाऽङ्गानां विभूषणम्॥ ३२॥

यथा कुमारसम्भवे।

तां प्राङ्मुखीं तत्र निवेश्य बालां
क्षणं व्यलम्बन्त पुरो निषण्णाः।
भूतार्थशोभाह्रियमाणनेत्राः
प्रसाधने सन्निहितेऽपि नार्यः॥

इत्यादि। यथा च शाकुन्तले।

अनाघ्रातं पुष्पं किसलयमलूनं कररुहैर्
अनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः॥

अथ कान्तिः।

मन्मथाप्यायितच्छाया सैव कान्तिरिति स्मृता।

शोभैव रागावतारघनीकृता कान्तिः। यथा।

उन्मीलद्वदनेन्दुदीप्तिविसरैर्दूरे समुत्सारितं
भिन्नं पीनकुचस्थलस्य च रुचा हस्तप्रभाभिर्हतम्।
एतस्याः कलविङ्ककण्ठकदलीकल्पं मिलत्कौतुकाद्
अप्राप्ताङ्गसुखं रुषेव सहसा केशेषु लग्नं तमः॥

यथा हि महाश्वेतावर्णनावसरे भट्टबाणस्य।

अथ माधुर्यम्।

अनुल्बणत्वं माधुर्यं

यथा शाकुन्तले।

सरसिजमनुविद्धं शैवलेनाऽपि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनाऽपि तन्वी
किमिव हि मधुराणां मण्डनं नाऽऽकृतीनाम्॥

अथ दीप्तिः।

दीप्तिः कान्तेस्तु विस्तरः॥ ३३॥

यथा।

*देव्वा पसिअ णिअन्तसुमुहससिजोण्हाविलुत्ततमणिवहे।
अहिसारिआण विग्घं करेसि अण्णाण विहआसे॥

अथ प्रागल्भ्यम्।

निःसाध्वसत्वं प्रागल्भ्यं

मनःक्षोभपूर्वकोऽङ्गसादः साध्वसं तदभावः प्रागल्भ्यम्।

यथा ममैव।

तथा व्रीडाविधेयाऽपि तथा मुग्धाऽपि सुन्दरी।
कलाप्रयोगचातुर्ये सभाखाचार्यकं गता॥

अथौदार्यम्।

औदार्यं प्रश्रयः सदा।

यथा।

---

* दैवात् दृष्ट्वा नितान्तसुमुखशशिज्योत्स्नाविलुप्ततमोनिवहे।
अभिसारिकाणां विघ्नं करोषि अन्यासां विहताशे॥

*दिअहं खु दुक्खिआए सअलं काऊण गेहवावारं।
गरुएवि मण्णुदुक्खे भरिमो पाअन्तसुत्तस्स॥

यथा वा। भ्रूभङ्गे सहसोद्गतेत्यादि।

अथ धैर्यम्।

चापलाविहता धैर्यं चिद्वृत्तिरविकत्थना॥ ३४॥

चापलानुपहता मनोवृत्तिरात्मगुणानामनाख्यायिका धैर्यमिति। यथा मालतीमाधवे।

ज्वलतु गगने रात्रौ रात्रावखण्डकलः शशी
दहतु मदनः किंवा मृत्योः परेण विधास्यति।
मम तु दयितः श्लाघ्यस्तातो जनन्यमलान्वया
कुलममलिनं न त्वेवाऽयं जनो न च जीवितम्॥

अथ स्वाभाविका दश। तत्र।

प्रियानुकरणं लीला मधुराङ्गविचेष्टितैः।

प्रियकृतानां वाग्वेषचेष्टानां शृङ्गारिणीनामङ्गनाभिरनुकरणं लीला। यथा ममैव।

†तह दिट्ठं तह भणिअं ताए णिअदं तहा तहा सीणं।
अवलोइअं सइण्हं सविब्भमं जह सवत्तीहिं॥

यथा वा।

---

* दिवसं खलु दुःखितायाः सकलं कृत्वा गृहव्यापारं।
गुरुण्यपि मन्युदुःखे भरिमा पादान्ते सुप्तस्य॥

† तथा दृष्टं तथा भणितं तया नियतं तथा त थ शीर्षं।
अवलोकितं सतृष्णं सविभ्रमं यथा सपत्नीभिः॥

तेनोदितं वदति याति तथा यथाऽसौ।

इत्यादि।

अथ विलासः।

तात्कालिको विशेषस्तु विलासोऽङ्गक्रियादिषु ॥ ३५ ॥

दयितावलोकनादिकालेऽङ्गे क्रियायां वचने च सातिशय-विशेषोत्पत्तिर्विलासः। यथा मालतीमाधवे।

अत्राऽन्तरे किमपि वाग्विभवातिवृत्त-
वैचित्र्यमुल्लसितविभ्रममायताक्ष्याः।
तद् भूरिसात्त्विकविकारविशेषरम्यम्
आचार्यकं विजयि मान्मथमाविरासीत् ॥

अथ विच्छित्तिः।

आकल्परचनाऽल्पाऽपि विच्छित्तिः कान्तिपोषकृत्।

स्तोकोऽपि वेषो बहुतरकमनीयताकारी विच्छित्तिः। यथा कुमारसम्भवे।

कर्णार्पितो रोध्रकषायरूक्षे
गोरोचनाभेदनितान्तगौरे।
तस्याः कपोले परभागलाभाद्
बबन्ध चक्षूंषि यवप्ररोहः ॥

अथ विभ्रमः।

विभ्रमस्त्वरया काले भूषास्थानविपर्ययः ॥ ३६ ॥

यथा।

अभ्युद्गते शशिनि पेशलकान्तदूती-
संलापसंवलितलोचनमानसाभिः।
अग्राहि मण्डनविधिर्विपरीतभूषा-
विन्यासहासितसखीजनमङ्गनाभिः॥

यथा वा ममैव।

श्रुत्वाऽऽयातं बहिः कान्तमसमाप्तविभूषया।
भालेऽञ्जनं दृशोर्लाक्षा कपोले तिलकः कृतः॥

अथ किलकिञ्चितम्।

क्रोधाश्रुहर्षभीत्यादेः सङ्करः किलकिञ्चितम्।

यथा ममैव।

रतिक्रीडाद्यूते कथमपि समासाद्य समयं
मया लब्धे तस्याः क्वणितकलकण्ठार्धमधरे।
कृतभ्रूभङ्गाऽसौ प्रकटितविलक्षार्धरुदित-
स्मितक्रोधोद्भ्रान्तं पुनरपि विदध्यान् मयि मुखम्॥

अथ मोट्टायितम्।

मोट्टायितं तु तद्भावभावनेष्टकथादिषु॥ ३७॥

इष्टकथादिषु प्रियतमकथानुकरणादिषु प्रियानुरागेण भावितान्तःकरणत्वं मोट्टायितम्। यथा पद्मगुप्तस्य।

चित्रवर्तिन्यपि नृपे तत्त्वावेशेन चेतसि।
व्रीडार्धवलितं चक्रे मुखेन्दुमवशैव सा॥

यथा वा।

मानः कं हृदये निधाय सुचिरं रोमाञ्चिताङ्गी मुहुर्
जृम्भामन्थरतारकां सुललितापाङ्गां दधाना दृशम्।
सुप्तेवाऽऽलिखितेव शून्यहृदया लेखावशेषीभव-
त्यात्मद्रोहिणि किं ह्रिया कथय मे गूढो निहन्ति स्मरः॥

यथा वा ममैव।

स्मरदवथुनिमित्तं गूढमुन्नेतुमस्याः
सुभग तव कथायां प्रस्तुतायां सखीभिः।
भवति विततपृष्ठोदस्तपीनस्तनाग्रा
ततवलयितबाहुर्जृम्भितैः साङ्गभङ्गैः॥

अथ कुट्टमितम्।

सानन्दाऽन्तः कुट्टमितं कुप्येत् केशाधरग्रहे।

यथा।

नान्दीपदानि रतिनाटकविभ्रमाणाम्
आज्ञाक्षराणि परमाण्यथवा स्मरस्य।
दष्टेऽधरे प्रणयिना विधुताग्रपाणेः
सीत्कारशुष्करुदितानि जयन्ति नार्याः॥

अथ बिब्बोकः।

गर्वाभिमानादिष्टेऽपि बिब्बोकोऽनादरक्रिया॥ ३८॥

यथा ममैव।

सव्याजं तिलकालकान् विरलयन् लोलाङ्गुलिः संस्पृशन्
वारं वारमुदञ्चयन् कुचयुगप्रोदञ्चिनीलाञ्चलम्।
यद् भ्रूभङ्गतरङ्गिताञ्चितदृशा सावज्ञमालोकितम्

तद्गर्वादवधीरितोऽस्मि न पुनः कान्ते कृतार्थीकृतः॥

अथ ललितम्।

सुकुमाराङ्गविन्यासो मसृणो ललितं भवेत्।

यथा ममैव।

सभ्रूभङ्गं करकिसलयावर्तनैरालपन्ती
सा पश्यन्ती ललितललितं लोचनस्याऽञ्चलेन।
विन्यस्यन्ती चरणकमले लीलया स्वैरयातैर्
निःसङ्गीतं प्रथमवयसा नर्तिता पङ्कजाक्षी॥

अथ विहृतम्।

प्राप्तकालं न यद् ब्रूयाद् व्रीडया विहृतं हि तत्॥ ३९॥

प्राप्तावसरस्याऽपि वाक्यस्य लज्जया यदवचनं तद् विहृतम्। यथा।

पादाङ्गुष्ठेन भूमिं किसलयरुचिना सापदेशं लिखन्ती
भूयो भूयः क्षिपन्ती मयि सितशबले लोचने लोलतारे।
वक्त्रं ह्रीनम्रमीषत्स्फुरदधरपुटं वाक्यगर्भं दधाना
यन्मां नोवाच किञ्चित् स्थितमपि हृदये मानसं तद् दुनोति॥

अथ नेतुः कार्यान्तरसहायानाह।

मन्त्री स्वं वोभयं वाऽपि सखा तस्याऽर्थचिन्तने।

तस्य नेतुरर्थचिन्तायां तन्त्रावापादिलक्षणायां मन्त्री वाऽऽत्मा वोभयं वा सहायः।

तत्र विभागमाह।

मन्त्रिणा ललितः शेषा मन्त्रिस्वायत्तसिद्धयः ॥ ४० ॥

उक्तलक्षणो ललितो नेता मन्त्र्यायत्तसिद्धिः । शेषा धीरोदात्तादयः । अनियमेन मन्त्रिणा स्वेन वोभयेन वाऽङ्गीकृतसिद्धय इति ।

धर्मसहायास्तु ।

ऋत्विक्पुरोहितौ धर्मे तपस्विब्रह्मवादिनः ।

ब्रह्म वेदस्तं वदन्ति व्याचक्षते वा तच्छीला ब्रह्मवादिनः । आत्मज्ञानिनो वा । शेषाः प्रतीताः ।

दुष्टदमनं दण्डस्तत्सहायास्तु ।

सुहृत्कुमाराटविका दण्डे सामन्तसैनिकाः ॥ ४१ ॥

स्पष्टम् । एवं तत्तत्कार्यान्तरेषु सहायान्तराणि योज्यानि ।

यदाह ।

अन्तःपुरे वर्षवराः किराता मूकवामनाः ।
म्लेच्छाभीरशकाराद्याः स्वस्वकार्योपयोगिनः ॥ ४२ ॥

शकारो राज्ञः श्यालो हीनजातिः ।

विशेषान्तरमाह ।

ज्येष्ठमध्याधमत्वेन सर्वेषां च त्रिरूपता ।
तारतम्याद् यथोक्तानां गुणानां चोत्तमादिता ।

एवं प्रागुक्तानां नायकनायिकादूतदूतीमन्त्रिपुरोहितादीनामुत्तममध्यमाधमभावेन त्रिरूपता । उत्तमादिभावश्च न गुणसङ्ख्योपचयापचयेन किं तर्हि गुणातिशयतारतम्येन ।

एवं नाट्ये विधातव्यो नायकः सपरिच्छदः ॥ ४३ ॥

अतो नायकव्यापारस्तूच्यते।

तद्व्यापारात्मिका वृत्तिश्चतुर्धा तत्र कैशिकी।
गीतनृत्यविलासाद्यैर्मृदुः शृङ्गारचेष्टितैः।

प्रवृत्तिरूपो नेतृव्यापारस्वभावो वृत्तिः। सा च कैशिकी-सात्त्वत्यारभटीभारतीभेदाच्चतुर्विधा। तासां गीतनृत्यविलासकामोपभोगाद्युपलक्ष्यमाणो मृदुः शृङ्गारी कामफलावच्छिन्नो व्यापारः कैशिकी।

सा तु।

नर्मतत्स्फिञ्जतत्स्फोटतद्गर्भैश्चतुरङ्गिका ॥ ४४ ॥

तदित्यनेन सर्वत्र नर्म परामृश्यते।

तत्र।

वैदग्ध्यक्रीडितं नर्म प्रियोपच्छन्दनात्मकम्।
हास्येनैव सशृङ्गारभयेन विहितं त्रिधा ॥ ४५ ॥
आत्मोपक्षेपसम्भोगमानैः शृङ्गार्यपि त्रिधा।
शुद्धमङ्गं भयं द्वेधा त्रेधा वाग्वेषचेष्टितैः।
सर्वं सहास्यमित्येवं नर्माऽष्टादशधोदितम् ॥ ४६ ॥

अग्राम्य इष्टजनावर्जनरूपः परिहासो नर्म। तच्च शुद्धहास्येन सशृङ्गारहास्येन सभयहास्येन च रचितं त्रिविधम्। शृङ्गारवदपि स्वानुरागनिवेदनसम्भोगेच्छाप्रकाशनसापराधप्रियप्रतिभेदनैस्त्रिविधमेव। भयनर्माऽपि शुद्धरसान्तराङ्गभावाद्

द्विविधम्। एवं षड्विधस्य प्रत्येकं वाग्वेषचेष्टाव्यतिकरेणाऽष्टादशविधत्वम्।

तत्र वचोहास्यनर्म यथा।

पत्युः शिरश्चन्द्रकलामनेन
स्पृशेति सख्या परिहासपूर्वम्।
सा रञ्जयित्वा चरणौ कृताशीर्
माल्येन तां निर्वचनं जघान॥

वेषनर्म यथा नागानन्दे विदूषकशेखरकव्यतिकरे। क्रियानर्म यथा मालविकाग्निमित्रे उत्स्वप्नायमानस्य विदूषकस्योपरि निपुणिका सर्पभ्रमकारणं दण्डकाष्ठं पातयति। एवं वक्ष्यमाणेष्वपि वाग्वेषचेष्टापरत्वमुदाहार्यम्।

शृङ्गारवदात्मोपक्षेपनर्म यथा।

मध्याह्नं गमय त्यज श्रमजलं स्थित्वा पयः पीयतां
मा शून्येति विमुञ्च पान्थ विवशः शीतः प्रपामण्डपः।
तामेव स्मर घस्मरस्मरशरत्रस्तां निजप्रेयसीं
त्वच्चित्तं तु न रञ्जयन्ति पथिक प्रायः प्रपापालिकाः॥

सम्भोगनर्म यथा।

*सालोए च्चिअ सूरे घरिणी घरसामिअस्स घेत्तूण।
णेच्छन्तस्स वि पाए धुअइ हसन्ती हसन्तस्स॥

माननर्म यथा।

---

* सालोके एव सूर्ये गृहिणी गृहस्वामिकस्य गृहीत्वा।
अनिच्छतोऽपि पादौ धुनोति हसन्ती हसतः॥

तदवितथमवादीर्यन् मम त्वं प्रियेति
प्रियजनपरिभुक्तं यद् दुकूलं दधानः।
मदधिवसति मागाः कामिनां मण्डनश्रीर्
व्रजति हि सफलत्वं वल्लभालोकनेन ॥

भयनर्म यथा रत्नावल्यामालेख्यदर्शनावसरे। सुसङ्गता। *जाणिदो मए एसो सव्वो वुत्तन्तो समं चित्तफलहएण ता देवीए णिवेदइस्समित्यादि।

शृङ्गाराङ्गं भयनर्म। यथा ममैव।

अभिव्यक्तालीकः सकलविफलोपायविभवश्
चिरं ध्यात्वा सद्यः कृतकृतकसंरम्भनिपुणम्।
इतः पृष्ठे पृष्ठे किमिदमिति सन्त्रास्य सहसा
कृताश्लेषं धूर्तः स्मितमधुरमालिङ्गति वधूम् ॥

अथ नर्मस्फिञ्जः।

नर्मस्फिञ्जः सुखारम्भो भयान्तो नवसङ्गमे।

यथा मालविकाग्निमित्रे सङ्केते नायकमभिसृतायां नायिकायां नायकः।

विसृज सुन्दरि सङ्गमसाध्वसं
ननु चिरात् प्रभृति प्रणयोन्मुखे।
परिगृहाण गते सहकारतां
त्वमतिमुक्तलताचरितं मयि ॥

---

* ज्ञातो मयैव सर्वो वृत्तान्तः सह चित्रफलकेन तत् देव्यै निवेदयिष्यामि।

मालविका। *भट्टा देवीए भयेण अत्तणो वि पिअं कादुं ण पारेमीत्यादि।

अथ नर्मस्फोटः।

नर्मस्फोटस्तु भावानां सूचितोऽल्परसो लवैः॥ ४७॥

यथा मालतीमाधवे। मकरन्दः।

गमनमलसं शून्या दृष्टिः शरीरमसौष्ठवं
श्वसितमधिकं किं न्वेतत् स्यात् किमन्यदतोऽथ वा।
भ्रमति भुवने कन्दर्पाज्ञा विकारि च यौवनं
ललितमधुरास्ते ते भावाः क्षिपन्ति च धीरताम्॥

इत्यत्र गमनादिभिर्भावलेशैर्माधवस्य मालत्यामनुरागः स्तोकः प्रकाश्यते।

अथ नर्मगर्भः।

छन्ननेतृप्रतीचारो नर्मगर्भोऽर्थहेतवे।
अङ्गैः सहास्यनिर्हास्यैरेभिरेषाऽत्र कैशिकी॥ ४८॥

यथाऽमरुशतके।

दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्याऽऽदराद्
एकस्या नयने निमील्य विहितक्रीडानुबन्धच्छलः।
ईषद्वक्रितकन्धरः सपुलकः प्रेमोल्लसन्मानसाम्
अन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति॥

---

* भर्तः, देव्या भयेनात्मनोऽपि प्रियं कर्तुं न पारयामि।

यथा प्रियदर्शिकायां गर्भाङ्के वत्सराजवेषसुसङ्गतास्थाने साक्षाद् वत्सराजप्रवेशः।

अथ सात्त्वती।

विशोका सात्त्वती सत्त्वशौर्यत्यागदयार्जवैः।
संलापोत्थापकावस्थां साङ्घात्यः परिवर्तकः॥ ४९ ॥

शोकहीनः सत्त्वशौर्यत्यागदयाहर्षादिभावोत्तरो नायकव्यापारः सात्त्वती। तदङ्गानि च संलापोत्थापकसाङ्घात्यपरिवर्तकाख्यानि।

तत्र।

संलापको गभीरोक्तिर्नानाभावरसा मिथः।

यथा वीरचरिते। रामः। अयं स यः किल सपरिवारकार्त्तिकेयविजयावर्जितेन भगवता नीललोहितेन परिवत्सरसहस्रान्तेवासिने तुभ्यं प्रसादीकृतः परशुः। परशुरामः। राम राम दाशरथे स एवाऽयमाचार्यपादानां प्रियः परशुः।

अस्त्रप्रयोगखुरलीकलहे गणानां
सैन्यैर्वृतो विजित एव मया कुमारः।
एतावताऽपि परिरभ्य कृतप्रसादः
प्रादादमुं प्रियगुणो भगवान् गुरुर्मे॥

इत्यादिनानाप्रकारभावरसेन रामपरशुरामयोरन्योन्यगभीरवचसा संलाप इति।

अथोत्थापकः।

उत्थापकस्तु यत्राऽऽदौ युद्धायोत्थापयेत् परम्॥ ५०॥

यथा वीरचरिते।

आनन्दाय च विस्मयाय च मया दृष्टोऽसि दुःखाय वा
वैतृष्ण्यं नु कुतोऽद्य सम्प्रति मम त्वद्दर्शने चक्षुषः।
त्वत्साङ्गत्यसुखस्य नाऽस्मि विषयः किं वा बहुव्याहृतैर्
अस्मिन् विश्रुतजामदग्न्यविजये बाहौ धनुर्जृम्भताम्॥

अथ साङ्घात्यः।

मन्त्रार्थदैवशक्त्यादेः साङ्घात्यः सङ्घभेदनम्।

मन्त्रशक्त्या। यथा मुद्राराक्षसे राक्षससहायादीनां चाणक्येन स्वबुद्ध्या भेदनम्। अर्थशक्त्या तत्रैव। यथा पर्वतकाभरणस्य राक्षसहस्तगमनेन मलयकेतुसहोत्थायिभेदनम्। दैवशक्त्या तु। यथा रामायणे रामस्य दैवशक्त्या रावणाद् विभीषणस्य भेद इत्यादि।

अथ परिवर्तकः।

प्रारब्धोत्थानकार्यान्यकरणात् परिवर्तकः॥ ५१॥

प्रस्तुतस्योद्योगकार्यस्य परित्यागेन कार्यान्तरकरणं परिवर्तकः। यथा वीरचरिते।

हेरम्बदन्तमुसलोल्लिखितैकभित्ति-
वक्षो विशाखविशिखव्रणलाञ्छनं मे।
रोमाञ्चकञ्चुकितमद्भुतवीरलाभाद्
यत् सत्यमद्य परिरब्धुमिवेच्छति त्वाम्॥

रामः। भगवन् परिरम्भणमिति प्रस्तुतप्रतीपमेतदित्यादि।

सात्त्वतीमुपसंहरन्नारभटीलक्षणमाह।

एभिरङ्गैश्चतुर्धेयं सात्त्वत्यारभटी पुनः।
मायेन्द्रजालसङ्ग्रामक्रोधोद्भ्रान्तादिचेष्टितैः।
संक्षिप्तिका स्यात् सम्फेटो वस्तूत्थानावपातने॥ ५२॥

मायामन्त्रबलेनाऽविद्यमानवस्तुप्रकाशनम्। तन्त्रबलादिन्द्रजालम्।

तत्र।

संक्षिप्तवस्तुरचना संक्षिप्तिः शिल्पयोगतः।
पूर्वनेतृनिवृत्त्याऽन्ये नेत्रन्तरपरिग्रहः॥ ५३॥

मृद्वंशदलचर्मादिद्रव्ययोगेन वस्तूत्थापनं संक्षिप्तिः। यथोदयनचरिते किलिञ्जहस्तिप्रयोगः। पूर्वनायकावस्थानिवृत्त्याऽवस्थान्तरपरिग्रहमन्ये संक्षिप्तिकां मन्यन्ते। यथा वालिनिवृत्त्या सुग्रीवः। यथा च परशुरामस्योद्धत्यनिवृत्त्या शान्तत्वापादनं पुण्या ब्राह्मणजातिरित्यादिना।

अथ सम्फेटः।

सम्फेटस्तु समाघातः क्रुद्धसंरब्धयोर्द्वयोः।

यथा माधवाघोरघण्टयोर्मालतीमाधवे। इन्द्रजिल्लक्ष्मणयोश्च रामायणप्रतिबद्धवस्तुषु।

अथ वस्तूत्थापनम्।

मायाद्युत्थापितं वस्तु वस्तूत्थापनमिष्यते।

यथोदात्तराघवे।

जीयन्ते जयिनोऽपि सान्द्रतिमिरव्रातैर्वियद्व्यापिभिर्
भास्वन्तः सकला रवेरपि रुचः कस्मादकस्मादमी।
एताश्चोग्रकबन्धरन्ध्ररुधिरैराध्मायमानोदरा
मुञ्चन्त्याननकन्दरानलमुचस्तीव्रा रवाः फेरवाः॥

इत्यादि।

अथाऽवपातः।

अवपातस्तु निष्क्रामप्रवेशत्रासविद्रवैः॥ ५४॥

यथा रत्नावल्याम्।

कण्ठे कृत्वाऽवशेषं कनकमयमधः शृङ्खलादाम कर्षन्
क्रान्त्वा द्वाराणि हेलावलचरणवलत्किङ्किणीचक्रवालः।
दत्तातङ्को गजानामनुसृतसरणिः सम्भ्रमादश्वपालैः
प्रभ्रष्टोऽयं प्लवङ्गः प्रविशति नृपतेर्मन्दिरं मन्दुरातः॥
नष्टं वर्षवरैर्मनुष्यगणनाभावादकृत्वा त्रपाम्
अन्तः कञ्चुकि कञ्चुकस्य विशति त्रासादयं वामनः।
पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं
कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः।

यथा च प्रियदर्शनायां प्रथमेऽङ्के विन्ध्यकेतवस्कन्दे।

उपसंहरति।

एभिरङ्गैश्चतुर्धेयं नाऽर्थवृत्तिरतः परा।
चतुर्थी भारती साऽपि वाच्या नाटकलक्षणे॥ ५५॥

कैशिकीं सात्त्वतीं चाऽर्थवृत्तिमारभटीमिति।
पठन्तः पञ्चमीं वृत्तिमौद्भटाः प्रतिजानते ॥ ५६ ॥

सा तु लक्ष्ये क्वचिदपि न दृश्यते न चोपपद्यते रसेषु हास्यादीनां भारत्यात्मकत्वात्। नीरसस्य च काव्यार्थस्य चाऽभावात्। तिस्र एवैता अर्थवृत्तयः। भारती तु शब्दवृत्तिरामुखसङ्गत्वात् तत्रैव वाच्या।

वृत्तिनियममाह।

शृङ्गारे कैशिकी वीरे सात्त्वत्यारभटी पुनः।
रसे रौद्रे च बीभत्से वृत्तिः सर्वत्र भारती ॥ ५७ ॥

देशभेदभिन्नवेषादिस्तु नायकादिव्यापारः प्रवृत्तिरित्याह।

देशभाषाक्रियावेषलक्षणाः स्युः प्रवृत्तयः।
लोकादेवाऽवगम्यैता यथौचित्यं प्रयोजयेत् ॥ ५८ ॥

तत्र पाठ्यं प्रति विशेषः।

पाठ्यं तु संस्कृतं नृणामनीचानां कृतात्मनाम्।
लिङ्गिनीनां महादेव्या मन्त्रिजावेश्ययोः क्वचित् ॥ ५९ ॥

क्वचिदिति देवीप्रभृतीनां सम्बन्धः।

स्त्रीणां तु प्राकृतं प्रायः शूरसेन्यधमेषु च।

प्रकृतेरागतं प्राकृतम्। प्रकृतिः संस्कृतं तद्भवं तत्समं देशीत्यनेकप्रकारम्। शूरसेनी मागधी च स्वशास्त्रनियते।

पिशाचात्यन्तनीचादौ पैशाचं मागधं तथा ॥ ९० ॥
यद्देशं नीचपात्रं यत् तद्देशं तस्य भाषितम्।
कार्यतश्चोत्तमादीनां कार्यो भाषाव्यतिक्रमः ॥ ९१ ॥

स्पष्टार्थमेतत्।

आमन्त्र्यामन्त्रकौचित्येनाऽऽमन्त्रणमाह।

भगवन्तो वरैर्वाच्या विद्वद्देवर्षिलिङ्गिनः।
विप्रामात्याग्रजाश्चाऽऽर्या नटीसूत्रभृतौ मिथः ॥ ९२ ॥

आर्याविति सम्बन्धः।

रथी सूतेन चाऽऽयुष्मान् पूज्यैः शिष्यात्मजानुजाः।
वत्सेति तातः पूज्योऽपि सुगृहीताभिधस्तु तैः ॥ ९३ ॥

अपिशब्दात् पूज्येन शिष्यात्मजानुजास्तातेति वाच्याः। सोऽपि तैस्तातेति सुगृहीतनामा चेति।

भावोऽनुगेन सूत्री च मार्षेत्येतेन सोऽपि च।

सूत्रधारः पारिपार्श्वकेन भाव इति वक्तव्यः। स च सूत्रिणा मार्ष इति।

देवः स्वामीति नृपतिर्भृत्यैर्भट्टेति चाऽधमैः ॥ ९४ ॥
आमन्त्रणीयाः पतिवज् ज्येष्ठमध्याधमैः स्त्रियः।

विद्वद्देवादिस्त्रियो भर्तृवदेव देवरादिभिर्वाच्याः।

तत्र स्त्रियं प्रति विशेषः।

समा हलेति प्रेष्या च हञ्जे वेश्याऽज्जुका तथा ॥ ६५ ॥
कुट्टिन्यम्बेत्यनुगतैः पूज्या वा जरती जनैः ।
विदूषकेण भवती राज्ञी चेटीति शब्द्यते ॥ ६६ ॥

पूज्या जरती अम्बेति। स्पष्टमन्यत्।

चेष्टागुणोदाहृतिसत्त्वभावान्
अशेषतो नेतृदशाविभिन्नान्।
को वक्तुमीशो भरतो न यो वा
यो वा न देवः शशिखण्डमौलिः॥ ६७ ॥

दिङ्मात्रं दर्शितमित्यर्थः। [चेष्टा लीलाद्याः गुणा विनयाद्याः उदाहृतयः संस्कृतप्राकृताद्या उक्तयः सत्त्वं निर्विकारात्मकं मनो भावः सत्त्वस्य प्रथमोविकारः तेन हावादयोऽप्युपलक्षिताः।]

इति श्रीविष्णुसूनोर्धनिकस्य कृतौ दशरूपावलोके नेतृप्रकाशो नाम द्वितीयप्रकाशः समाप्तः।

बहुवक्तव्यतया रसविचारातिलङ्घनेन वस्तुनेतृरसानां विभज्य नाटकादिषूपयोगः प्रतिपाद्यते।

प्रकृतित्वादथाऽन्येषां भूयोरसपरिग्रहात्।
सम्पूर्णलक्षणत्वाच्च पूर्वं नाटकमुच्यते॥ १॥

उद्दिष्टधर्मकं हि नाटकमनुद्दिष्टधर्माणां प्रकरणादीनां प्रकृतिः। शेषं प्रतीतम्।

तत्र।

पूर्वरङ्गं विधायाऽऽदौ सूत्रधारे विनिर्गते।
प्रविश्य तद्वदपरः काव्यमास्थापयेन्नटः॥ २॥

पूर्वं रज्यतेऽस्मिन्निति पूर्वरङ्गो नाट्यशाला। तत्स्थप्रथमप्रयोगव्युत्थापनादौ पूर्वरङ्गता। तं विधाय विनिर्गते प्रथमं सूत्रधारे तद्वदेव वैष्णवस्थानकादिना* प्रविश्याऽन्यो नटः काव्यार्थं स्थापयेत्। स च काव्यार्थस्थापनात् सूचनात् स्थापकः।

दिव्यमर्त्ये स तद्रूपो मिश्रमन्यतरस्तयोः।
सूचयेद्वस्तु बीजं वा मुखं पात्रमथाऽपि वा॥ ३॥

स स्थापको दिव्यं वस्तु दिव्यो भूत्वा मर्त्यं च मर्त्यरूपो भूत्वा मिश्रं च दिव्यमर्त्ययोरन्यतरो भूत्वा सूचयेत्। वस्तु बीजं मुखं पात्रं वा। वस्तु यथोदात्तराघवे।

---

* दीर्घपादविक्षेपेण परिक्रमो वैष्णवस्थानकम्। आदिशब्दात् ताण्डवादिना परिक्रमो रौद्रमिति कस्यचित् टिप्पणी।

रामो मूर्ध्नि निधाय काननमगान् मालामिवाऽऽज्ञां गुरोस्
तद्भक्त्या भरतेन राज्यमखिलं मात्रा सहैवोज्झितम्।
तौ सुग्रीवविभीषणावनुगतौ नीतौ परां सम्पदं
प्रोद्वृत्ता दशकन्धरप्रभृतयो ध्वस्ताः समस्ता द्विषः॥

बीजं यथा रत्नावल्याम्।

द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात्।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः॥

मुखं यथा।

आसादितप्रकटनिर्मलचन्द्रहासः
प्राप्तः शरत्समय एष विशुद्धकान्तः।
उत्खाय गाढतमसं घनकालमुग्रं
रामो दशास्यमिव सम्भृतबन्धुजीवः॥

पात्रं यथा शाकुन्तले।

तवाऽस्मि गीतरागेण हारिणा प्रसभं हृतः।
एष राजेव दुष्यन्तः सारङ्गेणाऽतिरंहसा॥

रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः।
ऋतुं कञ्चिदुपादाय भारतीं वृत्तिमाश्रयेत्॥ ४॥

रङ्गस्य प्रशस्तिं काव्यार्थानुगतार्थैः श्लोकैः कृत्वा।

औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया
तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताऽऽभिमुख्यं पुनः।

दृष्ट्वाऽग्रे वरमात्तसाध्वसरसा गौरी नवे सङ्गमे
संरोहत्पुलका हरेण हसता श्लिष्टा शिवा पातु वः॥

इत्यादिभिरेव भारतीं वृत्तिमाश्रयेत्।

सा तु।

भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः।
भेदैः प्ररोचनायुक्तैर्वीथीप्रहसनामुखैः॥ ५॥

पुरुषविशेषप्रयोज्यः संस्कृतबहुलो वाक्प्रधानो नटाश्रयो व्यापारो भारती। प्ररोचना वीथीप्रहसनामुखानि चाऽस्या-मङ्गानि।

यथोद्देशं लक्षणमाह।

उन्मुखीकरणं तत्र प्रशंसातः प्ररोचना।

प्रस्तुतार्थप्रशंसनेन श्रोतॄणां प्रवृत्त्युन्मुखीकरणं प्ररोचना। यथा रत्नावल्याम्।

श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी
लोके हारि च वत्सराजचरितं नाट्ये च दक्षा वयम्।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुनर्
मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः॥

वीथी प्रहसनं चाऽपि स्वप्रसङ्गेऽभिधास्यते।
वीथ्यङ्गान्यामुखाङ्गत्वादुच्यन्तेऽत्रैव तत् पुनः॥ ६॥

सूत्रधारो नटीं ब्रूते मार्षं वाऽथ विदूषकम्।
स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्या यत् तदामुखम्॥ ७॥

प्रस्तावना वा तत्र स्युः कथोद्घातः प्रवृत्तकम्।
प्रयोगातिशयश्चाऽथ वीथ्यङ्गानि त्रयोदश॥ ८॥

तत्र कथोद्घातः।

स्वेतिवृत्तसमं वाक्यमर्थं वा यत्र सूत्रिणः।
गृहीत्वा प्रविशेत् पात्रं कथोद्घातो द्विधैव सः॥ ९॥

वाक्यं यथा रत्नावल्याम्। यौगन्धरायणः। द्वीपादन्यस्मादपीति। वाक्यार्थं यथा वेणीसंहारे। भीमः।

निर्वाणवैरिदहनाः प्रशमादरीणां
नन्दन्तु पाण्डुतनयाः सह केशवेन।
रक्तप्रसाधितभुवः क्षतविग्रहाश्च
स्वस्था भवन्तु कुरुराजसुताः सभृत्याः॥

ततोऽर्थेनाऽऽह। भीमः।

लाक्षागृहानलविषान्नसभाप्रवेशैः
प्राणेषु वित्तनिचयेषु च नः प्रहृत्य।
आकृष्टपाण्डववधूपरिधानकेशाः
स्वस्था भवन्तु मयि जीवति धार्तराष्ट्राः॥

अथ प्रवृत्तकम्।

कालसाम्यसमाक्षिप्तप्रवेशः स्यात् प्रवृत्तकम्।

प्रवृत्तकालसमानगुणवर्णनया सूचितपात्रप्रवेशः प्रवृत्तकं यथा।

आसादितप्रकटनिर्मलचन्द्रहासः
प्राप्तः शरत्समय एष विशुद्धकान्तः।

उत्खाय गाढतमसं घनकालमुग्रं
रामो दशास्यमिव सम्भृतबन्धुजीवः ॥

ततः प्रविशति यथानिर्दिष्टो रामः।

अथ प्रयोगातिशयः।

एषोऽयमित्युपक्षेपात् सूत्रधारप्रयोगतः।
पात्रप्रवेशो यत्रैष प्रयोगातिशयो मतः ॥ १० ॥

यथा एष राजेव दुष्यन्त इति।

अथ वीथ्यङ्गानि।

उद्घात्यकावलगिते प्रपञ्चत्रिगते छलम्।
वाक्केल्यधिबले गण्डमवस्यन्दितनालिके।
असत्प्रलापव्याहारमृदवानि त्रयोदश ॥ ११ ॥

तत्र।

गूढार्थपदपर्यायमाला प्रश्नोत्तरस्य वा।
यत्राऽन्योन्यं समालापो द्वेधोद्घात्यं तदुच्यते ॥ १२ ॥

गूढार्थं पदं तत्पर्यायश्चेत्येवं माला। प्रश्नोत्तरं चेत्येवं वा माला। द्वयोरुक्तिप्रत्युक्ती तद् द्विविधमुद्घात्यकम्। तत्राऽऽद्यं विक्रमोर्वश्यां यथा। विदूषकः। *भो वअस्स को एसो कामो जेण तुमं पि दूमिज्जसे सो किं पुरिसो आदु इत्थिअत्ति। राजा। सखे।

---

* भो वयस्य क एष कामो येन त्वमपि दूयसे स किं पुरुषोऽथवा स्त्रीति।

मनोजातिरनाधीना सुखेष्वेव प्रवर्तते ।
स्नेहस्य ललितो मार्गः काम इत्यभिधीयते ॥

विदूषकः । *एवं पि ण जाणे । राजा । वयस्य इच्छाप्रभवः स इति । विदूषकः । †किं जो जं इच्छदि सो तं कामेदि-त्ति। राजा। अथ किम्। विदूषकः। ‡ता जाणिदं जह अहं सूअआरसालाए भोअणं इच्छामि ।

द्वितीयं यथा पाण्डवानन्दे ।

का श्लाघ्या गुणिनां क्षमा परिभवः को यः स्वकुल्यैः कृतः।
किं दुःखं परसंश्रयो जगति कः श्लाघ्यो य आश्रीयते ।
को मृत्युर्व्यसनं शुचं जहति के यैर्निर्जिताः शत्रवः
कैर्विज्ञातमिदं विराटनगरे छन्नस्थितैः पाण्डवैः ॥

अथाऽवलगितम् ।

यत्रैकत्र समावेशात् कार्यमन्यत् प्रसाध्यते ।
प्रस्तुतेऽन्यत्र वाऽन्यत् स्यात् त चाऽवलगितं द्विधा ॥ १३ ॥

तत्राऽऽद्यं यथोत्तरचरिते। समुत्पन्नवनविहारगर्भदोहदायाः सीताया दोहदकार्ये अनुप्रविश्य जनापवादादरण्ये त्यागः। द्वितीयं यथा छलितरामे। रामः। लक्ष्मण तात वियुक्तामयोध्यां विमानस्थो नाऽहं प्रवेष्टुं शक्नोमि। तदवतीर्य गच्छामि ।

---

* एवमपि न जानामि ।
† किं यो यदिच्छति स तत् कामयतीति ।
‡ तज्ज्ञातं यथाहं सूपकारशालायां भोजनमिच्छामि ।

कोऽपि सिंहासनस्याऽधः स्थितः पादुकयोः पुरः ।
जटावानक्षमाली च चामरी च विराजते ॥

इति भरतदर्शनकार्यसिद्धिः ।

अथ प्रपञ्चः ।

असद्भूतमिथःस्तोत्रं प्रपञ्चो हास्यकृन् मतः ।

असद्भूतेनाऽर्थेन पारदार्यादिनैपुणादिना याऽन्योन्यस्तुतिः स प्रपञ्चः । यथा कर्पूरमञ्जर्याम् । भैरवानन्दः ।

*रण्डा चण्डा दिक्खिदा धम्मदारा मज्जं मंसं पिज्जए खज्जए अ ।
भिक्खा भोज्जं चम्मखण्डं च सेज्जा कोलो धम्मो कस्स णो होइ रम्मो ॥

अथ त्रिगतम् ।

श्रुतिसाम्यादनेकार्थयोजनं त्रिगतं त्विह ।
नटादित्रितयालापः पूर्वरङ्गे तदिष्यते ॥ १४ ॥

यथा विक्रमोर्वश्याम् ।

मत्तानां कुसुमरसेन षट्पदानां
शब्दोऽयं परभृतनाद एष धीरः ।
कैलासे सुरगणसेविते समन्तात्
किन्नर्यः कलमधुराक्षरं प्रगीताः ॥

अथ छलनम् ।

---

* रण्डा चण्डा दीक्षिता धर्मदारा मद्यं मांसं पीयते खाद्यते च ।
भिक्षा भोज्यं चर्मखण्डञ्च शय्या कौलो धर्मः कस्य न भवति रम्यः ॥

प्रियाभैरप्रियैर्वाक्यैर्विलोभ्य छलना छलम् ।

यथा वेणीसंहारे । भीमार्जुनौ ।

कर्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽभिमानी
राजा दुःशासनादेर्गुरुरनुजशतस्याऽङ्गराजस्य मित्रम् ।
कृष्णाकेशोत्तरीयव्यपनयनपटुः पाण्डवा यस्य दासाः
क्वाऽऽस्ते दुर्योधनोऽसौ कथयत पुरुषा द्रष्टुमभ्यागतौ स्वः ॥

अथ वाक्केली ।

विनिवृत्त्याऽस्य वाक्केली द्विस्त्रिः प्रत्युक्तितोऽपि वा ॥ १५ ॥

अस्येति वाक्यस्य प्रक्रान्तस्य साकाङ्क्षस्य विनिवर्तनं वाक्केली । द्विस्त्रिर्वा उक्तिप्रत्युक्तयः । तत्राऽऽद्या यथोत्तरचरिते । वासन्ती ।

त्वं जीवितं त्वमसि मे हृदयं द्वितीयं
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे ।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां
तामेव शान्तमथवा किमतः परेण ॥

उक्तिप्रत्युक्तितो यथा रत्नावल्याम् । विदूषकः । *भोदि मअणिए मं पि एदं चच्चरिं सिक्खावेहि । मदनिका । हदास ण क्खु एसा चच्चरी दुवदिखण्डअं क्खु एदम् । विदूषकः । भोदि किं एदिणा खण्डेण मोदआ करीअन्ति । मदनिका । ण हि पढीअदि क्खु एदमित्यादि ।

---

* भवति मदनिके मामप्येतां चर्चरीं शिक्षय ।—हताश न खलु एषा चर्चरी द्विपदीखण्डकं खल्वेतत् ।—भवति किमेतेन खण्डेन मोदकाः क्रियन्ते ।—न हि, पठ्यते खल्वेतत् ।

अथाऽधिवलम्।

अन्योन्यवाक्याधिक्योक्तिः स्पर्धयाऽधिवलं भवेत्।

यथा वेणीसंहारे। अर्जुनः।

सकलरिपुजयाशा यत्र बद्धा सुतैस्ते
तृणमिव परिभूतो यस्य गर्वेण लोकः।
रणशिरसि निहन्ता तस्य राधासुतस्य
प्रणमति पितरौ वां मध्यमः पाण्डुपुत्रः॥

इत्युपक्रमे। राजा। अरे नाऽहं भवानिव विकत्थनाप्रगल्भः। किन्तु।

द्रक्ष्यन्ति न चिरात् सुप्तं बान्धवास्त्वां रणाङ्गणे।
मद्गदाभिन्नवक्षोस्थिवेणिकाभङ्गभीषणम्॥

इत्यन्तेन भीमदुर्योधनयोरन्योन्यवाक्यस्याऽऽधिक्योक्तिरधिवलम्।

अथ गण्डः।

गण्डः प्रस्तुतसम्बन्धिभिन्नार्थं सहसोदितम्॥ १६॥

यथोत्तरचरिते। रामः।

इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयोर्
असावस्याः स्पर्शो वपुषि बहलश्चन्दनरसः।
अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः॥

प्रविश्य प्रतीहारी। *देव उअत्थिदो। रामः। अयि कः। प्रतीहारी। देवस्स आसण्णपरिचारओ दुम्मुहो इति।

अथाऽवस्यन्दितम्।

रसोक्तस्याऽन्यथा व्याख्या यत्राऽवस्यन्दितं हि तत्।

यथा छलितरामे। सीता। †जाद कल्लं क्खु तुम्हेहिं अज्झाए गन्तव्वं। तहिं सो राआ विणएण णमिदव्वो। लवः। अम्ब किमावाभ्यां राजोपजीविभ्यां भवितव्यम्। सीता। जाद सो क्खु तुम्हाणं पिदा। लवः। किमावयो रघुपतिः पिता। सीता। साशङ्कम्। जाद ण क्खु परं तुम्हाणं सअलाए ज्जेव पुहवीए इति।

अथ नालिका।

सोपहासा निगूढार्था नालिकैव प्रहेलिका॥ १७॥

यथा मुद्राराक्षसे। चरः। ‡हंहो वह्मण मा कुप्प। किं पि तुह उअज्झाओ जाणादि किं पि अम्हारिसा जणा जाणन्ति। शिष्यः। किमस्मदुपाध्यायस्य सर्वज्ञत्वमपहर्तुमिच्छसि। चरः। यदि दे उवज्झाओ सव्वं जाणादि ता जाणादु दाव कस्स चन्दो अणभिप्पेदोत्ति। शिष्यः। किमनेन ज्ञातेन भवतीत्युपक्रमे।

* देव, उपस्थितः।—देवस्यासन्नपरिचारको दुर्मुखः।

† जात, कल्यं खलु युवाभ्यामयोध्यायां गन्तव्यं तर्हि स राजा विनयेन नमितव्यः।—जात स खलु युवयोः पिता।—जात न खलु परं युवयोः सकलाया एव पृथिव्याः।

‡ हंहो ब्राह्मण मा कुप्य किमपि तवोपाध्यायो जानाति किमप्यस्मादृशा जना जानन्ति।—यदि त उपाध्यायः सर्वं जानाति तज्जानातु तावत् कस्य चन्द्रोऽनभिप्रेत इति।

चाणक्यः। चन्द्रगुप्तादपरक्तान् पुरुषान् जानामीत्युक्तं भवति।

अथाऽसत्प्रलापः।

असम्बद्धकथाप्रायोऽसत्प्रलापो यथोत्तरः।

ननु चाऽसम्बद्धार्थत्वेऽसङ्गतिर्नाम वाक्यदोष उक्तः। तन्न। उत्स्वप्नायितमदोन्मादशैशवादीनामसम्बद्धप्रलापितैव विभावः। यथा।

अर्चिष्मन्ति विदार्य वक्त्रकुहराण्यासृक्कतो वासुकेर्
अङ्गुल्या विषकर्बुरान् गणयतः संस्पृश्य दन्ताङ्कुरान्।
एकं त्रीणि नवाऽष्ट सप्तषडिति प्रध्वस्तसङ्ख्याक्रमा
वाचः क्रौञ्चरिपोः शिशुत्वविकलाः श्रेयांसि पुष्णन्तु वः॥

यथा च।

हंस प्रयच्छ मे कान्तां गतिस्तस्यास्त्वया हृता।
विभावितैकदेशेन देयं यदभियुज्यते॥

यथा वा।

भुक्ता हि मया गिरयः स्नातोऽहं वह्निना पिबामि वियत्।
हरिहरहिरण्यगर्भा मत्पुत्रास्तेन नृत्यामि॥

अथ व्याहारः।

अन्यार्थमेव व्याहारो हास्यलोभकरं वचः।

यथा मालविकाग्निमित्रे लास्यप्रयोगावसाने। मालविका

निर्गन्तुमिच्छति । विदूषकः । *मा दाव उवएससुद्धा गमिस्ससीत्युपक्रमे गणदासः । विदूषकं प्रति । आर्य उच्यतां यस्त्वया क्रमभेदो लक्षितः । विदूषकः । †पढमं पच्चूसे बम्हणस्स पूआ भोदि सा तए लङ्घिदा । मालविका स्मयत इत्यादिना नायकस्य विश्रब्धनायिकादर्शनप्रयुक्तेन हास्यलोभकारिणा वचनेन व्याहारः ।

अथ मृदवम् ।

दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत् ॥ १८ ॥

यथा शाकुन्तले ।

मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः
सत्त्वानामुपलक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः ।
उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले
मिथ्यैव व्यसनं वदन्ति मृगयामीदृग् विनोदः कुतः ॥

इति मृगयादोषस्य गुणीकारः ।

यथा च ।

सततमनिर्वृतमानसमायाससहस्रसङ्कुलक्लिष्टम् ।
गतनिद्रमविश्वासं जीवति राजा जिगीषुरयम् ॥

इति राज्यगुणस्य दोषीभावः ।

उभयं वा ।

---

* मा तावदुपदेशशुद्धा गमिष्यसि ।
† प्रथमं प्रत्यूषे ब्राह्मणस्य पूजा भवति सा तया लङ्घिता ।

सन्तः सच्चरितोदयव्यसनिनः प्रादुर्भवद्यन्त्रणाः
सर्वत्रैव जनापवादचकिता जीवन्ति दुःखं सदा।
अव्युत्पन्नमतिः कृतेन न सता नैवाऽसता व्याकुलो
युक्तायुक्तविवेकशून्यहृदयो धन्यो जनः प्राकृतः॥

इति प्रस्तावनाङ्गानि।

एषामन्यतमेनाऽर्थं पात्रं चाऽऽक्षिप्य सूत्रभृत्।
प्रस्तावनान्ते निर्गच्छेत् ततो वस्तु प्रपञ्चयेत्॥ १९॥

तत्र।

अभिगम्यगुणैर्युक्तो धीरोदात्तः प्रतापवान्।
कीर्तिकामो महोत्साहस्त्रय्यास्त्राता महीपतिः॥ २०॥
प्रख्यातवंशो राजर्षिर्दिव्यो वा यत्र नायकः।
तत्प्रख्यातं विधातव्यं वृत्तमत्राऽऽधिकारिकम्॥ २१॥

यत्रेतिवृत्ते सत्यवागसंवादकारिनीतिशास्त्रप्रसिद्धाभिगामिकादिगुणयुक्तो रामायणमहाभारतादिप्रसिद्धो धीरोदात्तो राजर्षिर्दिव्यो वा नायकः तत्प्रख्यातमेवाऽत्र नाटके आधिकारिकं वस्तु विधेयमिति।

यत् तत्राऽनुचितं किञ्चिन् नायकस्य रसस्य वा।
विरुद्धं तत् परित्याज्यमन्यथा वा प्रकल्पयेत्॥ २२॥

यथा छद्मना वालिवधो मायुराजेनोदात्तराघवे परित्यक्तः। वीरचरिते तु रावणसौहृदेन वाली रामवधार्थमागतो रामेण हत इत्यन्यथा कृतः।

आद्यन्तमेवं निश्चित्य पञ्चधा तद् विभज्य च।
खण्डशः सन्धिसञ्ज्ञांश्च विभागानपि खण्डयेत्॥ २३॥

अनौचित्यरसविरोधपरिहारपरिशुद्धीकृतसूचनीयदर्शनीयवस्तुविभागफलानुसारेणोपक्रान्तबीजबिन्दुपताकाप्रकरीकार्यलक्षणार्थप्रकृतिकं पञ्चावस्थानुगुणेन पञ्चधा विभजेत्। पुनरपि चैकैकस्य भागस्य द्वादश त्रयोदश चतुर्दशेत्येवमङ्गसञ्ज्ञानां सन्धीनां विभागान् कुर्यात्।

चतुःषष्टिस्तु तानि स्युरङ्गानीत्यपरं तथा।
पताकावृत्तमप्यूनमेकाद्यैरनुसन्धिभिः।
अङ्गान्यत्र यथालाभमसन्धिं प्रकरीं न्यसेत्॥ २४॥

अपरमपि प्रासङ्गिकमितिवृत्तमेकाद्यैरनुसन्धिभिर्न्यूनमिति प्रधानेतिवृत्तादेकद्वित्रिचतुर्भिरनुसन्धिभिर्न्यूनं पताकेतिवृत्तं न्यसनीयम्। अङ्गानि च प्रधानाविरोधे यथालाभं न्यसनीयानि प्रकरीतिवृत्तं त्वपरिपूर्णसन्धि विधेयम्।

तत्रैवं विभक्ते।

आदौ विष्कम्भकं कुर्यादङ्कं वा कार्ययुक्तितः।

इयमत्र कार्ययुक्तिः।

अपेक्षितं परित्यज्य नीरसं वस्तुविस्तरम्।
यदा सन्दर्शयेत् शेषं कुर्याद् विष्कम्भकं तदा॥ २५॥
यदा तु सरसं वस्तु मूलादेव प्रवर्तते।
आदावेव तदाऽङ्कः स्यादामुखाक्षेपसंश्रयः॥ २६॥

स च।

प्रत्यक्षनेतृचरितो बिन्दुव्याप्तिपुरस्कृतः।
अङ्को नानाप्रकारार्थसंविधानरसाश्रयः॥ २७॥

रङ्गप्रवेशे साक्षान् निर्दिश्यमाननायकव्यापारो बिन्दूपक्षेपार्थपरिमितोऽनेकप्रयोजनसंविधानरसाधिकरण: उत्सङ्ग इवाऽङ्कः

तत्र च।

अनुभावविभावाभ्यां स्थायिना व्यभिचारिभिः।
गृहीतमुक्तैः कर्तव्यमङ्गिनः परिपोषणम्॥ २८॥

अङ्गिन एवाऽङ्गिरसस्थायिनः सङ्ग्रहात् स्थायिनेति रसान्तरस्थायिनो ग्रहणम्। गृहीतमुक्तैः परस्परव्यतिकीर्णैरित्यर्थः।

न चाऽतिरसतो वस्तु दूरं विच्छिन्नतां नयेत्।
रसं वा न तिरोदध्याद् वस्त्वलङ्कारलक्षणैः॥ २९॥

कथामन्ध्यङ्गोपमादिलक्षणैर्भूषणादिभिः।

एको रसोऽङ्गीकर्तव्यो वीरः शृङ्गार एव वा।
अङ्गमन्ये रसाः सर्वे कुर्यान् निर्वहणेऽद्भुतम्॥ ३०॥

ननु च रसान्तरस्थायिनेत्यनेनैव रसान्तराणामङ्गत्वमुक्तम्। तन् न। यत्र रसान्तरस्थायी स्वानुभावविभावव्यभिचारियुक्तो भूयसोपनिबध्यते तत्र रसान्तराणामङ्गत्वम्। केवलस्थाय्युपनिबन्धे तु स्थायिनो व्यभिचारितैव।

दूराध्वानं वधं युद्धं राज्यदेशादिविप्लवम्।
संरोधं भोजनं स्नानं सुरतं चाऽनुलेपनम्॥ ३१॥
अम्बरग्रहणादीनि प्रत्यक्षाणि न निर्दिशेत्।

अङ्कैर्नैवाप्रनिबध्नीत प्रवेशकादिभिरेव सूचयेदित्यर्थः।

नाऽधिकारिवधं क्वाऽपि त्याज्यमावश्यकं न च॥ ३२॥

अधिकृतनायकवधं प्रवेशकादिनाऽपि न सूचयेत्। आवश्यकं तु देवपितृकार्याद्यवश्यमेव क्वचित् कुर्यात्।

एकाहाचरितैकार्थमित्थमासन्ननायकम्।
पात्रैस्त्रिचतुरैरङ्कं तेषामन्तेऽस्य निर्गमः॥ ३३॥

एकदिवसप्रवृत्तैकप्रयोजनसम्बद्धमासन्ननायकमबहुपात्रप्रवेशमङ्कं कुर्यात्। तेषां पात्राणामवश्यमङ्कस्याऽन्ते निर्गमः कार्यः।

पताकास्थानकान्यत्र बिन्दुरन्ते च बीजवत्।
एवमङ्काः प्रकर्तव्याः प्रवेशादिपुरस्कृताः।
पञ्चाङ्कमेतदवरं दशाङ्कं नाटकं परम्॥ ३४॥

इत्युक्तं नाटकलक्षणम्।

अथ प्रकरणे वृत्तमुत्पाद्यं लोकसंश्रयम्।
अमात्यविप्रवणिजामेकं कुर्याच्च नायकम्॥ ३५॥
धीरप्रशान्तं सापायं धर्मकामार्थतत्परम्।
शेषं नाटकवत् सन्धिप्रवेशकरसादिकम्॥ ३६॥

इति। कविबुद्धिविरचितमितिवृत्तम्। लोकसंश्रयमनुदात्त-ममात्याद्यन्यतमधीरप्रशान्तनायकं विपदन्तरितार्थसिद्धिं कुर्यात्। प्रकरणे मन्त्री अमात्य एव। सार्थवाहो वणिग्विशेष एवेति। स्पष्टमन्यत्।

नायिका तु द्विधा नेतुः कुलस्त्री गणिका तथा।
क्वचिदेकैव कुलजा वेश्या क्वाऽपि द्वयं क्वचित्॥ ३७॥
कुलजाऽऽभ्यन्तरा बाह्या वेश्या नाऽतिक्रमोऽनयोः।
आभिः प्रकरणं त्रेधा सङ्कीर्णं धूर्तसङ्कुलम्॥ ३८॥

वेशो भृतिः सोऽस्या जीवनमिति वेश्या। तद्विशेषो गणिका। यदुक्तम्।

आभिरभ्यर्थिता वेश्या रूपशीलगुणान्विता।
लभते गणिकाशब्दं स्थानं च जनसंसदि॥

एवं च कुलजा वेश्या उभयमिति त्रेधा प्रकरणे नायिका। यथा वेश्यैव तरङ्गदत्ते कुलजैव पुष्पदूषितके। ते द्वेऽपि मृच्छकटिकायामिति। कितवद्यूतकारादिधूर्तसङ्कुलं तु मृच्छकटिकादिवत् सङ्कीर्णप्रकरणमिति।

अथ <u>नाटिका</u>।

लक्ष्यते नाटिकाऽप्यत्र सङ्कीर्णान्यनिवृत्तये।

अत्र केचित्।

अनयोश्च बन्धयोगादेको भेदः प्रयोक्तृभिर्ज्ञेयः।
प्रख्यातस्त्वितरो वा नाटीसञ्ज्ञाश्रिते काव्ये॥

इत्यमुं भरतीयं श्लोकमेको भेदः प्रख्यातो नाटिकाख्य इतरस्त्वप्रख्यातः प्रकरणिकासञ्ज्ञः नाटीसञ्ज्ञया द्वे काव्ये आश्रिते इति व्याचक्षाणाः प्रकरणिकामपि मन्यन्ते। तदसत्। उद्देशलक्षणयोरनभिधानात् समानलक्षणत्वे वा भेदाभावात्। वस्तुरसनायकानां प्रकरणाभेदात् प्रकरणिकायाः। अतोऽनुद्दिष्टाया नाटिकाया यन् मुनिना लक्षणं कृतं तत्राऽयमभिप्रायः। शुद्धलक्षणसङ्करादेव तल्लक्षणे सिद्धे लक्षणकरणं सङ्कीर्णानां नाटिकैव कर्तव्येति नियमार्थं विज्ञायते।

तमेव सङ्करं दर्शयति।

तत्र वस्तु प्रकरणान् नाटकान् नायको नृपः।
प्रख्यातो धीरललितः शृङ्गारोऽङ्गी सलक्षणः॥ ३९॥

उत्पाद्येतिवृत्तत्वं प्रकरणधर्मः प्रख्यातनृपनायकादित्वं तु नाटकधर्म इति। एवं च नाटकप्रकरणनाटिकातिरेकेण वस्त्वादेः प्रकरणिकायामभावादङ्कपात्रभेदाद् यदि भेदः।

तत्र।

स्त्रीप्रायचतुरङ्कादिभेदकं यदि चेष्यते।
एकद्वित्र्यङ्कपात्रादिभेदेनाऽनन्तरूपता॥ ४०॥

तत्र नाटिकेति स्त्रीसमाख्ययौचित्यप्राप्तं स्त्रीप्रधानत्वम्। कैशिकीवृत्त्याऽऽश्रयत्वाच्च तदङ्गसङ्ख्ययाऽल्पावमर्शत्वेन चतुरङ्कत्वमप्यौचित्यप्राप्तमेव।

विशेषस्तु।

देवी तत्र भवेज् ज्येष्ठा प्रगल्भा नृपवंशजा।
गम्भीरा मानिनी कृच्छ्रात् तद्वशान् नेतृसङ्गमः॥ ४१॥

प्राप्या तु।

नायिका तादृशी मुग्धा दिव्या चाऽतिमनोहरा।

तादृशीति नृपवंशजत्वादिधर्मातिदेशः।

अन्तःपुरादिसम्बन्धादासन्ना श्रुतिदर्शनैः॥ ४२॥
अनुरागो नवावस्थो नेतुस्तस्यां यथोत्तरम्।
नेता तत्र प्रवर्तेत देवीत्रासेन शङ्कितः।

तस्यां मुग्धनायिकायामन्तःपुरसम्बन्धसङ्गीतकसम्बन्धादिना प्रत्यासन्नायां नायकस्य देवीप्रतिबन्धान्तरितः उत्तरोत्तरो नवावस्थानुरागो निबन्धनीयः।

कैशिक्यङ्गैश्चतुर्भिश्च युक्ताऽङ्कैरिव नाटिका॥ ४३॥

प्रत्यङ्कोपनिबद्धाभिहितलक्षणकैशिक्यङ्गचतुष्टयवती नाटिकेति।

अथ भाणः।

भाणस्तु धूर्तचरितं स्वानुभूतं परेण वा।
यत्रोपवर्णयेदेको निपुणः पण्डितो विटः॥ ४४॥
सम्बोधनोक्तिप्रत्युक्ती कुर्यादाकाशभाषितैः।
सूचयेद् वीरशृङ्गारौ शौर्यसौभाग्यसंस्तवैः॥ ४५॥
भूयसा भारती वृत्तिरेकाङ्कं वस्तु कल्पितम्।
मुखनिर्वहणे साङ्गे लास्याङ्गानि दशाऽपि च॥ ४६॥

इति। धूर्ताश्चौरद्यूतकारादयः तेषां चरितं यत्रैक एव विटः स्वकृतं परकृतं वोपवर्णयति स भारतीवृत्तिप्रधानत्वाद् भाणः। एकस्य चोक्तिप्रत्युक्तयः आकाशभाषितैराशङ्कितोत्तरत्वेन भवन्ति। अस्पष्टत्वाच्च वीरशृङ्गारौ शौभाग्यशौर्योपवर्णनया सूचनीयौ।

लास्याङ्गानि।

गेयं पदं स्थितं पाठ्यमासीनं पुष्पगण्डिका
प्रच्छेदकस्त्रिगूढं च सैन्धवाख्यं द्विगूढकम्॥ ४७॥
उत्तमोत्तमकं चैव उक्तप्रत्युक्तमेव च।
लास्ये दशविधं ह्येतदङ्गनिर्देशकल्पनम्॥ ४८॥

शेषं स्पष्टमिति।

अथ प्रहसनम्।

तद्वत् प्रहसनं त्रेधा शुद्धवैकृतसङ्करैः।

तद्वदिति भाणवद् वस्तुसन्धिसन्ध्यङ्गलास्यादीनामतिदेशः।

तत्र शुद्धं तावत्।

पाखण्डिविप्रप्रभृतिचेटचेटीविटाकुलम्।
चेष्टितं वेषभाषाभिः शुद्धं हास्यवचोन्वितम्॥ ४९॥

पाखण्डिनः शाक्यनिर्ग्रन्थप्रभृतयः। विप्रास्त्वत्यन्तमृजवः। जातिमात्रोपजीविनो वा। प्रहसनाङ्गिहास्यविभावास्तेषां च यथावत् स्वव्यापारोपनिबन्धनं चेटचेटी व्यवहारयुक्तं शुद्धं प्रहसनम्।

विकृतं तु।

कामुकादिवचोवेषैः षण्ढकञ्चुकितापसैः।
विकृतं सङ्कराद् वीथ्या सङ्कीर्णं धूर्तसङ्कुलम्।

कामुकादयो भुजङ्गचारभटाद्याः। तद्वेषभाषादियोगिनो यत्र षण्ढकञ्चुकितापसवृद्धादयस्तद्विकृतं। स्वस्वरूपप्रच्युतविभावत्वात्। वीथ्यङ्गैस्तु सङ्कीर्णत्वात् सङ्कीर्णम्।

रसस्तु भूयसा कार्यः षड्विधो हास्य एव तु ॥ ५० ॥

इति भाणः।

अथ डिमः।

डिमे वस्तु प्रसिद्धं स्याद् वृत्तयः कैशिकीं विना।
नेतारो देवगन्धर्वयक्षरक्षोमहोरगाः।
भूतप्रेतपिशाचाद्याः षोडशाऽत्यन्तमुद्धताः ॥ ५१ ॥
रसैरहास्यशृङ्गारैः षड्भिर्दीप्तैः समन्वितः।
मायेन्द्रजालसङ्ग्रामक्रोधोद्भ्रान्तादिचेष्टितैः ॥ ५२ ॥
चन्द्रसूर्योपरागैश्च न्याय्ये रौद्ररसेऽङ्गिनि।
चतुरङ्कश्चतुःसन्धिर्निर्विमर्शो डिमः स्मृतः ॥ ५३ ॥

डिमसङ्घात इति नायकसङ्घातव्यापारात्मकत्वाड् डिमः। तत्रेतिहासप्रसिद्धमितिवृत्तम्। वृत्तयश्च कैशिकीवर्जास्तिस्रः। रसाश्च वीररौद्रबीभत्साद्भुतकरुणभयानकाः षट्। स्थायी तु रौद्रो न्यायप्रधानो विमर्शरहिता मुखप्रतिमुखगर्भनिर्वहणाख्यास्चत्वारः सन्धयः साङ्गाः। मायेन्द्रजालाद्यनुभावसमाश्रयाः। शेषं प्रस्तावादिनाटकवत्। एतच्च च।

इदं त्रिपुरदाहे तु लक्षणं ब्रह्मणोदितम्।
ततस्त्रिपुरदाहश्च डिमसञ्ज्ञः प्रयोजितः॥

इति भरतमुनिना स्वयमेव त्रिपुरदाहेतिवृत्तस्य तुल्यत्वं दर्शितम्।

अथ व्यायोगः।

ख्यातेतिवृत्तो व्यायोगः ख्यातोद्धतनराश्रयः।
हीनो गर्भविमर्शाभ्यां दीप्ताः स्युर्डिमवद् रसाः॥ ५४॥
अस्त्रीनिमित्तसङ्ग्रामो जामदग्न्यजये यथा।
एकाहाचरितैकाङ्को व्यायोगो बहुभिर्नरैः॥ ५५॥

व्यायुज्यन्तेऽस्मिन् बहवः पुरुषा इति व्यायोगः। तत्र डिमवद् रसाः षट् हास्यशृङ्गाररहिताः। वृत्त्यात्मकत्वाच्च रसानामवचनेऽपि कैशिकीरहितेतरवृत्तित्वं रसवदेव लभ्यते। अस्त्रीनिमित्तश्चात्र सङ्ग्रामः। यथा परशुरामेण पितृवधकोपात् सहस्रार्जुनवधः कृतः। शेषं स्पष्टम्।

अथ समवकारः।

कार्यं समवकारेऽपि आमुखं नाटकादिवत्।
ख्यातं देवासुरं वस्तु निर्विमर्शास्तु सन्धयः॥ ५६॥
वृत्तयो मन्दकैशिक्यो नेतारो देवदानवाः।
द्वादशोदात्तविख्याताः फलं तेषां पृथक् पृथक्॥ ५७॥
बहुवीररसाः सर्वे यद्वदम्भोधिमन्थने।
अङ्कैस्त्रिभिस्त्रिकपटस्त्रिशृङ्गारस्त्रिविद्रवः॥ ५८॥

द्विसन्धिरङ्कः प्रथमः कार्यो द्वादशनालिकः।
चतुर्द्विनालिकावन्त्यौ नालिका घटिकाद्वयम्॥ ५९॥
वस्तुस्वभावदैवाऽरिकृताः स्युः कपटास्त्रयः।
नगरोपरोधयुद्धे वाताग्न्यादिकविद्रवाः॥ ६०॥
धर्मार्थकामैः शृङ्गारो नाऽत्र बिन्दुप्रवेशकौ।
वीथ्यङ्गानि यथालाभं कुर्यात् प्रहसने यथा॥ ६१॥

समवकीर्यन्तेऽस्मिन्नर्था इति समवकारः। तत्र नाटकादिवदामुखमिति समस्तरूपकाणामामुखप्रापणम्। विमर्शवर्जितास्त्वत्र सन्धयः। देवासुरादयो द्वादशनायकाः। तेषां च फलानि पृथक् पृथग् भवन्ति। यथा समुद्रमन्थने वासुदेवादीनां लक्ष्म्यादिलाभाः। वीरस्त्वाऽङ्गी अङ्गभूताः सर्वे रसाः। त्रयोऽङ्काः। तेषां प्रथमो द्वादशनालिकानिर्वृत्तेति वृत्तप्रमाणः। यथासङ्ख्यं चतुर्द्विनालिकावन्त्यौ नालिका च घटिकाद्वयम्। प्रत्यङ्कं च यथासङ्ख्यं कपटाः। तथा नगरोपरोधयुद्धवाताग्न्यादिविद्रवाणां मध्ये एकैको विद्रवः कार्यः। धर्मार्थकामशृङ्गाराणामेकैकः शृङ्गारः। प्रत्यङ्कमेव विधातव्यः। वीथ्यङ्गानि च यथालाभं कार्याणि। बिन्दुप्रवेशकौ नाटकोक्तावपि न विधातव्यौ। इत्ययं समवकारः।

अथ वीथी।

वीथी तु कैशिकीवृत्तौ सन्ध्यङ्गाङ्कैस्तु भाणवत्।
रसः सूच्यस्तु शृङ्गारः स्पृशेदपि रसान्तरम्॥ ६२॥

युक्ता प्रस्तावनाख्यातैरङ्गैरुद्घात्यकादिभिः।
एवं वीथी विधातव्या ह्येकपात्रप्रयोजिता॥ ६३॥

वीथीवद् वीथीमार्गः अङ्गानां पङ्क्तिर्वा भाणवत् कार्या। विशेषस्तु रसः शृङ्गारः अपरिपूर्णत्वात् भूयसा सूच्यः। रसान्तराण्यपि स्तोकं स्पर्शनीयानि। कैशिकी वृत्तिः रसौचित्यादेवेति। शेषं स्पष्टम्।

अथाऽङ्कः।

उत्सृष्टिकाङ्के प्रख्यातं वृत्तं बुद्ध्या प्रपञ्चयेत्।
रसस्तु करुणः स्थायी नेतारः प्राकृता नराः॥ ६४॥
भाणवत् सन्धिवृत्त्यङ्गैर्युक्तः स्त्रीपरिदेवितैः।
वाचा युद्धं विधातव्यं तथा जयपराजयौ॥ ६५॥

उत्सृष्टिकाङ्क इति नाटकान्तर्गताङ्कव्यवच्छेदार्थम्। शेषं प्रतीतमिति।

अथेहामृगः।

मिश्रमीहामृगे वृत्तं चतुरङ्कं त्रिसन्धिमत्।
नरदिव्यावनियमान् नायकप्रतिनायकौ॥ ६६॥
ख्यातौ धीरोद्धतावन्त्यो विपर्यासादयुक्तकृत्।
दिव्यस्त्रियमनिच्छन्तीमपहारादिनेच्छतः॥ ६७॥
शृङ्गाराभासमप्यस्य किञ्चित् किञ्चित् प्रदर्शयेत्।
संरम्भं परमानीय युद्धं व्याजान् निवारयेत्।
वधप्राप्तस्य कुर्वीत वधं नैव महात्मनः॥ ६८॥

मृगवदलभ्यां नायिकां नायकोऽस्मिन्नीहते इतीहामृगः। ख्याताख्यातं वस्तु अन्त्यः प्रतिनायको विपर्यासाद् विपर्ययज्ञानादयुक्तकारी विधेयः। स्पष्टमन्यत्।

इत्थं विचिन्त्य दशरूपकलक्ष्ममार्गम्
आलोक्य वस्तु परिभाव्य कविप्रबन्धान्।
कुर्यादयत्नवदलङ्कृतिभिः प्रबन्धं
वाक्यैरुदारमधुरैः स्फुटमन्दवृत्तैः॥ ६९॥

स्पष्टम्।

इति श्रीविष्णुसूनोर्धनिकस्य कृतौ दशरूपावलोके रूपकलक्षणप्रकाशो नाम तृतीयप्रकाशः समाप्तः।

अथेदानीं रसभेदः प्रदर्श्यते।

विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः।
आनीयमानः स्वाद्यत्वं स्थायी भावो रसः स्मृतः॥ १॥

वक्ष्यमाणस्वभावैर्विभावानुभावव्यभिचारिसात्त्विकैः काव्योपात्तैरभिनयोपदर्शितैर्वा श्रोतृप्रेक्षकाणामन्तर्विपरिवर्तमानो रत्यादिर्वक्ष्यमाणलक्षणः स्थायी स्वादगोचरतां निर्भरानन्दसंविदात्मतामानीयमानो रसः। तेन रसिकाः सामाजिकाः। काव्यं तु तथाविधानन्दसंविदुन्मीलनहेतुभावेन रसवदायुर्घृतमित्यादिव्यपदेशवत्।

तत्र विभावः।

ज्ञायमानतया तत्र विभावो भावपोषकृत्।
आलम्बनोद्दीपनत्वप्रभेदेन स च द्विधा॥ २॥

एवमयमेवमियमित्यतिशयोक्तिरूपकाव्यव्यापाराहितविशिष्टरूपतया ज्ञायमानो विभाव्यमानः सन्नालम्बनत्वेनोद्दीपनत्वेन वा यो नायकादिरभिमतदेशकालादिर्वा स विभावः। यदुक्तं विभाव इति विज्ञातार्थ इति। तांश्च यथास्वं यथावसरं च रसेषूपपादयिष्यामः। अमीषां चाऽनपेक्षितबाह्यसत्त्वानां शब्दोपधानादेवाऽऽसादिततद्भावानां सामान्यात्मनां स्वस्वसम्बन्धित्वेन विभावितानां साक्षाद्भावकचेतसि विपरिवर्तमानानामालम्बनादिभाव इति न वस्तुशून्यता। तदुक्तं भर्तृहरिणा।

शब्दोपहितरूपांस्तान् बुद्धेर्विषयतां गतान्।
प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते ॥

इति। षट्सहस्रीकृताऽप्युक्तम्। एभ्यश्च सामान्यगुणयोगेन रसा निष्पद्यन्त इति।

तत्राऽऽलम्बनविभावो यथा।

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रोऽनुकान्तिप्रदः
शृङ्गारैकनिधिः स्वयं नु मदनो मासो नु पुष्पाकरः।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन् मनोहरमिदं रूपं पुराणो मुनिः ॥

उद्दीपनविभावो यथा।

अयमुदयति चन्द्रश्चन्द्रिकाधौतविश्वः
परिणतविमलिम्नि व्योम्नि कर्पूरगौरः।
ऋजुरजतशलाकास्पर्धिभिर्यस्य पादैर्
जगदमलमृणालीपञ्जरस्थं विभाति ॥

अनुभावो विकारस्तु भावसंसूचनात्मकः।

स्थायिभावाननुभावयतः सामाजिकान् सभ्रूविक्षेपकटाक्षादयो रसपोषकारिणोऽनुभावाः। एते चाऽभिनयकाव्ययोरप्यनुभावयतां साक्षाद् भावकानुभवकर्मतयाऽनुभूयन्त इत्यनुभवनमिति चाऽनुभावाः रसिकेषु व्यपदिश्यन्ते। विकारो भावसंसूचनात्मक इति तु लौकिकरसापेक्षया इह तु तेषां कारणत्वमेव। यथा ममैव।

उज्जृम्भाननमुल्लसत्कुचतटं लोलभ्रमद्भ्रूलतं
स्वेदाम्भःस्नपिताङ्गयष्टिविगलद्व्रीडं सरोमाञ्चया।
धन्यः कोऽपि युवा स यस्य वदने व्यापारिताः सस्पृहं
मुग्धे दुग्धमहाब्धिफेनपटलप्रख्याः कटाक्षच्छटाः॥

इत्यादि यथारसमुदाहरिष्यामः।

हेतुकार्यात्मनोः सिद्धिस्तयोः संव्यवहारतः॥ ३॥

तयोर्विभावानुभावयोर्लौकिकरसं प्रतिहेतुकार्यभूतयोः संव्यवहारादेव सिद्धत्वान् न पृथग् लक्षणमुपयुज्यते। तदुक्तम्। विभावानुभावौ लोकसंसिद्धौ लोकयात्रानुगामिनौ लोकस्वभावोपगतत्वाच् च न पृथग् लक्षणमुच्यत इति।

अथ भावः।

सुखदुःखादिकैर्भावैर्भावस्तद्भावभावनम्।

अनुकार्याश्रयत्वेनोपनिबध्यमानैः सुखदुःखादिरूपैर्भावैस्तद्भावस्य भावकचेतसो भावनं वासनं भावः। तदुक्तम्। अहो ह्यनेन रसेन गन्धेन वा सर्वमेतद् भावितं वासितमिति। यत् तु रसान् भावयन् भाव इति। कवेरन्तर्गतं भावं भावयन् भाव इति च तदभिनयकाव्ययोः प्रवर्तमानस्य भावशब्दस्य प्रवृत्तिनिमित्तकथनम्।

ते च स्थायिनो व्यभिचारिणश्चेति वक्ष्यमाणाः।

पृथग् भावा भवन्त्यन्येऽनुभावत्वेऽपि सात्त्विकाः।
सत्त्वादेव समुत्पत्तेस्तच् च तद्भावभावनम्॥ ४॥

परगतदुःखहर्षादिभावनायामत्यन्तानुकूलान्तःकरणत्वं स-

त्वम्। यदाह। सत्त्वं नाम मनः प्रभवं तच्च समाहितमनस्त्वादुत्पद्यते। एतदेवाऽस्य सत्त्वं यतः खिन्नेन प्रहर्षितेन चाऽश्रुरोमाञ्चादयो निर्वर्त्यन्ते तेन सत्त्वेन निर्वृत्ताः सात्त्विकास्त एव भावास्तत उत्पद्यमानत्वादश्रुप्रभृतयोऽपि भावा भावसंसूचनात्मकविकाररूपत्वाच्च चाऽनुभावा इति द्वैरूप्यमेषाम्।

ते, च।

स्तम्भप्रलयरोमाञ्चाः स्वेदो वैवर्ण्यवेपथू।
अश्रुवैस्वर्यमित्यष्टौ स्तम्भोऽस्मिन् निष्क्रियाङ्गता।
प्रलयो नष्टसञ्ज्ञत्वं शेषाः सुव्यक्तलक्षणाः॥ ५॥

यथा।

*वेवइ सेअदवदनी रोमञ्चिअ गत्तिए ववइ।
विलुलिअ तु वलअ लहु बाहोअल्लीए रणेत्ति॥
मुहउ सामलि होई खणे विमुच्छइ विअग्घेण।
मुद्धा मुहल्ली तुअ पेम्मेण सावि ण धिज्जइ॥

अथ व्यभिचारिणः। तत्र सामान्यलक्षणम्।

विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः।
स्थायिन्युन्मग्ननिर्मग्नाः कल्लोला इव वारिधौ॥ ६॥

*अपभ्रंशिकभाषया चेयमुक्तिः सम्भाव्यते।
वेपते स्वेदवदना रोमाञ्चं गात्रे वपति।
विलोलस्ततो वलयो लघु बाहुवल्ल्यां रणति॥
मुखं श्यामलं भवति क्षणं विमूर्च्छति विदग्धेन।
मुग्धा मुखवल्ली तव प्रेम्णा सापि न धैर्यं करोति॥
श्लोकद्वयस्यास्यानतिसुगमत्वात् सन्दिग्धत्वाच्चास्य व्याख्या न समीचीना जाता।

यथा वारिधौ सत्येव कल्लोला उद्भवन्ति विलीयन्ते च तद्वदेव रत्यादौ स्थायिनि सत्येवाऽऽविर्भावतिरोभावाभ्यामाभिमुख्येन चरन्तो वर्तमाना निर्वेदादयो व्यभिचारिणो भावाः ते च।

निर्वेदग्लानिशङ्काश्रमधृतिजडताहर्षदैन्यौग्र्यचिन्तास्
त्रासेर्ष्यामर्षगर्वाः स्मृतिमरणमदाः सुप्तनिद्राविबोधाः।
व्रीडापस्मारमोहाः समतिरलसतावेगतर्कावहित्था
व्याध्युन्मादौ विषादोत्सुकचपलयुतास्त्रिंशदेते त्रयश्च॥ ७॥

तत्र निर्वेदः।

तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमाननम्।
तत्र चिन्ताश्रुनिःश्वासवैवर्ण्योच्छ्वासदीनताः॥ ८॥

तत्त्वज्ञानान् निर्वेदो यथा।

प्राप्ताः श्रियः सकलकामदुघास्ततः किं
दत्तं पदं शिरसि विद्विषतां ततः किम्।
सम्प्रीणिताः प्रणयिनो विभवैस्ततः किं
कल्पं स्थितं तनुभृतां तनुभिस्ततः किम्॥

आपदो यथा।

राज्ञो विपद् बन्धुवियोगदुःखं
देशच्युतिर्दुर्गममार्गखेदः।
आस्वाद्यतेऽस्याः कटुनिष्फलायाः
फलं मयैतच् चिरजीवितायाः॥

ईर्ष्यातो यथा।

धिक् धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनपरैः पीनैः किमेभिर्भुजैः।
न्यक्कारो ह्ययमेव मे यदरयस्तत्राऽप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसभटान् जीवत्यहो रावणः॥

वीरशृङ्गारयोर्व्यभिचारी निर्वेदो यथा।

ये बाहवो न युधि वैरिकठोरकण्ठ-
पीठोच्छलद्रुधिरराजिविराजितांसाः।
नाऽपि प्रियापृथुपयोधरपत्रभङ्ग-
सङ्क्रान्तकुङ्कुमरसाः खलु निष्फलास्ते॥

आत्मानुरूपं रिपुं रमणीं वाऽलभमानस्य निर्वेदादियमुक्तिः। एवं रसान्तराणामप्यङ्गभाव उदाहार्यः।

रसानङ्गः स्वतन्त्रो निर्वेदो यथा।

कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं
वैराग्यादिव वक्षि साधु विदितं कस्मात् यतः श्रूयताम्।
वामेनाऽत्र वटस्तमध्वगजनः सर्वात्मना सेवते
न च्छायाऽपि परोपकारकरणी मार्गस्थितस्याऽपि मे॥

विभावानुभावरसाङ्गानङ्गभेदादनेकशाखो निर्वेदो निदर्शनीयः।

अथ ग्लानिः।

रत्याद्यायासतृट्क्षुद्भिर्ग्लानिर्निष्प्राणतेह च।
वैवर्ण्यकम्पानुत्साहक्षामाङ्गवचनक्रियाः॥ ९॥

निधुवनकलाभ्यासादिश्रमतृट्क्षुद्वमनादिभिर्निष्प्राणतारूपा

ग्लानिः। अस्यां च वैवर्ण्यकम्पानुत्साहादयोऽनुभावाः। यथा माघे।

लुलितनयनताराः क्षामवक्त्रेन्दुबिम्बा
रजनय इव निद्राक्लान्तनीलोत्पलाक्ष्यः।
तिमिरमिव दधानाः स्रंसिनः केशपाशान्
अवनिपतिगृहेभ्यो यान्त्यमूर्वारवध्वः॥

शेषं निर्वेदवदूह्यम्।

अथ शङ्का।

अनर्थप्रतिभा शङ्का परक्रौर्यात् स्वदुर्नयात्।
कम्पशोषाभिवीक्षादिरत्र वर्णस्वरान्यता॥ १०॥

तत्र परक्रौर्याद् यथा रत्नावल्याम्।

ह्रिया सर्वस्याऽसौ हरति विदिताऽस्मीति वदनं
द्वयोर्दृष्ट्वाऽऽलापं कलयति कथामात्मविषयाम्।
सखीषु स्मेरासु प्रकटयति वैलक्ष्यमधिकम्
प्रिया प्रायेणाऽऽस्ते हृदयनिहितातङ्कविधुरा।

स्वदुर्नयाद् यथा वीरचरिते।

दूराद् दवीयो धरणीधराभं
यस्ताटकेयं तृणवद् व्यधूनोत्।
हन्ता सुबाहोरपि ताडकारिः
स राजपुत्रो हृदि बाधते माम्॥

अनया दिशाऽन्यदनुसर्तव्यम्।

अथ श्रमः।

श्रमः खेदोऽध्वरत्यादेः स्वेदोऽस्मिन् मर्दनादयः।

अध्वतो यथोत्तररामचरिते।

अलसलुलितमुग्धान्यध्वसञ्जातखेदा-
दशिथिलपरिरम्भैर्दत्तसंवाहनानि।
परिमृदितमृणालीदुर्बलान्यङ्गकानि
त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता॥

रतिश्रमो यथा माघे।

प्राप्य मन्मथरसादतिभूमिं
दुर्वहस्तनभराः सुरतस्य।
शश्रमुः श्रमजलार्द्रललाट-
श्लिष्टकेशमसितायतकेश्यः॥

इत्याद्युत्प्रेक्ष्यम्।

अथ धृतिः।

सन्तोषो ज्ञानशक्त्यादेर्धृतिरव्यग्रभोगकृत्॥ ११॥

ज्ञानाद् यथा भर्तृहरिशतके।

वयमिह परितुष्टा वल्कलैस्त्वं च लक्ष्म्या
सम इह परितोषो निर्विशेषो विशेषः।
स तु भवतु दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः॥

शक्तितो यथा रत्नावल्याम्।

राज्यं निर्जितशत्रु योग्यसचिवे न्यस्तः समस्तो भरः
सम्यक्पालनपालिताः प्रशमिताशेषोपसर्गाः प्रजाः।
प्रद्योतस्य सुता वसन्तसमयस्त्वं चेति नाम्ना धृतिं
कामः काममुपैत्वयं मम पुनर्मन्ये महानुत्सवः॥

इत्याद्यूह्यम्।

अथ जडता।

अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः।
अनिमिषनयननिरीक्षणतूष्णीम्भावादयस्तत्र॥ १२॥

इष्टदर्शनाद् यथा।

एवमालि निगृहीतसाध्वसं
शङ्करो रहसि सेव्यतामिति।
सा सखीभिरुपदिष्टमाकुला
नाऽस्मरत् प्रमुखवर्तिनि प्रिये॥

अनिष्टश्रवणाद् यथा। उदात्तराघवे। राक्षसः।

तावन्तस्ते महात्मानो निहताः केन राक्षसाः।
येषां नायकतां याताखिशिरःखरदूषणाः॥

द्वितीयः। गृहीतधनुषा रामहतकेन। प्रथमः। किमेकाकिनैव। द्वितीयः। अदृष्ट्वा कः प्रत्येति। पश्य तावतोऽस्मद्बलस्य।

सद्यश्छिन्नशिरःश्वभ्रमज्जत्कङ्ककुलाकुलाः।
कबन्धाः केवलं जातास्तालोत्ताला रणाङ्गणे॥

प्रथमः। सखे यद्येवं तदाऽहमेवंविधः किं करवाणीति।

अथ हर्षः।

प्रसत्तिरुत्सवादिभ्यो हर्षोऽश्रुस्वेदगद्गदाः।

प्रियागमनपुत्रजननोत्सवादिविभावैश्चेतःप्रसादो हर्षः। तत्र चाऽश्रुस्वेदगद्गदादयोऽनुभावाः। यथा।

आयाते दयिते मरुस्थलभुवामुत्प्रेक्ष्य दुर्लङ्घ्यतां
गेहिन्या परितोषबाष्पकलिलामासज्य दृष्टिं मुखे।
दत्त्वा पीलुशमीकरीरकवलान् स्वेनाञ्चलेनाऽऽदराद्
उन्मृष्टं करभस्य केसरसटाभारायलग्नं रजः॥

निर्वेदवदितरदुन्नेयम्।

अथ दैन्यम्।

दौर्गत्याद्यैरनौजस्यं दैन्यं कार्ष्ण्यामृजादिमत्॥ १३॥

दारिद्र्यन्यक्कारादिविभावैरनौजस्कता चेतसो दैन्यम्। तत्र च कृष्णतामलिनवसनदर्शनादयोऽनुभावाः। यथा।

वृद्धोऽन्धः पतिरेष मञ्चकगतः स्थूणावशेषं गृहं
कालोऽभ्यर्णजलागमः कुशलिनी वत्सस्य वार्ताऽपि नो।
यत्नात् संचिततैलबिन्दुघटिका भग्नेति पर्याकुला
दृष्ट्वा गर्भभरालसां सुतवधूं श्वश्रूश्चिरं रोदिति॥

शेषं पूर्ववत्।

अथौग्र्यम्।

दुष्टेऽपराधदौर्मुख्यक्रौर्यैश्चण्डत्वमुग्रता।
तत्र स्वेदशिरःकम्पतर्जनाताडनादयः॥ १४॥

यथा वीरचरिते जामदग्न्यः।

उत्कृत्योत्कृत्य गर्भानपि शकलयतः क्षत्रसन्तानरोषाद्
उद्दामस्यैकविंशत्यवधि विशसतः सर्वतो राजवंश्यान्।
पित्र्यं तद्रक्तपूर्णह्रदसवनमहानन्दमन्दायमान-
क्रोधाग्नेः कुर्वतो मे न खलु न विदितः सर्वभूतैः स्वभावः॥

अथ चिन्ता।

ध्यानं चिन्तेहितानाप्तेः शून्यताश्वासतापकृत्।

यथा।

पक्ष्माग्रग्रथिताश्रुबिन्दुनिकरैर्मुक्ताफलस्पर्धिभिः
कुर्वन्त्या हरहासहारि हृदये हारावलीभूषणम्।
बाले बालमृणालनालवलयालङ्कारकान्ते करे
विन्यस्याऽऽननमायताक्षि सुकृती कोऽयं त्वया स्मर्यते॥

यथा वा।

अस्तमितविषयसङ्गा मुकुलितनयनोत्पला बहुश्वसिता।
ध्यायति किमप्यलक्ष्यं बाला योगाभियुक्तेव॥

अथ त्रासः।

गर्जितादेर्मनःक्षोभस्त्रासोऽत्रोत्कम्पितादयः॥ १५॥

यथा माघे।

त्रस्यन्ती चलशफरीविघट्टितोरूर्
वामोरूरतिशयमाप विभ्रमस्य।
क्षुभ्यन्ति प्रसभमहो विनाऽपि हेतोर्
लीलाभिः किमु सति कारणे रमण्यः॥

अथाऽसूया।

परोत्कर्षाक्षमाऽसूया गर्वदौर्जन्यमन्युजा।
दोषोक्त्यवज्ञे भ्रुकुटिमन्युक्रोधेङ्गितानि च॥ १६॥

गर्वे यथा वीरचरिते।

अर्थित्वे प्रकटीकृतेऽपि न फलप्राप्तिः प्रभोः प्रत्युत
द्रुह्यन् दाशरथिर्विरुद्धचरितो युक्तस्तया कन्यया।
उत्कर्षं च परस्य मानयशसोर्विस्रंसनं चाऽऽत्मनः
स्त्रीरत्नं च जगत्पतिर्दशमुखो दृप्तः कथं मृष्यते॥

दौर्जन्याद् यथा।

यदि परगुणा न क्षम्यन्ते यतस्व गुणार्जने
नहि परयशो निन्दाव्याजैरलं परिमार्जितुम्।
विरमसि न चेदिच्छाद्वेषप्रसक्तमनोरथो
दिनकरकरान् पाणिच्छत्रैर्नुदन् श्रममेष्यसि॥

मन्युजा यथाऽमरुशतके।

पुरस्तन्व्या गोत्रस्खलनचकितोऽहं नतमुखः
प्रवृत्तो वैलक्ष्यात् किमपि लिखितुं दैवहतकः।
स्फुटो रेखान्यासः कथमपि स तादृक् परिणतो
गता येन व्यक्तिं पुनरवयवैः सैव तरुणी॥
ततश्चाऽभिज्ञाय स्फुरदरुणगण्डस्थलरुचा
मनस्विन्या रोषप्रणयरभसाद् गद्गदगिरा।
अहो चित्रं चित्रं स्फुटमिति निगद्याऽश्रुकलुषं
रुषा ब्रह्मास्त्रं मे शिरसि निहितो वामचरणः॥

अथाऽमर्षः ।

अधिक्षेपापमानादेरमर्षोऽभिनिविष्टता ।
तत्र स्वेदशिरःकम्पतर्जनाताडनादयः ॥ १७ ॥

यथा वीरचरिते ।

प्रायश्चित्तं चरिष्यामि पूज्यानां वो व्यतिक्रमात् ।
न त्वेवं दूषयिष्यामि शस्त्रग्रहमहाव्रतम् ॥

यथा वा वेणीसंहारे ।

युष्मच्छासनलङ्घनाम्भसि मया मग्नेन नाम स्थितं
प्राप्ता नाम विगर्हणा स्थितिमतां मध्येऽनुजानामपि ।
क्रोधोल्लासितशोणितारुणगदस्योच्छिन्दतः कौरवान्
अद्यैकं दिवसं ममाऽसि न गुरुर्नाऽहं विधेयस्तव ॥

अथ गर्वः ।

गर्वोऽभिजनलावण्यबलैश्वर्यादिभिर्मदः ।
कर्माण्याधर्षणाऽवज्ञा सविलासाङ्गवीक्षणम् ॥ १८ ॥

यथा वीरचरिते ।

मुनिरयमथ वीरस्तादृशस्तत्प्रियं मे
विरमतु परिकम्पः कातरे क्षत्रियाऽसि ।
तपसि विततकीर्तेर्दर्पकण्डूलदोष्णः
परिचरणसमर्थो राघवः क्षत्रियोऽहम् ॥

यथा वा तत्रैव ।

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये।
जामदग्न्यस्य वो मित्रमन्यथा दुर्मनायते॥

अथ स्मृतिः।

सदृशज्ञानचिन्ताद्यैः संस्कारात् स्मृतिरत्र च।
ज्ञातत्वेनाऽर्थभासिन्यां भ्रूसमुन्नयनादयः।

यथा।

मैनाकः किमयं रुणद्धि गगने मन्मार्गमव्याहतं
शक्तिस्तस्य कुतः स वज्रपतनाद् भीतो महेन्द्रादपि।
तार्क्ष्यः सोऽपि समं निजेन विभुना जानाति मां रावणम्
आ ज्ञातं स जटायुरेष जरसा क्लिष्टो वधं वाञ्छति॥

यथा वा मालतीमाधवे। माधवः। मम हि प्राक्तनोपलम्भसम्भावितात्मजन्मनः संस्कारस्याऽनवरतप्रबोधात् प्रतायमानस्तद्विसदृशैः प्रत्ययान्तरैरतिरस्कृतप्रवाहः प्रियतमास्मृतिप्रत्ययोत्पत्तिसन्तानस्तन्मयमिव करोति वृत्तिसारूप्यतश्चैतन्यम्।

लीनेव प्रतिबिम्बितेव लिखितेवोत्कीर्णरूपेव च
प्रत्युप्तेव च वज्रसारघटितेवाऽन्तर्निखातेव च।
सा नश्चेतसि कीलितेव विशिखैश्चेतोभुवः पञ्चभिश्
चिन्तासन्ततितन्तुजालनिबिडस्यूतेव लग्ना प्रिया॥

अथ मरणम्।

. मरणं सुप्रसिद्धत्वादनर्थत्वाच्च नोच्यते॥ १८॥

यथा ।

सम्प्राप्तेऽवधिवासरे क्षणमनु त्वद्वर्त्मवातायनं
वारं वारमुपेत्य निष्क्रियतया निश्चित्य किञ्चिच्चिरम् ।
सम्प्रत्येव निवेद्य केलिकुररीं सास्रं सखीभ्यः शिशोर्
माधव्याः सहकारकेण करुणः पाणिग्रहो निर्मितः ॥

इत्यादिवत् शृङ्गाराश्रयालम्बनत्वेन मरणे व्यवसायमात्रमुपनिबन्धनीयम् । अन्यत्र कामचारः । यथा वीरचरिते । पश्यन्तु भवन्तस्ताडकाम् ।

ह्रन्मर्मभेदिपतदुत्कटकङ्कपत्र
संवेगतत्क्षणकृतस्फुरदङ्गभङ्गा ।
नासाकुटीरकुहरद्वयतुल्यनिर्यद्
उद्बुद्बुदध्वनदसृक्प्रसरा मृतैव ॥

अथ मदः ।

हर्षोत्कर्षो मदः पानात् स्खलदङ्गवचोगतिः ।
निद्रा हासोऽत्र रुदितं ज्येष्ठमध्याधमादिषु ।

यथा माघे ।

हावहारि हसितं वचनानां कौशलं दृशि विकारविशेषाः ।
चक्रिरे भृशमृजोरपि वध्वाः कामिनेव तरुणेन मदेन ॥

इत्यादि ।

अथ सुप्तम् ।

सुप्तं निद्रोद्भवं तत्र श्वासोच्छ्वासक्रिया परम् ॥ २० ॥

यथा।

लघुनि तृणकुटीरे क्षेत्रकोणे यवानां
नवकलमपलालस्रस्तरे सोपधाने।
परिहरति सुषुप्तं हालिकद्वन्द्वमारात्
कुचकलशमहोष्माबद्धरेखस्तुषारः॥

अथ निद्रा।

मनःसम्मीलनं निद्रा चिन्तालस्यक्लमादिभिः।
तत्र जृम्भाङ्गभङ्गाक्षिमीलनोत्स्वप्नतादयः।

यथा।

निद्रार्धमीलितदृशो मदमन्थराणि
नाऽप्यर्थवन्ति न च यानि निरर्थकानि।
अद्याऽपि मे मृगदृशो मधुराणि तस्यास्
तान्यक्षराणि हृदये किमपि ध्वनन्ति॥

यथा च माघे।

प्रहरकमपनीय स्वं निदिद्रासतोच्चैः
प्रतिपदमुपहूतः केनचिज् जागृहीति।
मुहुरविशदवर्णां निद्रया शून्यशून्यां
ददद्पि गिरमन्तर्बुध्यते नो मनुष्यः॥

अथ विबोधः।

विबोधः परिणामादेस्तत्र जृम्भाक्षिमर्दने॥ २१॥

यथा माघे।

चिररतपरिखेदप्राप्तनिद्रासुखानां
चरममपि शयित्वा पूर्वमेव प्रबुद्धाः ।
अपरिचलितगात्राः कुर्वते न प्रियाणाम्
अशिथिलभुजचक्राश्लेषभेदं तरुण्यः ॥

अथ व्रीडा ।

दुराचारादिभिर्व्रीडा धार्ष्ट्याभावस्तमुन्नयेत् ।
साचीकृताङ्गावरणवैवर्ण्याधोमुखादिभिः ॥ २२ ॥

यथाऽमरुशतके ।

पटालग्ने पत्यौ नमयति मुखं जातविनया
हठाश्लेषं वाञ्छत्यपहरति गात्राणि निभृतम् ।
न शक्नोत्याख्यातुं स्मितमुखसखीदत्तनयना
ह्रिया ताम्यत्यन्तः प्रथमपरिहासे नववधूः ॥

अथाऽपस्मारः ।

आवेशो ग्रहदुःखाद्यैरपस्मारो यथाविधिः ।
भूपातकम्पप्रस्वेदलालाफेनोद्गमादयः ॥ २३ ॥

यथा माघे ।

आश्लिष्टभूमिं रसितारमुच्चैर्
लोलद्भुजाकारबृहत्तरङ्गम् ।
फेनायमानं पतिमापगानाम्
असावपस्मारिणमाशशङ्के ॥

अथ मोहः ।

मोहो विचित्तता भीतिदुःखावेशानुचिन्तनैः।
तत्राऽज्ञानभ्रमाघातघूर्णनादर्शनादयः ॥ २४ ॥

यथा कुमारसम्भवे।

तीव्राभिषङ्गप्रभवेन वृत्तिं
मोहेन संस्तम्भयतेन्द्रियाणाम्।
अज्ञातभर्तृव्यसना मुहूर्तं
कृतोपकारेव रतिर्बभूव ॥

यथा चोत्तररामचरिते।

विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारः कोऽप्यन्तर्जडयति च तापं च कुरुते ॥

अथ मतिः।

भ्रान्तिच्छेदोपदेशाभ्यां शास्त्रादेस्तत्त्वधीर्मतिः।

यथा किराते।

सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणुते हि विमृश्य कारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥

यथा च।

न पण्डिताः साहसिका भवन्ति
श्रुत्वाऽपि ते सन्तुलयन्ति तत्त्वम्।
तत्त्वं समादाय समाचरन्ति
स्वार्थं प्रकुर्वन्ति परस्य चाऽर्थम् ॥

अथाऽऽलस्यम्।

आलस्यं श्रमगर्भादेर्जाड्यं जृम्भासितादिमत् ॥ २५ ॥

यथा ममैव।

चलति कथञ्चित् पृष्टा
यच्छति वचनं कथञ्चिदालीनाम्।
आसितुमेव हि मनुते
गुरुगर्भभरालसा सुतनुः ॥

अथाऽऽवेगः।

आवेगः सम्भ्रमोऽस्मिन्नभिसरजनिते शस्त्रनागाभियोगो
वातात् पांशूपदिग्धस्त्वरितपदगतिर्वर्षजे पिण्डिताङ्गः।
उत्पातात् स्रस्तताङ्गेष्वहितहितकृते शोकहर्षानुभावा
वह्नेर्धूमाकुलास्यः करिजमनु भयस्तम्भकम्पापसाराः ॥ २६ ॥

अभिसरो राजविद्रवादिः तद्धेतुरावेगः। यथा ममैव।

आगच्छाऽऽगच्छ सज्जं कुरु वरतुरगं संनिधेहि द्रुतं मे
खड्गः क्वाऽसौ कृपाणीमुपनय धनुषा किं किमङ्गप्रविष्टम्।
संरम्भोन्निद्रितानां क्षितिभृति गहनेऽन्योन्यमेवं प्रतीच्छन्
वादः स्वप्नाभिदृष्टे त्वयि चकितदृशां विद्विषामाविरासीत्॥

इत्यादि।

तनुत्राणं तनुत्राणं शस्त्रं शस्त्रं रथो रथः।
इति शुश्रुविरे विष्वगुद्भटाः सुभटोक्तयः ॥

यथा वा।

प्रारब्धां तरुपुत्रकेषु सहसा सन्त्यज्य सेकक्रियाम्
एतास्तापसकन्यकाः किमिदमित्यालोकयन्त्याकुलाः।
आरोहन्त्युटजद्रुमांश्च वटवो वाचंयमा अप्यमी
सद्यो मुक्तसमाधयो निजवृषीष्वेवोच्चपादं स्थिताः॥

वातावेगो यथा।

वाताहतं वसनमाकुलमुत्तरीयम्।

इत्यादि।

वर्षजो यथा।

देवे वर्षत्यशनपवनव्यापृता वह्निहेतोर्
गेहाद् गेहं फलकनिचितैः सेतुभिः पङ्कभीताः।
नीध्रप्रान्तानविरलजलान् पाणिभिस्ताडयित्वा
शूर्पच्छत्रस्थगितशिरसो योषितः सञ्चरन्ति॥

उत्पातजो यथा।

पौलस्त्यपीनभुजसम्पदुदस्यमान-
कैलाससम्भ्रमविलोलदृशः प्रियायाः।
श्रेयांसि वो दिशतु निह्नुतकोपचिह्नम्
आलिङ्गनोत्पुलकमासितमिन्दुमौलेः॥

अहितकृतस्त्वनिष्टदर्शनश्रवणाभ्याम्। तद् यथा। उदात्त-राघवे। चित्रमायः। ससम्भ्रमम्। भगवन् कुलपते रामभद्र परित्रायतां परित्रायतामित्याकुलतां नाटयतीत्यादि। पुन-श्चित्रमायः।

मृगरूपं परित्यज्य विधाय विकटं वपुः।

शीयते रक्षसाऽनेन लक्ष्मणो युधि संशयम्॥

रामः।

वत्सस्याऽभयवारिधेः प्रतिभयं मन्ये कथं राक्षसात्
त्रस्तश्चैव मुनिर्विरौति मनसश्चाऽस्त्येव मे सम्भ्रमः।
माहासीर्जनकात्मजामिति मुहुः स्नेहाद् गुरुर्याचते
न स्थातुं न च गन्तुमाकुलमतेर्मूढस्य मे निश्चयः॥

इत्यन्तेनाऽनिष्टप्राप्तिकृतसम्भ्रमः।

इष्टप्राप्तिकृतो यथाऽत्रैव। प्रविश्य पटाक्षेपेण सम्भ्रान्तो वानरः।

वानरः। *महाराअ एदं खु पवणणन्दणागमणेण पहरिसेत्यादि देवस्स हिअआणन्दजणणं विअलिदं मधुवणमित्यन्तम्।

यथा वा वीरचरिते।

एह्येहि वत्स रघुनन्दन पूर्णचन्द्र
चुम्बामि मूर्धनि चिरस्य परिष्वजे त्वाम्।
आरोप्य वा हृदि दिवानिशमुद्वहामि
वन्देऽथवा चरणपुष्करकद्वयं ते॥

वह्निजो यथाऽमरुशतके।

क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः सम्भ्रमेण।
आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवाऽऽर्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः॥

---

* महाराजैतत् खलु पवननन्दनागमनेन प्रहर्षेत्यादि, देवस्य हृदयानन्दजननं विदलितं मधुवनमित्यन्तं।

यथा वा रत्नावल्याम्।

विरम विरम वह्ने मुञ्च धूमाकुलत्वं
प्रसरयसि किमुच्चैरर्चिषां चक्रवालम्।
विरहहुतभुजाऽहं यो न दग्धः प्रियायाः
प्रलयदहनभासा तस्य किं त्वं करोषि॥

करिणो यथा रघुवंशे।

सच्छिन्नबन्धद्रुतयुग्यशून्यं
भग्नाक्षपर्यस्तरथं क्षणेन।
रामापरित्राणविहस्तयोधं
सेनानिवेशं तुमुलं चकार॥

करिग्रहणं व्यालोपलक्षणार्थम्। तेन व्याघ्रशूकरवानरादिप्रभवा आवेगा व्याख्याताः।

अथ वितर्कः।

तर्को विचारः सन्देहाद् भ्रूशिरोङ्गुलिनर्तकः।

यथा।

किं लोभेन विलङ्घितः स भरतो येनैतदेवं कृतं
सद्यः स्त्रीलघुतां गता किमथवा मातैव मे मध्यमा।
मिथ्यैतन् मम चिन्तितं द्वितयमप्यार्यानुजोऽसौ गुरुर्
माता तातकलत्रमित्यनुचितं मन्ये विधात्रा कृतम्॥

अथवा।

कः समुचिताभिषेकादार्यं प्रच्यावयेद् गुणज्येष्ठम्।
मन्ये ममैव पुण्यैः सेवावसरः कृतो विधिना॥

अथाऽवहित्थम्।

लज्जाद्यैर्विक्रियागुप्ताववहित्थाऽङ्गविक्रिया।

यथा कुमारसम्भवे।

एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी।
लीलाकमलपत्राणि गणयामास पार्वती॥

अथ व्याधिः।

व्याधयः सन्निपाताद्यास्तेषामन्यत्र विस्तरः॥ २७॥

दिङ्मात्रं तु यथा।

अच्छिन्नं नयनाम्बु बन्धुषु कृतं चिन्ता गुरुभ्योऽर्पिता
दत्तं दैन्यमशेषतः परिजने तापः सखीष्वाहितः।
अद्य श्वः परिनिर्वृतिं व्रजति सा श्वासैः परं खिद्यते
विस्रब्धो भव विप्रयोगजनितं दुःखं विभक्तं तया॥

अथोन्मादः।

अप्रेक्षाकारितोन्मादः सन्निपातग्रहादिभिः।
अस्मिन्नवस्था रुदितगीतहासासितादयः॥ २८॥

यथा। आः क्षुद्रराक्षस तिष्ठ तिष्ठ क्व मे प्रियतमामादाय गच्छसीत्युपक्रमे। कथम्।

नवजलधरः सन्नद्धोऽयं न दृप्तनिशाचरः
सुरधनुरिदं दूराकृष्टं न तस्य शरासनम्।
अयमपि पटुर्धारासारो न बाणपरम्परा
कनकनिकषस्निग्धा विद्युत् प्रिया न ममोर्वशी॥

इत्यादि ।

अथ विषादः ।

प्रारब्धकार्यासिद्ध्यादेर्विषादः सत्त्वसङ्क्षयः ।
निःश्वासोच्छ्वासहृत्तापसहायान्वेषणादिकृत् ॥ २९ ॥

यथा वीरचरिते । हा आर्ये ताडके किं हि नामैतत् ।

अम्बुनि मज्जन्त्यलाबूनि ग्रावाणः प्लवन्ते ।

नन्वेष राक्षसपतेः स्खलितः प्रतापः
प्राप्तोऽद्भुतः परिभवो हि मनुष्यपोतात् ।
दृष्टः स्थितेन च मया स्वजनप्रमाथो
दैन्यं जरा च निरुणद्धि कथं करोमि ॥

अथौत्सुक्यम् ।

कालाक्षमत्वमौत्सुक्यं रम्येच्छारतिसम्भ्रमैः ।
तत्रोच्छ्वासत्वनिःश्वासहृत्तापस्वेदविभ्रमाः ॥ ३० ॥

यथा कुमारसम्भवे ।

आत्मानमालोक्य च शोभमानम्
आदर्शबिम्बे स्तिमितायताक्षी ।
हरोपयाने त्वरिता बभूव
स्त्रीणां प्रियालोकफलो हि वेषः ॥

यथा वा तत्रैव ।

पशुपतिरपि तान्यहानि कृच्छ्राद्
अगमयदद्रिसुतासमागमोत्कः ।

कमपरमवशं न विप्रकुर्युर्
विभुमपि तं यदमी स्पृशन्ति भावाः ॥

अथ चापलम्।

मात्सर्यद्वेषरागादेश्चापलं त्वनवस्थितिः।
तत्र भर्त्सनपारुष्यस्वच्छन्दाचरणादयः ॥ ३१ ॥

यथा विकटनितम्बायाः।

अन्यासु तावदुपमर्दसहासु भृङ्ग
लोलं विनोदय मनः सुमनोलतासु।
बालामजातरजसं कलिकामकाले
व्यर्थं कदर्थयसि किं नवमल्लिकायाः ॥

यथा वा।

विनिकषणरणत्कठोरदंष्ट्रा
क्रकचविशङ्कटकन्दरोदराणि।
अहमहमिकया पतन्तु कोपात्
सममधुनैव किमत्र मन्मुखानि ॥

अथवा। प्रस्तुतमेव तावत् सुविहितं करिष्य इति।

अन्ये च चित्तवृत्तिविशेषा एतेषामेव विभावानुभावस्वरूपानुप्रवेशान् न पृथग् वाच्याः।

अथ स्थायी।

विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः।
आत्मभावं नयत्यन्यान् स स्थायी लवणाकरः ॥ ३२ ॥

सजातीयविजातीयभावान्तरैरतिरस्कृतत्वेनोपनिबध्यमानो रत्यादिः स्थायी। यथा बृहत्कथायां नरवाहनदत्तस्य मदनमञ्जूषायामनुरागः। तत्तदवान्तरानेकनायिकानुरागैरतिरस्कृतः स्थायी। यथा च मालतीमाधवे। श्मशानाङ्के बीभत्सेन मालत्यनुरागस्याऽतिरस्कारो मम हि प्राक्तनोपलम्भसम्भावितात्मजन्मनः संस्कारस्याऽनवरतप्रबोधात् प्रतीयमानस्तद्विसदृशैः प्रत्ययान्तरैरतिरस्कृतप्रवाहः प्रियतमास्मृतिप्रत्ययोत्पत्तिसन्तानस्तन्मयमिव करोत्यन्तर्वृत्तिसारूप्यतश्चैतन्यमित्यादिनोपनिबद्धः। तदनेन प्रकारेण विरोधिनामविरोधिनां च समावेशो न विरोधी। तथाहि। विरोधः सहानवस्थानं बाध्यबाधकभावो वा। उभयरूपेणाऽपि न तावत् तादात्म्यमस्यैकरूपत्वेनैवाऽऽविर्भावात्। स्थायिनां च विभावादीनां यदि विरोधस्तत्राऽपि न तावत् सहानवस्थानं रत्याद्युपरक्ते चेतसि स्रक्सूत्रन्यायेनाऽविरोधिनां व्यभिचारिणां चोपनिबन्धः समस्तभावकस्वसंवेदनसिद्धः। यथैव स्वसंवेदनसिद्धस्तथैव काव्यव्यापारसंरम्भेणाऽनुकार्येष्वावेश्यमानः स्वचेतःसम्भेदेन तथाविधानन्दसंविदुन्मीलनहेतुः सम्पद्यते। तस्मान् न तावद् भावानां सहानवस्थानम्। बाध्यबाधकभावस्तु भावान्तरैर्भावान्तरतिरस्कारः। स च व्यभिचारिणां स्थायिनामविरुद्धव्यभिचारिभिः स्थायिनोऽविरुद्धास्तेषामङ्गत्वात् प्रधानविरुद्धस्य चाऽङ्गत्वायोगादानन्तर्यविरोधित्वमप्यनेन प्रकारेणाऽपास्तं भवति। तथा च मालतीमाधवे शृङ्गारानन्तरं बीभत्सोपनिबन्धेऽपि न किञ्चिद्

वैरस्यं तदेवमेव स्थिते विरुद्धरसैकावलम्बनत्वमेव विरोधे हेतुः। सत्वविरुद्धरसान्तरव्यवधानेनोपनिबध्यमानो न विरोधी। यथा।

*असङ्गणाङ्गमहेलिअङ्गजुङ्गपरिमलुसुसुअन्धु।
मुङ्गकन्तइ अगत्यणइअङ्ग ण फिट्टइ गन्धु॥

इत्यत्र बीभत्सरसस्याऽङ्गभूतरसान्तरव्यवधानेन शृङ्गारसमावेशो न विरुद्धः प्रकारान्तरेणैकाश्रयविरोधी परिहर्तव्यः। ननु यत्रैकतात्पर्येणेतरेषां विरुद्धानामविरुद्धानां च न्यग्भूतत्वेनोपादानं तत्र भवत्वङ्गत्वेनाऽविरोधः। यत्र तु समप्रधानत्वेनाऽनेकस्य भावस्योपनिबन्धनं तत्र कथम्। यथा।

†एक्कत्तो रुअइ पिआ अण्णत्तो समरतूरणिग्घोसो।
पेम्मेण रणरसेण अ भडस्स डोलाइअं हिअअं॥

इत्यादौ रत्युत्साहयोः। यथा वा।

मात्सर्यमुत्सार्यविचार्यकार्यम्
आर्याः समर्यादमिदं वदन्तु।
सेव्या नितम्बाः किमु भूधराणाम्
उत स्मरस्मेरविलासिनीनाम्॥

इत्यादौ रतिशमयोः। यथा च।

इयं सा लोलाक्षी त्रिभुवनललामैकवसतिः
स चाऽयं दुष्टात्मा स्वसुरपहृतं येन मम तत्।

---

* नितान्तास्फुटत्वादस्य श्लोकस्य व्याख्या न लिखिता।

† एकतो रोदिति प्रियाऽन्यतः समरतूर्यनिर्घोषः।
प्रेम्णा रणरसेन च भटस्य दोलायितं हृदयं॥

इतस्तीव्रः कामो गुरुरयमितः क्रोधदहनः
कृतो वेषश्चाऽयं कथमिदमिति भ्राम्यति मनः॥

इत्यादौ तु रतिक्रोधयोः।

अन्त्रैः कल्पितमङ्गलप्रतिसराः स्त्रीहस्तरक्तोत्पल-
व्यक्तोत्तंसभृतः पिनह्य शिरसा हृत्पुण्डरीकस्रजः।
एताः शोणितपङ्ककुङ्कुमजुषः सम्भूय कान्तैः पिबन्-
त्यस्थिस्नेहसुरां कपालचषकैः प्रीताः पिशाचाङ्गनाः॥

इत्यादावेकाश्रयत्वेन रतिजुगुप्सयोः।

एकं ध्याननिमीलनान्मुकुलितं चक्षुर्द्वितीयं पुनः
पार्वत्या वदनाम्बुजस्तनतटे शृङ्गारभारालसम्।
अन्यद् दूरविकृष्टचापमदनक्रोधानलोद्दीपितं
शम्भोर्भिन्नरसं समाधिसमये नेत्रत्रयं पातु वः॥

इत्यादौ शमरतिक्रोधानाम्।

एकेनाऽक्ष्णा प्रविततरुषा वीक्षते व्योमसंस्थं
भानोर्बिम्बं सजललुलितेनाऽपरेणाऽऽत्मकान्तम्।
अह्नश्छेदे दयितविरहाशङ्किनी चक्रवाकी
द्वौ सङ्कीर्णौ रचयति रसौ नर्तकीव प्रगल्भा॥

इत्यादौ रतिशोकक्रोधानां समप्राधान्येनोपनिबन्धनात् कथं न विरोधः। उच्यते। अत्राऽप्येक एव स्थायी। तथाहि। एकन्तो रुअइ पिआ इत्यादौ स्थायिभूतोत्साहव्यभिचारि-लक्षणवितर्कभावहेतुसन्देहकारणतया करुणसङ्ग्रामतूर्ययोरुपादानं वीरमेव पुष्णातीति भटस्येत्यनेन पदेन प्रतिपादि-

तम्। न च द्वयोः समप्रधानयोरन्योन्यमुपकार्योपकारकभावरहितयोरेकवाक्यभावो युज्यते। किञ्चोपक्रान्ते सङ्ग्रामे सुभटानां कार्यान्तरकरणेन प्रस्तुतसङ्ग्रामौदासीन्येन महदनौचित्यम्। अतो भर्तुः सङ्ग्रामैकरसिकतया शौर्यमेव प्रकाशयन् प्रियतमाकरुणो वीरमेव पुष्णाति। एवं मात्सर्यमित्यादावपि चिरप्रवृत्तरतिवासनाया हेयतयोपादानात् शमैकपरत्वमार्याः समर्यादमित्यनेन प्रकाशितम्। एवमियं सा लोलाचीत्यादावपि रावणस्य प्रतिपक्षनायकतया निशाचरत्वेन मायाप्रधानतया च रौद्रव्यभिचारिविषादविभाववितर्कहेतुतया रतिक्रोधयोरुपादानं रौद्रपरमेव। अन्तैः कल्पितमङ्गलप्रतिसरा इत्यादौ हास्यरसैकपरत्वमेव। एकं ध्याननिमीलनादित्यादौ शब्दोर्भावान्तरैरनाक्षिप्ततया शमस्यास्याऽपि योगयन्तरशमाद् वैलक्षण्यप्रतिपादनेन शमैकपरतैव समाधिसमय इत्यनेन स्फुटीकृता। एकेनाऽक्ष्णेत्यादौ तु समस्तमपि वाक्यं भविष्यद्विप्रलम्भविषयमिति न क्वचिदनेकतात्पर्यम्। यत्र तु श्लेषादिवाक्येष्वनेकतात्पर्यमपि तत्र वाक्यार्थभेदेन स्वतन्त्रतया चाऽर्थद्वयपरतेत्यदोषः। यथा।

श्लाघ्याशेषतनुं सुदर्शनकरः सर्वाङ्गलीलाजित-
त्रैलोक्यां चरणारविन्दललितेनाऽऽक्रान्तलोको हरिः।
बिभ्राणां मुखमिन्दुसुन्दररुचं चन्द्रात्मचक्षुर्दधत्
स्थाने यां स्वतनोरपश्यदधिकां सा रुक्मिणी वोऽवतात्॥

इत्यादौ। तदेवमुक्तप्रकारेण रत्याद्युपनिबन्धे सर्वत्राऽविरोधः।

यथा वा श्रूयमाणरत्यादिपदेष्वपि वाक्येषु तत्रैव तात्पर्यं तथाऽग्रे दर्शयिष्यामः।

ते च।

रत्युत्साहजुगुप्साः क्रोधो हासः स्मयो भयं शोकः।
शममपि केचित् प्राहुः पुष्टिर्नाट्येषु नैतस्य॥ ३३॥

इह शान्तरसं प्रति वादिनामनेकविधा विप्रतिपत्तयः। तत्र केचिदाहुः। नाऽस्त्येव शान्तो रसः। तस्याऽऽचार्येण विभावाद्यप्रतिपादनाल् लक्षणाकरणात्। अन्ये तु वस्तुतस्तस्याऽभावं वर्णयन्ति। अनादिकालप्रवाहायातरागद्वेषयोरुच्छेत्तुमशक्यत्वात्। अन्ये तु वीरबीभत्सादावन्तर्भावं वर्णयन्ति। एवं वदन्तः शममपि नेच्छन्ति। यथातथाऽस्तु। सर्वथा नाटकादावभिनयात्मनि स्थायित्वमस्माभिः शमस्य निषिध्यते। तस्य समस्तव्यापारप्रविलयरूपस्याऽभिनयायोगात्। यत् तु कैश्चिन् नागानन्दादौ शमस्य स्थायित्वमुपवर्णितं तत् तु मलयवत्यनुरागेणाऽप्रबन्धप्रवृत्तेन विद्याधरचक्रवर्तित्वप्राप्त्याऽविरुद्धम्। न ह्येकानुकार्यविभावालम्बनौ विषयानुरागापरागावुपलब्धौ। अतो दयावीरोत्साहस्यैव तत्र स्थायित्वम्। तत्रैव शृङ्गारस्याऽङ्गत्वेन चक्रवर्तित्वावाप्तेश्च फलत्वेनाऽविरोधादीप्सितमेव च सर्वत्र कर्तव्यमिति परोपकारप्रवृत्तस्य विजिगीषोर्नान्तरीयकत्वेन फलं सम्पद्यत इत्यावेदितमेव प्राक्। अतोऽष्टावेव स्थायिनः। ननु च रसनाद् रसत्वमेतेषां मधुरादी-

नामिवोक्तमाचार्यैः। निर्वेदादिष्वपि तत् प्रकाममस्तीति तेऽपि रसा इत्यादिना रसान्तराणामप्यन्यैरभ्युपगतत्वात् स्थायिनोऽप्यन्ये कल्पिता इति अवधारणानुपपत्तिः।

अत्रोच्यते।

निर्वेदादिरताद्रूप्यादस्थायी स्वदते कथम्।
वैरस्यायैव तत्पोषस्तेनाऽष्टौ स्थायिनो मताः॥ ३४॥

विरुद्धाविरुद्धाविच्छेदित्वस्य निर्वेदादीनामभावादस्थायित्वम्। अतएव ते चिन्तादिस्वस्वव्यभिचार्यन्तरिता अपि परिपोषं नीयमाना वैरस्यमावहन्ति। न च निष्फलावसानत्वमेतेषामस्थायित्वनिबन्धनं हास्यादीनामप्यस्थायित्वप्रसङ्गात्। पारम्पर्येण तु निर्वेदादीनामपि फलवत्त्वात्। अतो निष्फलत्वमस्थायित्वे प्रयोजकं न भवति। किन्तु विरुद्धैरविरुद्धैर्भावैरतिरस्कृतत्वम्। न च निर्वेदादीनामिति न ते स्थायिनः। ततो रसत्वमपि न तेषामुच्यते। अतोऽस्थायित्वादेवैतेषामरसता। कः पुनरेतेषां काव्येनाऽपि सम्बन्धः। न तावद् वाच्यवाचकभावः स्वशब्दैरनावेदितत्वात्। न हि शृङ्गारादिरसेषु काव्येषु शृङ्गारादिशब्दा रत्यादिशब्दा वा श्रूयन्ते। येन तेषां तत्परिपोषस्य वाऽभिधेयत्वं स्यात्। यत्राऽपि च श्रूयन्ते तत्राऽपि विभावादिद्वारकमेव रसत्वमेतेषां न स्वशब्दाभिधेयत्वमात्रेण। नाऽपि लक्ष्यलक्षकभावस्तत्सामान्याभिधायिनस्तु लक्षकस्य पदस्याऽप्रयोगात्। नाऽपि लक्षितलक्षणया

तत्प्रतिपत्तिः। यथा गङ्गायां घोष इत्यादौ। तत्र हि स्वार्थे स्रोतोलक्षणे घोषस्यावस्थानासम्भवात् स्वार्थे स्खलद्गतिर्गङ्गाशब्दः स्वार्थं विना भूतार्थोपलक्षितं तटमुपलक्षयति। अत्र तु नायकादिशब्दाः स्वार्थेऽस्खलद्गतयः कथमिवाऽर्थान्तरमुपलक्षयेयुः। को वा निमित्तप्रयोजनाभ्यां विना मुख्ये सत्युपचरितं प्रयुञ्जीत। सिंहो माणवक इत्यादिवत्। अतएव गुणवृत्त्याऽपि नेयं प्रतीतिः। यदि वाच्यत्वेन रसप्रतिपत्तिः स्यात् तदा केवलवाच्यवाचकभावमात्रव्युत्पन्नचेतसामप्यरसिकानां रसास्वादो भवेत्। न च काल्पनिकत्वमविगानेन सर्वसहृदयानां रसास्वादोद्भूतेः। अतः केचिदभिधालक्षणागौणीभ्यो वाच्यान्तरपरिकल्पितशक्तिभ्यो व्यतिरिक्तं व्यञ्जकत्वलक्षणं शब्दव्यापारं रसालङ्कारवस्तुविषयमिच्छन्ति। तथाहि। विभावानुभावव्यभिचारिमुखेन रसादिप्रतिपत्तिरुपजायमाना कथमिव वाच्या स्यात् यथा कुमारसम्भवे।

विवृण्वती शैलसुताऽपि भावम्
अङ्गैः स्फुटद्बालकदम्बकल्पैः।
साचीकृता चारुतरेण तस्थौ
मुखेन पर्यस्तविलोचनेन॥

इत्यादावनुरागजन्यावस्थाविशेषानुभाववद् गिरिजालक्षणविभावोपवर्णनादेवाऽशब्दाऽपि शृङ्गारप्रतीतिरुदेति। रसान्तरेष्वप्ययमेव न्यायः। न केवलं रसेष्वेव यावद् वस्तुमात्रेऽपि। यथा।

*भम धम्मिअ वीसद्धो सो सुणहो अज्ज मारिओ तेण।
गोलाणइकच्छकुडङ्गवासिणा दरिअसीहेण॥

इत्यादौ निषेधप्रतिपत्तिरशब्दाऽपि व्यञ्जकशक्तिमूलैव। तथाऽलङ्कारेष्वपि।

लावण्यकान्तिपरिपूरितदिङ्मुखेऽस्मिन्
स्मेरेऽधुना तव मुखे तरलायताक्षि।
क्षोभं यदेति न मनागपि तेन मन्ये
सुव्यक्तमेव जलराशिरयं पयोधिः॥

इत्यादिषु चन्द्रतुल्यं तन्वीवदनारविन्दमित्याद्युपमाद्यलङ्कारप्रतिपत्तिर्व्यञ्जकत्वनिबन्धनीति। न चाऽसावर्थापत्तिजन्या। अनुपपद्यमानार्थापेक्षाभावात्। नाऽपि वाक्यार्थत्वं व्यङ्ग्यस्य तृतीयकक्षाविषयत्वात्। तथाहि। भम धार्मिकेत्यादौ पदार्थविषयाभिधालक्षणप्रथमकक्षातिक्रान्तक्रियाकारकसंसर्गात्मकविधिविषयवाक्यार्थकक्षातिक्रान्ततृतीयकक्षाक्रान्तो निषेधात्मा व्यङ्ग्यलक्षणोऽर्थो व्यञ्जकशक्त्यधीनः स्फुटमेवाऽवभासते। अतो नाऽसौ वाक्यार्थः। ननु च तृतीयकक्षाविषयत्वमश्रूयमाणपदार्थतात्पर्येषु विषं भुङ्क्ष्वेत्यादिवाक्येषु निषेधार्थविषयेषु प्रतीयत एव वाक्यार्थः। न चाऽत्र व्यञ्जकत्ववादिनाऽपि वाक्यार्थत्वं नेष्यते तात्पर्यादन्यत्वाद् ध्वनेः। तत्र स्वार्थस्य द्वितीयकक्षायामवि-

---

* भम धार्मिक विस्रब्धः स श्वाऽद्य मारितस्तेन।
गोदावरीनदीकच्छकुटङ्गवासिना दृप्तसिंहेन॥

श्रान्तस्य तृतीयकक्षाभावात्। सैव निषेधकक्षा तत्र द्वितीयकक्षाविधौ क्रियाकारकसंसर्गानुपपत्तेः। प्रकरणात् पितरि वक्तरि पुत्रस्य विषभक्षणनियोगाभावात्। रसवद् वाक्येषु च विभावप्रतिपत्तिलक्षणद्वितीयकक्षायां रसानवगमात्। तदुक्तम्।

अप्रतिष्ठमविश्रान्तं स्वार्थे यत्परतामिदम्।
वाक्यं विगाहते तत्र न्याय्या तत्परताऽस्य सा॥
यत्र तु स्वार्थविश्रान्तं प्रतिष्ठां तावदागतम्।
तत् प्रसर्पति तत्र स्यात् सर्वत्र ध्वनिना स्थितिः॥

इत्येवं सर्वत्र रसानां व्यङ्ग्यत्वमेव। वस्त्वलङ्कारयोस्तु क्वचिद् वाच्यत्वं क्वचिद् व्यङ्ग्यत्वम्। तत्राऽपि यत्र व्यङ्ग्यस्य प्राधान्येन प्रतिपत्तिस्तत्रैव ध्वनिरन्यत्र गुणीभूतव्यङ्ग्यत्वम्। तदुक्तम्।

यत्राऽर्थः शब्दो वा यमर्थमुपसर्जनीकृतस्वार्थौ।
व्यक्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥
प्रधानेऽन्यत्र वाक्यार्थे यत्राऽङ्गं तु रसादयः।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः॥

यथा। उपोढरागेणेत्यादि। तस्य च ध्वनेर्विवक्षितवाच्याविवक्षितवाच्यत्वेन द्वैविध्यम्। अविवक्षितवाच्योऽप्यत्यन्ततिरस्कृतस्वार्थोऽर्थान्तरसङ्क्रमितवाच्यश्चेति द्विधा। विवक्षितवाच्यश्च असंलक्ष्यक्रमः क्रमद्योत्यश्चेति द्विविधः। तत्र रसादीनामसंलक्ष्यक्रमे ध्वनित्वं प्राधान्यप्रतीतौ सत्यामङ्गत्वेन प्रतीतौ रसवदलङ्कार इति।

अत्रोच्यते।

वाच्या प्रकरणादिभ्यो बुद्धिस्था वा यथा क्रिया।
वाक्यार्थः कारकैर्युक्ता स्थायी भावस्तथेतरैः ॥ ३५ ॥

यथा लौकिकवाक्येषु श्रूयमाणक्रियेषु गामभ्याजेत्यादिष्व-श्रूयमाणक्रियेषु च द्वारं द्वारमित्यादिषु स्वशब्दोपादानात् प्रकरणादिवशाद् बुद्धिसंनिवेशिनी क्रियैव कारकोपचिता वाक्यार्थस्तथा काव्येष्वपि स्वशब्दोपादानात् क्वचित् प्रीत्यै नवोढा प्रियेत्येवमादौ क्वचिच्च प्रकरणादिवशान् नियताविच्छिन्नविभावाद्यविनाभावाद् वा साचाद् भावकचेतसि विपरिवर्तमानो रत्यादिः स्थायी स्वस्वविभावानुभावव्यभिचारिभिस्तत्तच्छब्दोपनीतैः संस्कारपरम्परया परं प्रौढिमानीयमानो रत्यादिर्वाक्यार्थः। न चाऽपदार्थस्य वाक्यार्थत्वं नास्तीति वाच्यम्। कार्यपर्यवसायित्वात् तात्पर्यशक्तेः। तथाहि पौरुषेयमपौरुषेयं वाक्यं सर्वं कार्यपरम्। अतत्परत्वेऽनुपादेयत्वादुन्मत्तादिवाक्यवत् काव्यशब्दानां चाऽन्वयव्यतिरेकाभ्यां निरतिशयसुखास्वादव्यतिरेकेण प्रतिपाद्यप्रतिपादकयोः प्रवृत्तिविषययोः प्रयोजनान्तरानुपलब्धेः स्वानन्दोद्भूतिरेव कार्यत्वेनाऽवधार्यते। तदुद्भूतिनिमित्तत्वं च विभावादिसंसृष्टस्य स्थायिन एवावगम्यते। अतो वाक्यस्याऽभिधानशक्तिस्तेन तेन रसेनाऽऽकृष्यमाणा तत्तत्स्वार्थापेक्षितावान्तरविभावादिप्रतिपादनद्वारा स्वपर्यवसायितामानीयते। तत्र विभावादयः पदार्थस्थानीयास्तत्संसृष्टो रत्यादिर्वाक्यार्थः। तदेतत् काव्यवाक्यम्। यदीयं ताविमौ पदार्थवाक्यार्थौ। न चैवं सति गीतादिवत् सुखजनकत्वेऽपि

वाच्यवाचकभावानुपयोगः। विशिष्टविभावादिसामग्रीविदुषामेव तथाविधरत्यादिभावनावतामेव स्वादोद्भूतेस्तदनेनाऽतिप्रसङ्गोऽपि निरस्तः। ईदृशि च वाक्यार्थनिरूपणे परिकल्पिताभिधादिशक्तिवशेनैव समस्तवाक्यार्थावगतेः शक्त्यन्तरपरिकल्पनं प्रयासः यथाऽवोचाम काव्यनिर्णये।

तात्पर्यानतिरेकाच्च व्यञ्जकत्वस्य न ध्वनिः।
किमुक्तं स्यादश्रुतार्थतात्पर्येऽन्योक्तिरूपिणि॥
विषं भक्षय पूर्वा यश्चैवं परसुतादिषु।
प्रसज्यते प्रधानत्वाद् ध्वनित्वं केन वार्यते॥
ध्वनिश्चेत् स्वार्थविश्रान्तं वाक्यमर्थान्तराश्रयम्।
तत्परत्वं त्वविश्रान्तौ तन्न विश्रान्त्यसम्भवात्॥
एतावत्येव विश्रान्तिस्तात्पर्यस्येति किं कृतम्।
यावत्कार्यप्रसारित्वात् तात्पर्यं न तुलाधृतम्॥
भ्रमधार्मिकविश्रब्धमिति भ्रमितृतास्पदे।
निर्व्यावृत्ति कथं वाक्यं निषेधमुपसर्पति॥
प्रतिपाद्यस्य विश्रान्तिरपेक्षापूरणाद् यदि।
वक्तुर्विवक्षितप्राप्तेरविश्रान्तिर्न वा कथम्॥
पौरुषेयस्य वाक्यस्य विवक्षा परतन्त्रता।
वक्त्रभिप्रेततात्पर्यमतः काव्यस्य युज्यते॥

इति। अतो न रसादीनां काव्येन सह व्यङ्ग्यव्यञ्जकभावः। किं तर्हि भाव्यभावकसम्बन्धः काव्यं हि भावकम्। भाव्या रसादयः। ते हि स्वतो भवन्त एव भावकेषु विशिष्टविभा-

वादिमता काव्येन भाव्यन्ते न चाऽन्यत्र शब्दान्तरेषु भाव्यभावकलक्षणसम्बन्धाभावात् काव्यशब्देष्वपि तथा भाव्यमिति वाच्यम् । भावनाक्रियावादिभिस्तथाऽङ्गीकृतत्वात् । किञ्च मा चाऽन्यत्र तथास्त्वन्वयव्यतिरेकाभ्यामिह तथाऽवगमात् । तदुक्तम् ।

भावाभिनयसम्बन्धान् भावयन्ति रसानिमान् ।
यस्मात् तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः ॥

इति । कथं पुनरगृहीतसम्बन्धेभ्यः पदेभ्यः स्थाय्यादिप्रतिपत्तिरिति चेत् लोके तथाविधचेष्टायुक्तस्त्रीपुंसादिषु रत्याद्यविनाभावदर्शनादिहाऽपि तथोपनिबन्धे सति रत्याद्यविनाभूतचेष्टादिप्रतिपादकशब्दश्रवणादभिधेयाविनाभावेन लाक्षणिकी रत्यादिप्रतीतिः । यथा च काव्यार्थस्य रसभावकत्वं तथाऽग्रे वक्ष्यामः ।

रसः स एव स्वाद्यत्वाद् रसिकस्यैव वर्तनात् ।
नाऽनुकार्यस्य वृत्तत्वात् काव्यस्याऽतत्परत्वतः ॥ ३६ ॥
द्रष्टुः प्रतीतिर्व्रीडेर्ष्यारागद्वेषप्रसङ्गतः ।
लौकिकस्य स्वरमणीसंयुक्तस्येव दर्शनात् ॥ ३७ ॥

काव्यार्थोपप्लावितो रसिकवर्ती रत्यादिः स्थायीभावः स इति प्रतिनिर्दिश्यते । स च स्वाद्यतां निर्भरानन्दसंविदात्मतामापाद्यमानो रसो रसिकवर्तीति वर्तमानत्वात् नाऽनुकार्यरामादिवर्ती वृत्तत्वात् तस्य । अथ शब्दोपहितरूपत्वेनाऽवर्तमा-

तस्याऽपि वर्तमानवदवभासनमिष्यत एव। तथाऽपि तदवभासस्याऽस्मदादिभिरनुभूयमानत्वादस्मन्मतेकास्वादं प्रति विभावत्वेन तु रामादेर्वर्तमानवदवभासनमिष्यत एव। किञ्च न काव्यं रामादीनां रसोपजननाय कविभिः प्रवर्त्यते। अपितु सहृदयानानन्दयितुम्। स च समस्तभावकस्वसंवेद्य एव। यदि चाऽनुकार्यस्य रामादेः शृङ्गारः स्यात् ततो नाटकादौ तद्दर्शने लौकिक इव नायके शृङ्गारिणि स्वकान्तासंयुक्ते दृश्यमाने शृङ्गारवानयमिति प्रेक्षकाणां प्रतीतिमात्रं भवेत् न रसानां स्वादः सत्पुरुषाणां च लज्जेतरेषां त्वसूयानुरागापहारेच्छादयः प्रसज्येरन्। एवं च सति रसादीनां व्यङ्ग्यत्वमपास्तम्। अन्यतो लब्धसत्ताकं वस्त्वन्येनाऽपि व्यज्यते। प्रदीपेनेव घटादि। न तु तदानीमेवाऽभिव्यञ्जकत्वाभिमतैरापाद्यस्वभावम्। भाव्यन्ते च विभावादिभिः प्रेक्षकेषु रसा इत्यावेदितमेव।

ननु च सामाजिकाश्रयेषु रसेषु को विभावः। कथं च सीतादीनां च देवीनां विभावत्वेनाऽविरोधः उच्यते।

धीरोदात्ताद्यवस्थानां रामादिः प्रतिपादकः।
विभावयति रत्यादीन् स्वदन्ते रसिकस्य ते॥ ३८॥

न हि कवयो योगिन इव ध्यानचक्षुषा ध्यात्वा प्रातिस्विकीं रामादीनामवस्थां इतिहासवदुपनिबध्नन्ति। किं तर्हि

सर्वलोकसाधारणाः स्वोत्प्रेक्षाकृतसन्निधयो धीरोदात्ताद्यवस्थाः क्वचिदाश्रयमात्रदायिन्या इर्धति।

ता एव च परित्यक्तविशेषा रसहेतवः।

तत्र सीतादिशब्दाः परित्यक्तजनकतनयादिविशेषाः स्त्रीमात्रवाचिनः किमिवाऽनिष्टं कुर्युः। किमर्थं तर्ह्युपादीयन्त इति चेदुच्यते।

क्रीडतां मृन्मयैर्यद्वद् बालानां द्विरदादिभिः।
स्वोत्साहः स्वदते तद्वच्छ्रोतृणामर्जुनादिभिः॥ ३९ ॥

एतदुक्तं भवति। नाऽत्र लौकिकशृङ्गारादिवत् स्त्र्यादिविभावादीनामुपयोगः। किं तर्हि प्रतिपादितप्रकारेण लौकिकरसविलक्षणत्वं नाट्यरसानाम्। यदाह। अष्टौ नाट्यरसाः स्मृता इति।

काव्यार्थभावनास्वादो नर्तकस्य न वार्यते।

नर्तकोऽपि न लौकिकरसेन रसवान् भवति। तदानीं भोग्यत्वेन स्वमहिलादेरग्रहणात् काव्यार्थभावनया त्वस्मदादिवत् काव्यरसास्वादोऽस्याऽपि न वार्यते।

कथं च काव्यात् स्वादोद्भूतिः किमात्मा चाऽसाविति व्युत्पाद्यते।

स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः॥ ४० ॥
विकाशविस्तरक्षोभविक्षेपैः स चतुर्विधः।
शृङ्गारवीरबीभत्सरौद्रेषु मनसः क्रमात्॥ ४१ ॥

हास्याद्भुतभयोत्कर्षकरुणानां त एव हि।

अतस्तज्जन्यता तेषामत एवाऽवधारणम्। ॥ ४२ ॥

काव्यार्थेन विभावादि संसृष्टस्थाय्यात्मकेन भावकचेतसः सम्भेदेऽन्योन्यसंवलने प्रत्यस्तमितस्वपरविभागे सति प्रबलतरस्वानन्दोद्भूतिः स्वादः। तस्य च सामान्यात्मकत्वेऽपि प्रतिनियतविभावादिकारणजन्यत्वेन सम्भेदेन चतुर्धा चित्तभूमयो भवन्ति। तद् यथा। शृङ्गारे विकासो वीरे विस्तरो बीभत्से क्षोभो रौद्रे विक्षेप इति तदन्येषां चतुर्णां हास्याद्भुतभयानककरुणानां स्वसामग्रीलब्धपरिपोषाणां त एव चत्वारो विकासाद्याश्चेतसः सम्भेदाः। अतएव।

शृङ्गाराद्धि भवेद्धास्यो रौद्राच् च करुणो रसः।

वीराच् चैवाऽद्भुतोत्पत्तिर्बीभत्साच् च भयानकः॥

इति। हेतुहेतुमद्भाव एव सम्भेदापेक्षया दर्शितो न कार्यकारणभावाभिप्रायेण तेषां कारणान्तरजन्यत्वात्।

शृङ्गारानुकृतिर्या तु स हास्य इति कीर्तितः।

इत्यादिना विकासादिसम्भेदैकत्वस्यैव स्फुटीकरणादवधारणमप्यतएवाऽष्टाविति सम्भेदानां भावात्। ननु च युक्तं शृङ्गारवीरहास्यादिषु प्रमोदात्मकेषु वाक्यार्थसम्भेदादानन्दोद्भव इति। करुणादौ तु दुःखात्मकत्वे कथमिवाऽसौ प्रादुष्यात्। तथाहि। तत्र करुणात्मककाव्यश्रवणाद् दुःखाविर्भावोऽश्रुपातादयश्च रसिकानामपि प्रादुर्भवन्ति। न चैतदानन्दात्मकत्वे सति युज्यते। सत्यमेतत्। किन्तु तादृश एवाऽसावानन्दः सुखदुःखा-

त्मका यथा प्रहरणादिषु सम्भोगावस्थायां कुट्टमिते स्त्रीणाम-न्यस्य लौकिकात् करुणात् काव्यकरुणः। तथाह्यत्रोत्तरो-त्तरा रसिकानां प्रवृत्तयः। यदि वा लौकिककरुणवद् दुःखात्मकत्वमेवास्य स्यात् तदा न कश्चित् तत्र प्रवर्त्तेत। ततः कारुण्यैकरसानां रामायणादिमहाप्रबन्धानामुच्छेद एव भवे-दश्रुपातादयश्चेति वृत्तवर्णनाकर्णनेन विनिपातितेषु लौकिक-वैक्लव्यदर्शनादिवत् प्रेक्षकाणां प्रादुर्भवन्तो न विरुध्यन्ते। त-स्माद् रसान्तरवत् करुणस्याऽप्यानन्दात्मकत्वमेव।

ननु शान्तरसस्याऽनभिधेयत्वाद् यद्यपि नाट्येऽनुप्रवेशो नाऽस्ति तथाऽपि सूक्ष्मातीतादिवस्तूनां सर्वेषामपि शब्दप्रति-पाद्यताया विद्यमानत्वात् काव्यविषयत्वं न निवार्यते। अत-स्तदुच्यते।

शमप्रकर्षो निर्वाच्यो मुदितादेस्तदात्मता।

शान्तो हि यदि तावत्।

न यत्र दुःखं न सुखं न चिन्ता
न द्वेषरागौ न च काचिदिच्छा।
रसस्तु शान्तः कथितो मुनीन्द्रैः
सर्वेषु भावेषु शमप्रधानः॥

इत्येवंलक्षणस्तदा तस्य मोक्षावस्थायामेवाऽऽत्मस्वरूपापत्ति-लक्षणायां प्रादुर्भावात् तस्य च स्वरूपेणाऽनिर्वचनीयता। तथाहि श्रुतिरपि स एष नेति नेत्यन्यापोहरूपेणाऽऽह न

च तथाभूतस्य शान्तरसस्य सहृदयाः स्वादयितारः सन्त्यथ तदुपायभूतो मुदितामैत्रीकरुणोपेक्षादिलक्षणस्य च ।व-काशविस्तारक्षोभविक्षेपरूपतैवेति । तदुक्तैव शान्तरसमास्वादो निरूपितः ।

इदानीं विभावादिविषयावान्तरकाव्यव्यापारप्रदर्शनपूर्वकः प्रकरणेनोपसंहारः प्रतिपाद्यते ।

पदार्थैरिन्दुनिर्वेदरोमाञ्चादिस्वरूपकैः ।
काव्याद् विभावसञ्चार्यनुभावप्रख्यतां गतैः ॥ ४३ ॥
भावितः स्वदते स्थायी रसः स परिकीर्तितः ।

अतिशयोक्तिरूपकाव्यव्यापाराहितविशेषैश्चन्द्राद्यैरुद्दीपनविभावैः प्रमदाप्रभृतिभिरालम्बनविभावैर्निर्वेदादिभिर्व्यभिचारिभावै रोमाञ्चाश्रुभ्रूक्षेपकटाक्षाद्यैरनुभावैरवान्तरव्यापारतया पदार्थीभूतैर्वाक्यार्थः स्थायीभावो विभावितो भावरूपतामानीतः स्वदते स रस इति प्राक्प्रकरणे तात्पर्यम् ।

विशेषलक्षणान्युच्यन्ते । तत्राऽऽचार्येण स्थायिनां रत्यादीनां शृङ्गारादीनां च पृथग् लक्षणानि विभावादिप्रतिपादनेनोदितानि । अत्र तु ।

लक्ष्मणैक्यं विभावैक्यादभेदाद् रसभावयोः ॥ ४४ ॥

क्रियत इति वाक्यशेषः ।

तत्र तावत् शृङ्गारः ।

रम्यदेशकलाकालवेषभोगादिसेवनैः ।
प्रमोदात्मा रतिः सैव यूनोरन्योन्यरक्तयोः ।
प्रहृष्यमाणा शृङ्गारो मधुराङ्गविचेष्टितैः ॥ ४५ ॥

इत्थमुपनिबध्यमानं काव्यं शृङ्गारास्वादाय प्रभवतीति। कव्युपदेशपरमेतत् ।

तत्र देशविभावो यथोत्तररामचरिते ।

स्मरसि सुतनु तस्मिन् पर्वते लक्ष्मणेन
प्रतिविहितसपर्यासुस्थयोस्तान्यहानि ।
स्मरसि सरसतीरां तत्र गोदावरीं वा
स्मरसि च तदुपान्तेष्वावयोर्वर्तनानि ॥

कलाविभावो यथा ।

हस्तैरन्तर्निहितवचनैः सूचितः सम्यगर्थः
पादन्यासैर्लयमुपगतस्तन्मयत्वं रसेषु ।
शाखायोनिर्मृदुरभिनयः षड्विकल्पोऽनुवृत्तेर्
भावे भावे नुदति विषयान् रागबन्धः स एव ॥

यथा च ।

व्यक्तिर्व्यञ्जनधातुना दशविधेनाऽप्यत्र लब्धाऽमुना
विस्पष्टो द्रुतमध्यलम्बितपरिच्छिन्नस्त्रिधाऽयं लयः ।
गोपुच्छप्रमुखाः क्रमेण गतयस्तिस्रोऽपि सम्पादिताम्
तत्त्वौघानुगताश्च वाद्यविधयः सम्यक् त्रयो दर्शिताः ॥

कालविभावो यथा कुमारसम्भवे ।

असूत सद्यः कुसुमान्यशोकः
स्कन्धात् प्रभृत्येव सपल्लवानि।
पादेन चाऽपेक्षत सुन्दरीणां
सम्पर्कमासिञ्जितनूपुरेण॥

इत्युपक्रमे।

मधु द्विरेफः कुसुमैकपात्रे
पपौ प्रियां स्वामनुवर्तमानः।
शृङ्गेण संस्पर्शनिमीलिताक्षीं
मृगीमकण्डूयत कृष्णसारः॥

वेषविभावो यथा तत्रैव।

अशोकनिर्भर्त्सितपद्मरागम्
आकृष्टहेमद्युतिकर्णिकारम्।
मुक्ताकलापीकृतसिन्दुवारं
वसन्तपुष्पाभरणं वहन्ति॥

उपभोगविभावो यथा।

चक्षुर्लुप्तमषीकणं कवलितस्ताम्बूलरागोऽधरे
विश्रान्ता कबरी कपोलफलके लुप्तेव गात्रद्युतिः।
जाने सम्प्रति मानिनि प्रणयिना कैरप्युपायक्रमैर्
भग्नो मानमहातरुस्तरुणि ते चेतःस्थलीवर्धितः॥

प्रमोदात्मा रतिर्यथा मालतीमाधवे।

जगति जयिनस्ते ते भावा नवेन्दुकलादयः
प्रकृतिमधुराः सन्त्येवाऽन्ये मनो मदयन्ति ये।

मम तु यदियं याता लोके विलोचनचन्द्रिका
नयनविषयं जन्मन्येकः स एव महोत्सवः ॥

युवतिविभावो यथा मालविकाग्निमित्रे।

दीर्घाक्षं शरदिन्दुकान्तिवदनं बाहू नतावंसयोः
संक्षिप्तं निबिडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव।
मध्यः पाणिमितो नितम्बि जघनं पादावरालाङ्गुली
छन्दो नर्तयितुर्यथैव मनसः सृष्टं तथाऽस्या वपुः ॥

यूनोर्विभावो यथा मालतीमाधवे।

भूयो भूयः सविधनगरीरथ्यया पर्यटन्तं
दृष्ट्वा दृष्ट्वा भवनवलभीतुङ्गवातायनस्था।
साक्षात् कामं नवमिव रतिर्मालतीमाधवं यद्
गाढोत्कण्ठालुलितललितैरङ्गकैस्ताम्यतीति ॥

अन्योन्यानुरागो यथा तत्रैव।

यान्त्या मुहुर्वलितकन्धरमाननं तद्
आवृत्तवृत्तशतपत्रनिभं वहन्त्या।
दिग्धोऽमृतेन च विषेण च पक्ष्मलाक्ष्या
गाढं निखात इव मे हृदये कटाक्षः ॥

मधुराङ्गविचेष्टितं यथा तत्रैव।

स्तिमितविकसितानामुल्लसद्भ्रूलतानां
मसृणमुकुलितानां प्रान्तविस्तारभाजाम्।
प्रतिनयननिपाते किंचिदाकुञ्चितानां
विविधमहमभूवं पात्रमालोकितानाम् ॥

ये सत्त्वजाः स्थायिन एव चाऽष्टौ
त्रिंशत् त्रयो ये व्यभिचारिणश्च।
एकोनपञ्चाशदमी हि भावाः
युक्त्या निबद्धाः परिपोषयन्ति।
आलस्यमौग्र्यं मरणं जुगुप्सा
तस्याऽऽश्रयाद्वैतविरुद्धमिष्टम्॥ ४६॥

त्रयस्त्रिंशद्व्यभिचारिणश्चाऽष्टौ स्थायिन अष्टौ सात्त्विकास्त्वे-त्येकोनपञ्चाशत्। युक्त्याऽङ्गत्वेनोपनिबध्यमानाः शृङ्गारं सम्पादयन्त्यालस्यौग्र्यजुगुप्सामरणादीन्येकालम्बनविभावाश्रयत्वेन सा-क्षादङ्गत्वेन चोपनिबध्यमानानि विरुध्यन्ते। प्रकारान्तरेण चा-ऽविरोधः प्राक् प्रतिपादित एव।

विभागस्तु।

अयोगो विप्रयोगश्च सम्भोगश्चेति स त्रिधा।

अयोगविप्रयोगविशेषत्वाद् विप्रलम्भस्यैतत् सामान्याभिधा-यित्वेन विप्रलम्भशब्द उपचरितवृत्तिर्माभूदिति न प्रयुक्तः। तथाहि। दत्त्वा सङ्केतमप्राप्तेऽवध्यतिक्रमे साध्येन नायिकान्त-रानुसरणाच्च विप्रलम्भशब्दस्य मुख्यप्रयोगो वञ्चनार्थत्वात्।

तत्राऽयोगोऽनुरागेऽपि नवयोरेकचित्तयोः।
पारतन्त्र्येण दैवाद्वा विप्रकर्षादसङ्गमः॥ ४७॥

योगोऽन्योन्यस्वीकारस्तदभावस्त्वयोगः। पारतन्त्र्येण वि-प्रकर्षाद् दैवपित्राद्यायत्तत्वात् सागरिकामालत्योर्वत्सराज-

माधवाभ्यामिव दैवाद् गौरीशिवयोरिवाऽसमागमोऽयोगः ।

दशावस्थः स तत्राऽऽदावभिलाषोऽथ चिन्तनम् ।
स्मृतिर्गुणकथोद्वेगप्रलापोन्मादसञ्ज्वराः ।
जडता मरणं चेति दुरवस्थं यथोत्तरम् ॥ ४८ ॥
अभिलाषः स्पृहा तत्र कान्ते सर्वाङ्गसुन्दरे ।
दृष्टे श्रुते वा तत्राऽपि विस्मयानन्दसाध्वसाः ॥ ४९ ॥
साक्षात् प्रतिकृतिस्वप्नच्छायामायासु दर्शनम् ।
श्रुतिर्व्याजात् सखीगीतमागधादिगुणस्तुतेः ॥ ५० ॥

अभिलाषो यथा शाकुन्तले ।

असंशयं क्षत्रपरिग्रहक्षमा
यदार्यमस्यामभिलाषि मे मनः ।
सतां हि सन्देहपदेषु वस्तुषु
प्रमाणमन्तःकरणप्रवृत्तयः ॥

विस्मयो यथा ।

स्तनावालोक्य तन्वङ्ग्याः शिरः कम्पयते युवा ।
तयोरन्तरनिर्मग्नां दृष्टिमुत्पाटयन्निव ॥

आनन्दो यथा विद्धशालभञ्जिकायाम् ।

सुधाबद्धग्रासैरुपवनचकोरैः कवलितां
किरन् ज्योत्स्नामच्छां लवलिफलपाकप्रणयिनीम् ।
उपप्राकाराग्रं प्रहिणु नयने तर्कय मनाग्
अनाकाशे कोऽयं गलितहरिणः शीतकिरणः ॥

साध्वसं यथा कुमारसम्भवे।

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिर्
निक्षेपणाय पदमुद्धृतमुद्वहन्ती।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ॥

यथा वा।

व्याहृता प्रतिवचो न सन्दधे
गन्तुमैच्छदवलम्बितांशुका।
सेवते स्म शयनं पराङ्मुखी
सा तथाऽपि रतये पिनाकिनः॥

सानुभावविभावास्तु चिन्ताद्याः पूर्वदर्शिताः।

गुणकीर्तनं तु स्पष्टत्वान्न व्याख्यातम्।

दशावस्थत्वमाचार्यैः प्रायो वृत्त्या निदर्शितम्।
महाकविप्रबन्धेषु दृश्यते तदनन्तता॥५१॥

दिङ्मात्रं तु।

दृष्टे श्रुतेऽभिलाषाच्च किं नौत्सुक्यं प्रजायते।
अप्राप्तौ किं न निर्वेदो ग्लानिः किं नाऽतिचिन्तनात्॥५२॥

शेषं प्रच्छन्नकामितादि कामसूत्रादवगन्तव्यम्।

अथ विप्रयोगः।

विप्रयोगस्तु विश्लेषो रूढविस्रम्भयोर्द्विधा।
मानप्रवासभेदेन मानोऽपि प्रणयेर्ष्ययोः ॥ ५३ ॥

प्राप्तयोरप्राप्तिर्विप्रयोगः। तस्य द्वौ भेदौ मानः प्रवासश्च। मानविप्रयोगोऽपि द्विविधः प्रणयमान ईर्ष्यामानश्चेति।

तत्र प्रणयमानः स्यात् कोपावसितयोर्द्वयोः।

प्रेमपूर्वको वशीकारः प्रणयस्तद्भङ्गो मानः प्रणयमानः। स च द्वयोर्नायकयोर्भवति। तत्र नायकस्य यथोत्तररामचरिते।

अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः
सा हंसैः कृतकौतुका चिरमभूद् गोदावरीसैकते।
आयान्त्या परिदुर्मनायितमिव त्वां वीक्ष्य बद्धस्तया
कातर्यादरविन्दकुड्मलनिभो मुग्धः प्रणामाञ्जलिः ॥

नायिकाया यथा श्रीवाक्पतिराजदेवस्य।

प्रणयकुपितां दृष्ट्वा देवीं ससम्भ्रमविस्मितम्
त्रिभुवनगुरुर्भीत्या सद्यः प्रणामपरोऽभवत्।
नमितशिरसो गङ्गालोके तया चरणाहता
ववतु भवतस्त्र्यक्षस्यैतद् विलक्षमवस्थितम् ॥

उभयोः प्रणयमानो यथा।

*पणअकुविआण दोह्णवि अलिअपसुत्ताण माणइन्ताणं।
णिच्चलणिरुद्धणीसासदिण्णअण्णाण को मल्लो ॥

* प्रणयकुपितयोर्द्वयोरप्यलीकप्रसुप्तयोर्मानवतोः।
निश्चलनिरुद्धनिश्वासदत्तकर्णयोः को मल्लः ॥

स्त्रीणामीर्ष्याकृतो मानः कोपोऽन्यासङ्गिनि प्रिये।
श्रुते वाऽनुमिते दृष्टे श्रुतिस्तत्र सखीमुखात्॥ ५४॥
उत्स्वप्नायितभोगाङ्कगोत्रस्खलनकल्पितः।
त्रिधाऽऽनुमानिको दृष्टः साक्षादिन्द्रियगोचरः॥ ५५॥

ईर्ष्यामानः पुनः स्त्रीणामेव नायिकान्तरसङ्गिनि स्वकान्ते उपलब्धे सत्यन्यासङ्गः श्रुतो वाऽनुमितो दृष्टो वा स्यात्।
तत्र श्रवणं सखीवचनात् तस्या विश्वास्यत्वात्। यथा ममैव।

सुभ्रु त्वं नवनीतकल्पहृदया केनाऽपि दुर्मन्त्रिणा
मिथ्यैव प्रियकारिणा मधुमुखेनाऽस्मासु चण्डीकृता।
किं त्वेतद् विमृश क्षणं प्रणयिनामेणाक्षि कस्ते हितः
किं धात्रीतनया वयं किमु सखी किंवा किमस्मत्सुहृत्॥

उत्स्वप्नायितो यथा रुद्रस्य।

निर्मग्नेन मयाऽम्भसि स्मरभराद्बालीसमालिङ्गिता
केनाऽलीकमिदं तवाऽद्य कथितं राधे मुधा ताम्यसि।
इत्युत्स्वप्नपरम्परासु शयने श्रुत्वा वचः शार्ङ्गिणः
सव्याजं शिथिलीकृतः कमलया कण्ठग्रहः पातु वः॥

भोगाङ्कानुमितो यथा।

नवनखपदमङ्गं गोपयस्यंशुकेन
स्थगयसि पुनरोष्ठं पाणिना दन्तदष्टम्।
प्रतिदिशमपरस्त्रीसङ्गशंसी विसर्पन्
नवपरिमलगन्धः केन शक्यो वरीतुम्॥

गोत्रस्खलनकल्पितो यथा।

*केलीगोत्तक्खलणे विकुप्पए केअवं अआणन्ती ।
दुट्ठ उअसु परिहासं जाआ सच्चं विअ परुणा ॥

दृष्टो यथा श्रीमुञ्जस्य ।

प्रणयकुपितां दृष्ट्वा देवीं ससम्भ्रमविस्मितस्
त्रिभुवनगुरुर्भीत्या सद्यः प्रणामपरोऽभवत् ।
नमितशिरसो गङ्गालोके तया चरणाहता-
ववतु भवतस्त्र्यक्षस्यैतद् विलक्षमवस्थितम् ॥

एषाम् ।

यथोत्तरं गुरुः षड्भिरुपायैस्तमुपाचरेत् ।
साम्ना भेदेन दानेन नत्युपेक्षारसान्तरैः ॥ ५६ ॥
तत्र प्रियवचः साम भेदस्तत्सख्युपार्जनम् ।
दानं व्याजेन भूषादेः पादयोः पतनं नतिः ॥ ५७ ॥
सामादौ तु परिक्षीणे स्यादुपेक्षाऽवधीरणम् ।
रभसत्रासहर्षादेः कोपभ्रंशो रसान्तरम् ।
कोपचेष्टाश्च नारीणां प्रागेव प्रतिपादिताः ॥ ५८ ॥

तत्र प्रियवचः साम यथा ममैव ।

स्मितज्योत्स्नाभिस्ते धवलयति विश्वं मुखशशी
दृशस्ते पीयूषद्रवमिव विमुञ्चन्ति परितः ।
वपुस्ते लावण्यं किरति मधुरं दिक्षु तदिदं
कुतस्ते पारुष्यं सुतनु हृदयेनाऽद्य गुणितम् ॥

---

*केलीगोत्रस्खलने विकुप्यति कैतवमजानन्ती ।
दुष्ट पश्य परिहासं जाया सत्यमिव प्ररुदिता ॥

[यथा वा।

इन्दीवरेण नयनं मुखमम्बुजेन
कुन्देन दन्तमधरं नवपल्लवेन।
अङ्गानि चम्पकदलैः स विधाय वेधाः
कान्ते कथं रचितवानुपलेन चेतः॥]

नायिकासखीसमावर्जनभेदो यथा ममैव।

कृतेऽप्याज्ञाभङ्गे कथमिव मया ते प्रणतयो
धृताः स्मित्वा हस्ते विसृजसि रुषं सुभ्रु बहुशः।
प्रकोपः कोऽप्यन्यः पुनरयमसीमाऽद्य गुणिता
वृथा यत्र स्निग्धाः प्रियसहचरीणामपि गिरः॥

दानं व्याजेन भूषादेर्यथा माघे।

मुहुरुपहसितामिवाऽलिनादैर्
वितरसि नः कलिकां किमर्थमेनाम्।
अधिरजनि गतेन धाम्नि तस्याः
शठ कलिरेव महांस्त्वयाऽद्य दत्तः॥

पादयोः पतनं नतिर्यथा।

*णेउरकोडिविलग्गं चिउरं दइअस्स पाअपडिअस्स।
हिअअं माणपउत्थं उम्मोअं त्ति च्चिअ कहेइ॥

उपेक्षा तदवधीरणं यथा।

किं गतेन न हि युक्तमुपैतुं
नेश्वरे परुषता सखि साध्वी।

---

* नूपुरकोटिविलग्नं चिकुरं दयितस्य पादपतितस्य।
हृदयं मानपदोत्थमुन्मुक्तमित्येव कथयति॥

आनयैनमनुनीय कथं वा
विप्रियाणि जनयन्ननुनेयः ॥

एभस्त्वासहर्षादे रसान्तरात्कोपभंशो यथा ममैव ॥

अभिव्यक्तालीकः सकलविफलोपायविभवश्
चिरं ध्यात्वा सद्यः कृतकृतकसंरम्भनिपुणम् ।
इतः पृष्ठे पृष्ठे किमिदमिति सन्त्रास्य सहसा
कृताश्लेषां धूर्तः स्मितमधुरमालिङ्गति वधूम् ॥

अथ प्रवासविप्रयोगः ।

कार्यतः सम्भ्रमाच्छापात् प्रवासो भिन्नदेशता ।
द्वयोस्तत्राऽश्रुनिःश्वासकार्श्यलम्बालकादिता ॥ ५९ ॥
स च भावी भवन् भूतस्त्रिधाऽऽद्यो बुद्धिपूर्वकः ।

आद्यः कार्यजः समुद्रगमनसेवादिकार्यवशप्रवृत्तौ बुद्धिपूर्वकत्वात् भूतभविष्यद्वर्तमानतया त्रिविधः ।

तत्र यास्यत्प्रवासो यथा ।

*होन्तपहिअस्स जाआ आउच्छणजीअधारणरहस्सं ।
पुच्छन्ती भमइ घरं घरेसु पिअविरहसहिरीआ ॥

गच्छत्प्रवासो यथाऽमरुशतके ।

[प्रहरविरतौ मध्ये वाऽह्नस्ततोऽपि परेऽथवा
दिनकृति गते वाऽस्तं नाथ त्वमद्य समेष्यसि ।
इति दिनशतप्राप्यं देशं प्रियस्य यियासतो
हरति गमनं बालाऽऽलापैः सबाष्पगलज्जलैः ॥

---

*भविष्यत्पथिकस्य जाया आयुःस्थाजीवधारणरहस्यं ।
पृच्छन्ती भ्रमति गृहाद्गृहेषु प्रियविरहसहिष्णुका ॥

यथा वा तत्रैव।]

देशैरन्तरिता शतैश्च सरितामुर्वीभृतां काननैर्
यत्नेनाऽपि न याति लोचनपथं कान्तेति जानन्नपि।
उद्ग्रीवश्चरणार्धरुद्धवसुधः कृत्वाऽश्रुपूर्णे दृशौ
तामाशां पथिकस्तथाऽपि किमपि ध्यात्वा चिरं तिष्ठति॥

गतप्रवासो यथा मेघदूते।

उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चिद्
भूयो भूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती॥

आगच्छदागतयोस्तु प्रवासाभावादेष्यत्प्रवासस्य च गतप्रवासाविशेषात् त्रैविध्यमेव युक्तम्।

द्वितीयः सम्भ्रमोत्पन्नो दिव्यमानुषविप्लवात्।

उत्पातनिर्घातवातादिजन्यविप्लवात् परचक्रादिजन्यविप्लवाद् वाऽबुद्धिपूर्वकत्वादेकरूप एव सम्भ्रमजः प्रवासः। यथोर्वशीपुरूरवसोर्विक्रमोर्वश्याम्। यथा च कपालकुण्डलापहृतायां मालत्यां मालतीमाधवयोः।

स्वरूपान्यत्वकरणाच्छापजः सन्निधावपि॥ ६०॥

यथा कादम्बर्यां वैशम्पायनस्येति।

मृते त्वेकत्र यत्राऽन्यः प्रलपेच्छोक एव सः।
व्याश्रयत्वान् न शृङ्गारः प्रत्यापन्ने तु नेतरः॥ ६१॥

यथेन्दुमतीमरणादजस्य करुण एव रघुवंशे। कादम्बर्यां तु प्रथमं करुण आकाशसरस्वतीवचनादूर्ध्वं प्रवासशृङ्गार एवेति।

तत्र नायिकां प्रति नियमः।

प्रणयायोगयोरुत्का प्रवासे प्रोषितप्रिया।
कलहान्तरितेर्ष्यायां विप्रलब्धा च खण्डिता॥ ६२॥

अथ सम्भोगः।

अनुकूलौ निषेवेते यत्राऽन्योन्यं विलासिनौ।
दर्शनस्पर्शनादीनि स सम्भोगो मुदाऽन्वितः॥ ६३॥

यथोत्तररामचरिते।

किमपि किमपि मन्दं मन्दमासत्तियोगाद्
अविरलितकपोलं जल्पतोरक्रमेण।
सपुलकपरिरम्भव्यापृतैकैकदोष्णोर्
अविदितगतयामा रात्रिरेव व्यरंसीत्॥

अथवा। प्रिये किमेतत्।

विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोदो निद्रा वा किमु विषविसर्पः किमु मदः।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारः कोऽप्यन्तर्जडयति च तापं च कुरुते॥

यथा च ममैव।

लावण्यामृतवर्षिणि प्रतिदिशं कृष्णागरुश्यामले
वर्षाणामिव ते पयोधरभरे तन्वङ्गि दूरोन्नते।

नासावंशमनोज्ञकेतकतनुर्भ्रूपत्रगर्भोल्लसत्-
पुष्पश्रीस्तिलकः सहेलमलकैर्भृङ्गैरिवाऽऽपीयते ॥

चेष्टास्तत्र प्रवर्तन्ते लीलाद्या दश योषिताम्।
दाक्षिण्यमार्दवप्रेम्णामनुरूपाः प्रियं प्रति ॥ ६४ ॥

ताश्च सोदाहृतयो नायकप्रकाशे दर्शिताः।

रमयेच्च चाटुकृत् कान्तः कलाक्रीडादिभिश्च ताम्।
न ग्राम्यमाचरेत् किञ्चिन् नर्मभ्रंशकरं न च ॥ ६५ ॥

ग्राम्यः सम्भोगः रङ्गे निषिद्धोऽपि काव्येऽपि न कर्तव्य इति पुनर्निषिध्यते। यथा रत्नावल्याम्।

स्पृष्टस्त्वयैष दयिते स्मरपूजाव्यापृतेन हस्तेन।
उद्भिन्नापरमृदुतरकिसलय इव लक्ष्यतेऽशोकः ॥

इत्यादि। नायकनायिकाकैशिकीवृत्तिनाटकनाटिकालक्षणाद् युक्तं कविपरम्परावगतं स्वयमौचित्यसम्भावनानुगुण्येनालोचितं चाऽनुसन्दधानः सुकविः शृङ्गारमुपनिबध्नीयात्।

अथ वीरः।

वीरः प्रतापविनयाध्यवसायसत्त्व-
मोहाविषादनयविस्मयविक्रमाद्यैः।
उत्साहभूः स च दयारणदानयोगात्
त्रेधा किलाऽत्र मतिगर्वधृतिप्रहर्षाः ॥ ६६ ॥

प्रतापविनयादिभिर्विभावितः करुणायुद्धदानाद्यैरनुभावितो गर्वधृतिहर्षामर्षस्मृतिमतिवितर्कप्रभृतिभिर्भावित उत्साहः

स्थायी स्वदते भावकमनोविस्तारानन्दाय प्रभवतीत्येष वीरः। तत्र दयावीरो यथा नागानन्दे जीमूतवाहनस्य। युद्धवीरो वीरचरिते रामस्य। दानवीरः परशुरामबलिप्रभृतीनाम्।

त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः।

इति।

खर्वग्रन्थिविमुक्तसन्धिविकसद्वक्षः स्फुरत्कौस्तुभं
निर्यन्नाभिसरोजकुड्मलकुटीगम्भीरसामध्वनि।
पात्रावाप्तिसमुत्सुकेन बलिना सानन्दमालोकितं
पायाद् वः क्रमवर्धमानमहिमाश्चर्यं मुरारेर्वपुः॥

यथा च ममैव।

लक्ष्मीपयोधरोत्सङ्गकुङ्कुमारुणितो हरेः।
बलिरेष स येनाऽस्य भिक्षापात्रीकृतः करः॥

विनयादिषु पूर्वमुदाहृतमनुसन्धेयम्। प्रतापगुणावर्जनादिना वीराणामपि भावात् त्रैधं प्रायोवादः। प्रस्वेदरक्तवदननयनादिक्रोधानुभावरहितो युद्धवीरोऽन्यथा रौद्रः।

अथ बीभत्सः।

बीभत्सः कृमिपूतिगन्धिवमथुप्रायैर्जुगुप्सैकभूर्
उद्वेगी रुधिरान्त्रकीकसवसामांसादिभिः क्षोभणः।
वैराग्याज् जघनस्तनादिषु घृणाशुद्धोऽनुभावैर्वृतो
नासावक्त्रविकूणनादिभिरिहाऽऽवेगार्तिशङ्कादयः॥ ६७॥

अत्यन्ताहृद्यैः कृमिपूतिगन्धिप्रायविभावैरुद्भूतो जुगुप्सास्थायिभावपरिपोषलक्षण उद्वेगी बीभत्सः। यथा मालतीमाधवे।

उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि मांसा-

न्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा।

आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्काद्

अङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति॥

रुधिरान्त्रवसाकीकसमांसादिविभावः क्षोभणो बीभत्सः।
यथा वीरचरिते।

अन्त्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कङ्कण-

प्रायप्रेङ्खितभूरिभूषणरवैराघोषयन्त्यम्बरम्।

पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लसद्-

व्यालोलस्तनभारभैरववपुर्दर्पोद्धतं धावति॥

रम्येष्वपि रमणीयजघनस्तनादिषु वैराग्याद् घृणाशुद्धो बी-
भत्सः। यथा।

लालां वक्त्रासवं वेत्ति मांसपिण्डौ पयोधरौ।

मांसास्थिकूटं जघनं जनः कामग्रहातुरः॥

न चाऽयं शान्त एव विरक्तो यतो बीभत्समानो विरज्यते।
अथ रौद्रः।

क्रोधो मत्सरवैरिवैकृतमयैः पोषोऽस्य रौद्रोऽनुजः

क्षोभः स्वाधरदंशकम्पभ्रुकुटिस्वेदास्यरागैर्युतः।

शस्त्रोल्लासविकत्थनांसधरणीघातप्रतिज्ञाग्रहैर्

अत्राऽमर्षमदौ स्मृतिश्चपलतासूयाग्र्यवेगादयः॥ ६८॥

मात्सर्यविभावो रौद्रो यथा वीरचरिते।

त्वं ब्रह्मवर्चसधरो यदि वर्तमानो
यद्वा स्वजातिसमयेन धनुर्धरः स्याः।
उग्रेण भोस्तव तपस्तपसा दहामि
पक्षान्तरस्य सदृशं परशुः करोति॥

वैरिवैकृतादिर्यथा वेणीसंहारे।

लाक्षागृहानलविषान्नसभाप्रवेशैः
प्राणेषु वित्तनिचयेषु च नः प्रहृत्य।
आकृष्टपाण्डववधूपरिधानकेशाः
स्वस्था भवन्तु मयि जीवति धार्तराष्ट्राः॥

इत्येवमादिविभावैः प्रस्वेदरक्तवदननयनाद्यनुभावैः अमर्षादिव्यभिचारिभिः क्रोधपरिपोषो रौद्रः। परशुरामभीमसेनदुर्योधनादिव्यवहारेषु वीरचरितवेणीसंहारादेरनुगन्तव्यः।

अथ हास्यः।

विकृताकृतिवाग्वेषैरात्मनोऽथ परस्य वा।
हासः स्यात् परिपोषोऽस्य हास्यस्त्रिप्रकृतिः स्मृतः॥ ६९॥

आत्मस्थान् विकृतवेषभाषादीन् परस्थान् वा विभावानवलम्बमानो हासस्तत्परिपोषात्मा हास्यो रसो द्व्यधिष्ठानो भवति। स चोत्तममध्यमाधमप्रकृतिभेदात् षड्विधः।

आत्मस्थो यथा रावणः।

जातं मे परुषेण भस्मरजसा तच्चन्दनोद्धूलनं
हारो वक्षसि यज्ञसूत्रमुचितं क्लिष्टा जटाः कुन्तलाः।

हृद्याचैः सकलैः सरत्नवलयं चित्रांशुकं वस्त्वलं
सीतालोचनहारि कल्पितमहो रम्यं वपुः कामिनः ॥

परस्थो यथा।

भिक्षो मांसनिषेवणं प्रकुरुषे किं तेन मद्यं विना
किं ते मद्यमपि प्रियं प्रियमहो वाराङ्गनाभिः सह।
वेश्या द्रव्यरुचिः कुतस्तव धनं द्यूतेन चौर्येण वा
चौर्यद्यूतपरिग्रहोऽपि भवतो दासस्य काऽन्या गतिः ॥

स्मितमिह विकासिनयनं किञ्चिल्लक्ष्यद्विजं तु हसितं स्यात्।
मधुरस्वरं विहसितं सशिरःकम्पमिदमुपहसितम् ॥ ७० ॥
अपहसितं सास्राक्षं विक्षिप्ताङ्गं भवत्यतिहसितम्।
द्वे द्वे हसिते चैषां ज्येष्ठे मध्येऽधमे क्रमशः ॥ ७१ ॥

उत्तमस्य स्वपरस्थविकारदर्शनात् स्मितहसिते मध्यमस्य विहसितोपहसितेऽधमस्याऽपहसितातिहसिते। उदाहृतयः स्वयमुत्प्रेक्ष्याः। व्यभिचारिणश्चाऽस्य।

निद्रालस्यश्रमग्लानिमूर्च्छाश्च सहचारिणः।
अतिलोकैः पदार्थैः स्याद् विस्मयात्मा रसोऽद्भुतः ॥ ७२ ॥
कर्माऽस्य साधुवादाश्रुवेपथुस्वेदगद्गदाः।
हर्षावेगधृतिप्राया भवन्ति व्यभिचारिणः ॥ ७३ ॥

लोकसीमातिवृत्तपदार्थवर्णनादिविभावितः साधुवादाद्य-

नुभावपरिपुष्टो विस्मयः स्थायिभावो हर्षावेगादिभावितो रसोऽद्भुतः। यथा।

दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्धतष्
टङ्कारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः।
द्राक् पर्याप्तकपालसम्पुटमिलद्ब्रह्माण्डभाण्डोदर-
भ्राम्यत्पिण्डितचण्डिमा कथमसौ नाऽद्याऽपि विश्राम्यति॥

इत्यादि।

अथ भयानकः।

विकृतस्वरसत्त्वादेर्भयभावो भयानकः।
सर्वाङ्गवेपथुस्वेदशोषवैचित्त्यलक्षणः।
दैन्यसम्भ्रमसम्मोहत्रासादिस्तत्सहोदरः॥ ७४॥

रौद्रशब्दश्रवणाद् रौद्रसत्त्वदर्शनाच् च भयस्थायिभावप्रभवो भयानको रसः। तत्र सर्वाङ्गवेपथुप्रभृतयोऽनुभावाः। दैन्यादयस्तु व्यभिचारिणः। भयानको यथा प्रागुदाहृतः।

शस्त्रमेतत् समुत्सृज्य कुब्जीभूय शनैः शनैः।
यथायथागतेनैव यदि शक्नोषि गम्यताम्॥

यथा च रत्नावल्याम्। नष्टं वर्षवरैरित्यादि। यथा च।

स्वगेहात् पन्थानं तत उपचितं काननमथो
गिरिं तस्मात् सान्द्रद्रुमगहनमस्मादपि गुहाम्।
तदन्वङ्गान्यङ्गैरभिनिविशमानो न गणय-
त्यरातिः क्वालीये तव विजययात्रा चकितधीः॥

अथ करुणः।

इष्टनाशादनिष्टाप्तौ शोकात्मा करुणोऽनु तम्।
निःश्वासोच्छ्वासरुदितस्तम्भप्रलपितादयः ॥ ७५ ॥
स्वापापस्मारदैन्याधिमरणालस्यसम्भ्रमाः।
विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः ॥ ७६ ॥

इष्टस्य बन्धुप्रभृतेर्विनाशादनिष्टस्य तु बन्धनादेः प्राप्त्या शोकप्रकर्षजः करुणः। तमन्विति तदनुभावनिश्वासादिकथनम्। व्यभिचारिणश्च स्वापापस्मारादयः। इष्टनाशात् करुणो यथा कुमारसम्भवे।

अयि जीवितनाथ जीवसी-
त्यभिधायोत्थितया तया पुरः।
ददृशे पुरुषाकृतिः क्षितौ
हरकोपानलभस्म केवलम्॥

इत्यादि रतिप्रलाप। अनिष्टावाप्तेः सागरिकाया बन्धनाद् यथा रत्नावल्याम्।

प्रीतिभक्त्यादयो भावा मृगयाक्षादयो रसाः।
हर्षोत्साहादिषु स्पष्टमन्तर्भावान् न कीर्तिताः ॥ ७७ ॥

स्पष्टम्।

षट्त्रिंशद्भूषणादीनि सामादीन्येकविंशतिः।
लक्ष्यसन्ध्यन्तराङ्गानि सालङ्कारेषु तेषु च ॥ ७८ ॥

विभूषणं चाऽक्षरसंहतिश्च
शोभाभिमानौ गुणकीर्तनं च।

इत्येवमादीनि षट्त्रिंशत्काव्यलक्षणानि । साम भेदः प्रदानं चेत्येवमादीनि सन्ध्यन्तराण्येकविंशतिरुपमादिष्विवाऽलङ्कारेषु हर्षोत्साहादिष्वन्तर्भावान् न पृथगुक्तानि ।

रम्यं जुगुप्सितमुदारमथाऽपि नीचम्
उग्रं प्रसादि गहनं विकृतं च वस्तु ।
यद्वाऽप्यवस्तु कविभावकभाव्यमानं
तन् नाऽस्ति यन् न रसभावमुपैति लोके ॥ ७९ ॥

विष्णोः सुतेनाऽपि धनञ्जयेन
विद्वन्मनोरागनिबन्धहेतुः ।
आविष्कृतं मुञ्जमहीशगोष्ठी-
वैदग्ध्यभाजा दशरूपमेतत् ॥ ८० ॥

इति श्रीविष्णुसूनोर्धनिकस्य कृतौ दशरूपावलोके
रसविचारो नाम चतुर्थः प्रकाशः समाप्तः ॥

अथ भारतीयनाट्यशास्त्रे ।

अष्टादशोऽध्यायः ।

कथयिष्याम्यहं विप्रा दशरूपविकल्पनम् ।
नामतः कर्मतश्चैव तथा चैव प्रयोगतः ॥ १ ॥
नाटकं सप्रकरणमङ्को व्यायोग एव च ।
भाणः समवकारश्च वीथी प्रहसनं डिमः ॥ २ ॥
ईहामृगश्च विज्ञेयो दशमे नाट्यलक्षणे ।
एतेषां लक्षणमहं व्याख्यास्याम्यनुपूर्वशः ॥ ३ ॥
सर्वेषामेव काव्यानां मातृका वृत्तयः स्मृताः ।
आभ्यो विनिःसृतं ह्येतद् दशरूपं प्रयोगतः ॥ ४ ॥
जातिभिः श्रुतिभिश्चैव स्वरा ग्रामत्वमागताः ।
यथा तथा वृत्तिभेदैः काव्यभेदा भवन्ति हि ॥ ५ ॥
ग्रामौ पूर्णस्वरौ द्वौ तु यथा वै षड्जमध्यमौ ।
सर्ववृत्तिविनिष्पन्नौ काव्यबन्धौ तथा त्विमौ ॥ ६ ॥
ज्ञेयं प्रकरणं चैव तथा नाटकमेव च ।
सर्ववृत्तिविनिष्पन्नं नानावस्थान्तराश्रयम् ॥ ७ ॥
भाणः समवकारश्च तथेहामृग एव च ।
उत्सृष्टिकाङ्को व्यायोगो वीथी प्रहसनं डिमः ॥ ८ ॥
कैशिकीवृत्तिहीनानि रूपाण्येतानि कारयेत् ।
अत ऊर्ध्वं प्रवक्ष्यामि काव्यबन्धविकल्पनम् ॥ ९ ॥

प्रख्यातवस्तुविषयं प्रख्यातोदात्तनायकम् ।
राजर्षिवंश्यचरितं तथा दिव्याश्रयोपेतम् ॥ १० ॥
नानाविभूतियुक्तं ऋद्धिविलासादिभिश्चैव ।
अङ्कप्रवेशकाव्यं भवति हि तत् तोटकं नाम ॥ ११ ॥
नृपतीनां यच् चरितं नानारसभावसंश्रितं बहुधा ।
सुखदुःखोत्पत्तिकृतं भवति हि तन् नाटकं नाम ॥ १२ ॥
अस्याऽवस्थोपेतं कार्यं प्रसमीक्ष्य बिम्बप्रस्तारात् ।
कर्तव्योऽङ्कस्तज्ज्ञैः स तु सम्यङ् नाटके विधिवत् ॥ १३ ॥
अङ्क इति रूढिशब्दो भावैश्च रसैश्च रोहयत्यर्थान् ।
नानाविधानयुक्तो यस्मात् तस्माद् भवेदङ्कः ॥ १४ ॥
यत्राऽर्थस्य समाप्तिर्यत्र च बीजस्य भवति संहारः ।
किञ्चिदवलग्नबिन्दुः सोऽङ्क इति सदाऽवगन्तव्यः ॥ १५ ॥
ये नायका निगदितास् तेषां प्रत्यक्षचरितसंयोगः ।
नानावस्थान्तरितः कार्यस्त्वङ्को यथार्थरसः ॥ १६ ॥
नायकदेवीपरिजनपुरोहितामात्यसार्थवाहानाम् ।
नैकरसाम्बरविहितो ह्याऽङ्क इति स विदितव्यस्तु ॥ १७ ॥
क्रोधप्रसादशोकाः शापोत्सर्गोऽथ विद्रवोद्वाहौ ।
अद्भुतसंश्रयदर्शनमङ्के प्रत्यक्षजानि स्युः ॥ १८ ॥
युद्धं राज्यस्य भ्रंशो मरणं समरस्य रोधनं चैव ।
प्रत्यक्षाणि तु नवाङ्के प्रवेशकैः संविधेयानि ॥ १९ ॥
अङ्के प्रवेशके वा प्रकरणमाश्रित्य नाटकं वाऽपि ।
भवतः कर्तव्यः स्याद् यस्य च स नायकः ख्यातः ॥ २० ॥

अपसरणमेव कार्यं सन्धिर्वा ग्रहणमेव वा नित्यम्।
बहुभिः कार्यविशेषैः प्रवेशकैः सूचयेद् वाऽपि ॥ २१ ॥
एकदिवसप्रवृत्तः कार्यस्त्वङ्कोऽथ बीजमाश्रित्य।
आवश्यककार्याणामविरोधेन प्रयोगेषु ॥ २२ ॥
एकाङ्केन कदाचिद् बहूनि कार्याणि योजयेद् धीमान्।
आवश्यकाविरोधे न तत्र कार्याणि कार्याणि ॥ २३ ॥
रङ्गे तु ये प्रविष्टाः सर्वेषां भवति तत्र निष्क्रामः।
बीजार्थयुक्तिमुक्तं कृत्वा कार्यं यथार्थरसम् ॥ २४ ॥
ज्ञात्वा दिवसावस्थां क्षणयाममुहूर्तलक्षणोपेतम्।
विभजेत् सर्वमशेषं पृथक् पृथक् कार्यमङ्केषु ॥ २५ ॥
दिवसावसानकार्यं यद्यङ्के नोपपद्यते सर्वम्।
अङ्कच्छेदं कृत्वा प्रवेशकैस्तद् विधेयं हि ॥ २६ ॥
सविरहितनायककं कर्तव्यो नाटके प्रकरणे वा।
परिजनकथानुबन्धः प्रवेशको नाम विज्ञेयः ॥ २७ ॥
अङ्कच्छेदं कृत्वा मासकृतं वर्षसञ्चितं वाऽपि।
तत् सर्वं कर्तव्यं वर्षादूर्द्ध्वं न तु कदाचित् ॥ २८ ॥
यः कश्चित् कार्यवशाद् गच्छति पुरुषः प्रकृष्टमध्वानम्।
तत्राऽप्यङ्कच्छेदः कर्तव्यः पूर्ववत् तज्ज्ञैः ॥ २९ ॥
अङ्कान्तरानुसारी सङ्क्षेपार्थमधिकृत्य विहितोऽयम्।
प्रकरणनाटकविषयोपदेशको नाम विज्ञेयः ॥ ३० ॥
नोत्तममध्यमपुरुषैराचरितो नाप्युदात्तवचनकृतः।
प्राकृतभाषाचारः प्रवेशको नाम विज्ञेयः ॥ ३१ ॥

कालोत्थानगतिरसवत्यासारसकामविषयाणाम् ।
आर्याभिधानमूत: प्रवेशक: स्यादनेकार्थ: ॥ ३२ ॥
बङ्काश्रयमप्यर्थं सङ्क्षिप्तेऽर्थे तु सन्धिषु च ।
बहुचूर्णपादवृत्तं जनयति खेदं प्रयोगस्य ॥ ३३ ॥
यत्राऽर्थस्य समाप्तिर्न भवत्यङ्के प्रयोगबाहुल्यात् ।
विष्कम्भ: स्वल्पकथ: प्रवेशकै: सोऽभिधातव्य: ॥ ३४ ॥
शुद्ध: सङ्कीर्णो वा द्विविधो विष्कम्भकोऽपि विज्ञेय: ।
मध्यमपात्र: शुद्ध: सङ्कीर्णो नीचमध्यकृत: ॥ ३५ ॥
न महाजनपरिवारं कर्तव्यं नाटकं प्रकरणं वा ।
यत् तत्र कार्यपुरुषास्तत्वार: पञ्चधा ते स्यु: ॥ ३६ ॥
व्यायोगेहामृगसमवकारडिमसंश्रितानि कार्याणि ।
दशभिर्द्वादशभिर्वा षोडशभिर्वाऽपि पुरुषै: स्यु: ॥ ३७ ॥
गोपुच्छाग्रं काव्यं कर्तव्यं बन्धमासाद्य ।
ये चोदात्ता भावास्ते सर्वे पृष्ठत: कार्या: ॥ ३८ ॥
सर्वेषां काव्यानां नानारसभावयुक्तियुक्तानाम् ।
निवर्हणं कर्तव्यं नित्यं हि रसोऽद्भुतस्तज्ज्ञै: ॥ ३९ ॥
नाटकलक्षणमेतन् मया समासेन प्रकीर्तितम् ।
विविधं प्रकरणमत:परमहं लक्षणयुक्त्या प्रवक्ष्यामि ॥ ४० ॥
यत्र कविरात्मबुद्ध्या वस्तु शरीरं नायकं चैव ।
औत्पात्तिकं प्रकुरुते तज्ज्ञेयं प्रकरणं नाम ॥ ४१ ॥
यदनायकहार्यकार्यं प्रकरोत्यद्भुतगुणयुक्तम् ।
प्रकरणमिति तद् विद्याद् बीजं बीजार्थसंयुक्तम् ॥ ४२ ॥

यन् नाटके मयोक्तं वस्तु शरीरं समाश्रयोपेतम् ।
तत् प्रकरणेऽपि कार्यं केवलमुत्पाद्यवस्तु स्यात् ॥ ४३ ॥
विप्रवणिक्सचिवानां पुरोहितामात्यसार्थवाहानाम् ।
चरितं यन् नैकविधं ज्ञेयं तत् प्रकरणं नाम ॥ ४४ ॥
नोदात्तनायककृतं न दिव्यचरितं न राजसम्भोगः ।
बाह्यजनसंयुक्तं ज्ञेयं तत् प्रकरणं नाम ॥ ४५ ॥
दासविटश्रेष्ठियुतं वेश्यस्त्र्युपचारकरणोपेतम् ।
मन्दकुलस्त्रीचरितं काव्यं कार्यं प्रयोगे तु ॥ ४६ ॥
सचिवश्रेष्ठिब्राह्मणपुरोहितामात्यसार्थवाहानाम् ।
गृहवार्ता यत्र भवेन् न तत्र वेश्याङ्गना कार्या ॥ ४७ ॥
यदि वेश्ययुवतियुक्तं न कुलस्त्रीसङ्गमस्ति ।
तत्राऽप्यकुलजनप्रयुक्तं न वेशयुवतिर्भवेत् तत्र ॥ ४८ ॥
यदि क्राकरणयुक्त्या* वेश्यकुलस्त्रीकृतोपचारं स्यात् ।
अविकृतभाषाचारं तत्र तु पाठ्यं प्रयोक्तव्यम् ॥ ४९ ॥
प्रकरणनाटकविषये पञ्चाद्या दश परास्तथा चैव ।
अङ्काः कर्तव्याः स्युर्नानारसभावसंयुक्ताः ॥ ५० ॥
मध्यमपुरुषैर्नित्यं योज्यो विष्कम्भकोऽपि तत्त्वज्ञैः ।
संस्कृतवचनानुगतः सङ्क्षिप्तार्थः प्रवेशकवत् ॥ ५१ ॥
शुद्धः सङ्कीर्णो वा द्विविधो विष्कम्भकोऽपि कर्तव्यः ।
मध्यमपात्रैः शुद्धः सङ्कीर्णो नीचमध्यकृतः ॥ ५२ ॥

---

* प्राकरण्ययुक्त्येति सम्भवपाठः ।

अङ्कान्तरालविहितः प्रवेशकोऽर्थक्रियामभिवीक्ष्य ।
सङ्क्षेपात् सन्धीनामर्थानां चैव कर्तव्यः ॥ ५३ ॥
अनयोश्च बन्धयोगादन्यो भेदः प्रयोक्तृभिः कार्यः ।
प्रख्यातस्त्वितरो वा नाटीसञ्ज्ञाश्रिते काव्ये ॥ ५४ ॥
स्त्रीप्रयोगचतुरङ्का ललिताभिनयात्मिका सुविहिताङ्गी ।
बहुगीतनृत्यवाद्यरतिसम्भोगात्मिका चैव ॥ ५५ ॥
राजोपचारयुक्ता शृङ्गाराभिनयभावनाटिका ज्ञेया ।
प्रकरणनाटकनाटीलक्षणमुक्तं मया समासेन ॥ ५६ ॥
वक्ष्याम्यतःपरं लक्षणयुक्त्या समवकारम् ।
देवासुरबीजकृतः प्रख्यातोदात्तनायकश्चैव ॥ ५७ ॥
अङ्कस्तथा त्रिकपटः त्रिविद्रवः स्यात् त्रिशृङ्गारः ।
द्वादशनायकबहुलो ह्यष्टादशनायिकासमाप्यश्च ॥ ५८ ॥
वक्ष्याम्यस्याङ्कविधिं यावत्यो नाटिका यत्र ।
अङ्कस्तु सप्रसहनः सविद्रवः सकपटः सवीथीकः ॥ ५९ ॥
द्वादशनाडीविहितः प्रथमः कार्यकृतोपेतः ।
कार्यस्तथा द्वितीयः समाश्रितो नाटिकास्वतस्तस्य ॥ ६० ॥
वस्तुसमापनविहितो द्विनाडिकः स्यात् तृतीयस्तु ।
नाडीसञ्ज्ञा ज्ञेया मानं कालस्य यन् मुहूर्तार्धम् ॥ ६१ ॥
तन् नाडिकाप्रमाणं यथोक्तमङ्केषु संयोज्यम् ।
अङ्कान्ते सम्बन्धः कर्तव्ये काव्यबन्धमासाद्य ॥ ६२ ॥
अर्थं हि समवकारे ह्यप्रतिसम्बन्धमिच्छन्ति ।
युद्धजलसम्भवो वा ह्यग्निगजेन्द्रसम्भवो वाऽपि ॥ ६३ ॥

नगरोपरोधजो वा विज्ञेयो विद्रवस्त्रिविधः।
वस्तुगतिक्रमविहितो दैववशाद् वा परप्रयुक्तो वा ॥ ६४ ॥
सुखदुःखोत्पत्तिकृतस्त्रिविधः कपटाश्रयो ज्ञेयः।
त्रिविधश्चाऽत्र विधिज्ञैः पृथक् पृथक् काव्ययोगविहितार्थः॥६५॥
त्रिविधकृतशृङ्गारो ज्ञेयो धर्मार्थकामेषु।
यत्र तु धर्मसमापकमात्महितं भवति साधनं बहुधा॥६६॥
व्रतनियमतपोयुक्तो ज्ञेयोऽसौ धर्मशृङ्गारः॥ ६७ ॥
अर्थस्येच्छायोगाद् बहुधा चैवाऽर्थतोऽर्थशृङ्गारः।
सम्यक्प्रयोगविषयेष्वर्थार्थिकान्यानि च चारयति यत्र॥६८॥
कन्याविलोभनं वै प्राप्य स्त्रीपुंसयोस्तु रहः।
रम्यं वा निभृतं वा विज्ञेयः कामशृङ्गारः॥ ६९ ॥
उष्णिग् वाऽनुष्टुब् वा छन्दःसु च यानि बन्धकुटिलानि।
वृत्तानि समवकारे कविभिस्तानि प्रयोज्यानि॥ ७० ॥
एवं कार्यस्तज्ज्ञैर्नानारससंश्रयः समवकारे।
अत ऊर्ध्वं व्याख्यास्ये लक्षणमीहामृगस्याऽपि॥ ७१ ॥
दिव्यपुरुषाश्रयकृतो दिव्यस्त्रीकारणोपगतयुक्तः॥
सुविहितवस्तुप्रथितो विप्रत्ययकारकश्चैव॥ ७२ ॥
उद्धतपुरुषप्रायः स्त्रीरोषग्रथितकाव्यबन्धश्च।
सङ्क्षोभविद्रवकृतः सम्फेटककृतस्तथैव॥ ७३ ॥
स्त्रीभेदनापहरणे प्रमर्देनाऽप्राप्तस्तु शृङ्गारः।
ईहामृगस्तु कार्यः सुतरङ्कविभूषितश्चैव॥ ७४ ॥
यद् व्यायोगे कार्यं ये पुरुषा वृत्तयो रसाश्चैव।

ईहामृगेऽपि ते स्युः केवलमेवास्त्ययोगः ॥ ७५ ॥
यत्र तु वधेप्सितानां वन्धो ह्युदयो भवेद्धि पुरुषाणाम् ।
किञ्चिद् व्याजं कृत्वा तेषां युद्धं समर्पयितव्यम् ॥ ७६ ॥
ईहामृगस्य लक्षणमित्युक्तं चतुरस्रमिदं समासयोगेन ।
डिमलक्षणं तु भूयो लक्षणयुक्त्या प्रवक्ष्यामि ॥ ७७ ॥
प्रख्यातवस्तुविषयः प्रख्यातोदात्तनायकश्चैव ।
षट्त्रिंशल्लक्षणयुक्तश् चतुरङ्गो वै डिमः कार्यः ॥ ७८ ॥
शृङ्गारहास्यवर्जितः शेषैरन्यैः समायुक्तः ।
दीप्तरसकाव्ययोनिर् नानाचित्रो डिमः कार्यः ॥ ७९ ॥
निर्घातचन्द्रसूर्योपरागसोल्कावपातसंयुक्तः ।
युद्धनियुद्धनिबद्धसम्फेटस्तत्र कर्तव्यः ॥ ८० ॥
मायेन्द्रजालबहुलबहुपुरुषोत्थानभेदसंयुक्तः ।
देवभुजगेन्द्रराक्षसयक्षपिशाचावकीर्णश्च ॥ ८१ ॥
षोडशनायकबहुलः सात्त्वत्यारभटिसंयुक्तः ।
कार्यो डिमः प्रयत्नात् तज्ज्ञैर्नानाश्रयविशेषः ॥ ८२ ॥
व्यायोगः सुविधिज्ञैः कार्यः प्रख्यातनायकशरीरः ।
स्त्रीजनयुक्तस्तु डिमस्त्वेकाहकृतस्तथा चैव ॥ ८३ ॥
बहवस्तत्र तु पुरुषा व्यायच्छन्ते यथा समवकारे ।
न च तत्प्रमाणस्त्वेकाङ्कः संविधातव्यः ॥ ८४ ॥
नरदिव्यनायककृतः कार्यो राजर्षिनायकनिबद्धम् ।
युद्धनियुद्धाधर्षणसम्फेटकृतश्च कर्तव्यः ॥ ८५ ॥
एवंविधस्तु कार्यो व्यायोगो दीप्तकाव्यरसयोनिः ।

वक्ष्याम्यतःपरमहं लक्षणमुत्सृष्टिकाङ्कस्य ।
प्रख्यातवस्तुविषयोऽप्रख्यातः कदाचिदेव स्यात् ॥ ८६ ॥
दिव्यपुरुषैर्वियुक्तः शेषैरन्यैर्भवेत् पुम्भिः ।
करुणरसप्रायकृतो निवृत्तयुद्धोद्धतप्रहारस्तु ॥ ८७ ॥
स्त्रीपरिदेवनबहुलो निर्वेदितवाक्यभाषश्च ।
नातिव्यायतवेश्म सात्त्वत्यारभटिकैशिकीहीनः ॥ ८८ ॥
कार्यः काव्यविधिज्ञैः सततं चोत्सृष्टिकाङ्कस्तु ।
यद् दिव्यनायककृतं कार्यं सङ्ग्रामयुद्धवधयुक्तम् ॥ ८९ ॥
तद् भारते तु वर्षे कर्तव्यं काव्यबन्धेषु ।
कस्माद् भारतमिष्टं वर्षेष्वन्येषु नित्यकष्टं हि ॥ ९० ॥
हृद्या सर्वा भूमिः शुभगन्धा काञ्चनी चैव ।
उपवनगमनक्रीडाविहारनारीरतिप्रमोदाः स्युः ॥ ९१ ॥
तेषु हि सर्वेषु सदा नो दुःखं नाऽपि वा शोकः ।
यत् तेषामधिवासाः पुराणवादेषु सर्वतः कथिताः ॥९२॥
सम्भोगस्तेषु भवेत् कर्मारम्भास्तथा त्वस्मिन् ।
प्रहसनमिति विज्ञेयं द्विविधं शुद्धं तथा च सङ्कीर्णम् ॥९३॥
तस्य व्याख्यास्याम्यहं पृथक् पृथग् लक्षणविशेषान् ।
भगवत्तापसविप्रैरन्यैरपि हास्यवादसम्पन्नम् ॥ ९४ ॥
नीचजनसंयुक्तं परिहासाभाषणप्रायम् ।
अविकृतभाषाचारं विशेषभावोपहासरचितपदम् ॥ ९५ ॥
नियतगतिवस्तुविषयं शुद्धं ज्ञेयं प्रहसनं तु ।
वेश्यानपुंसकविटैर्वानिकदासीजनेन वा कीर्णम् ॥ ९६ ॥

अनिवृत्तवेषपरिच्छेदचेष्टितकरणैश्च सम्पन्नम् ।
लोकोपचारयुक्ता या वार्ता यश्च दम्भसंयोगः ॥ ९७ ॥
स प्रहसने न योज्यो धूर्तजनविवादसंयुक्तः ।
उद्घात्यकादिभिरिदं वीथ्यङ्गैर्मिश्रितं भवति मिश्रम् ॥९८॥
भाणस्य विधानमतो लक्षणयुक्त्या प्रवक्ष्यामि ।
आत्मानुभूतशंसी परसंश्रयवर्णनाविशेषश्च ॥ ९९ ॥
द्विविधाप्रियो हि भाणो विज्ञेयस्त्वेकपात्रश्च ।
परवचनमात्मसंस्थं प्रतिवचनैः सोत्तरैर्ग्रथितवाक्यम् ॥१००॥
धूर्तविटसम्प्रयोज्यो नानावस्थान्तरात्मकश्चैव ।
वस्त्वेकमाङ्कः कार्यः सततं काव्ये बुधैर्भाणः ॥ १०१ ॥
वीथी स्यादेकाङ्का द्विपात्रहार्या तथैकहार्या वा ।
अधमोत्तममध्याभिर्युक्ता स्यात् प्रकृतिभिस्तिसृभिः ॥१०२॥
सर्वरसभावयुक्ता विज्ञेया वीथिका ह्यथैतस्याः ।
अङ्गानां वक्ष्येऽहं लक्षणमधुना यथोद्देशम् ॥ १०३ ॥
उद्घात्यकावलगिते अवस्यन्दितकं तथा ।
असत्प्रलापश्च तथा प्रपञ्चो नालिकाऽपि या ॥ १०४ ॥
*वाक्केल्यधिबलं चैव छलं व्याहार एव च ।
मृदवं त्रिगतं चैव ज्ञेयं गण्डमथाऽपि वा ॥ १०५ ॥
पदानि च गतार्थानि तदर्थगतये नराः ।
योजयन्ति पदैरन्यैस्तदुद्घात्यकमुच्यते ॥ १०६ ॥

---

* वागित्यत्र पुस्तके पतितं ।

यत्राऽन्यस्मिन् समावेश्य कार्यमन्यत् प्रसाध्यते ।
परानुरोधात् तज् ज्ञेयं नाम्नाऽवलगितं बुधैः ॥ १०७ ॥
आक्षिप्य कश्चिदेवाऽर्थं शुभाशुभसमुत्थितम् ।
यद् वादबुद्धिनैपुण्यात् तदवस्यन्दितं भवेत् ॥ १०८ ॥
असम्बद्धं तु यद् वाक्यमसम्बद्धं यदुत्तरम् ।
असत्प्रलापस्तं चैव वीथ्यां सम्यक् प्रयोजयेत् ॥ १०९ ॥
यदसद्भूतं वचनं संस्तवयुक्तं द्वयोः परस्परतः ।
एकस्य चार्थहेतोः स हास्यजननः प्रपञ्चस्तु ॥ ११० ॥
हास्येनोपगतार्था प्रहेलिका नालिकेति विज्ञेया ।
एकद्विप्रतिवचनां तां केलीं नाम जानीयुः ॥ १११ ॥
परवचनमात्मनश्चोत्तरोत्तरसमुद्भवं द्वयोर्यत्र ।
अन्यार्थविशेषकमधिबलमिति बहुविधैर्ज्ञेयम् ॥ ११२ ॥
अन्यार्थमेव वाक्यं छलमिति सन्धानहास्यरोषकरम् ।
प्रत्यक्षवृत्तिकथितो व्याहारो हास्यलेशार्थः ॥ ११३ ॥
यद्गुणदोषीकरणं दोषगुणीकरणमेव च
यैर्हेतुभिरुपपन्नार्थैस्तन् मृदवं नामविज्ञेयम् ॥ ११४ ॥
यथाऽनुदात्तवचनं त्रिधा विभक्तं भवेत् प्रयोगे तु ।
हास्यरससम्प्रयुक्तं तत् त्रिगतं नाम विज्ञेयम् ॥ ११५ ॥
संरम्भसम्भ्रमयुतं विवादयुक्तं तदापवादकृतम् ।
बहुवचनापेक्षकृतं गण्डमिति वदन्ति तत्त्वज्ञाः ॥ ११६ ॥
अन्यान्यपि लास्यविधावङ्गानि तु नाटकोपयोगानि ।
अस्माद् विनिःसृतानि तु भाण इवैकप्रयोज्यानि ॥ ११७ ॥

गेयपदं स्थितपाठ्यमासीनं पुष्पगण्डिका ।
प्रच्छेदकत्रिमूढाख्यं सैन्धवं चेद् विमूढकम् ॥ ११८ ॥
उत्तमोत्तमकं चैव उक्तप्रत्युक्तमेव च ।
लास्ये दशविधं ह्येतदङ्गनिर्देशलक्षणम् ॥ ११९ ॥
आसनेषूपविष्टैर्यत् तन्त्रीभाण्डोपबृंहितम् ।
गायनैर्गीयते शुष्कं तद् गेयपदमुच्यते ॥ १२० ॥
बहुचारीसमायुक्तं पञ्चपाणिकलानुगम् ।
वत्सपुच्छेन वा युक्तं स्थितपाठ्यं विधीयते ॥ १२१ ॥
आसीनमासनस्थस्य सर्वतोद्यविवर्जितम् ।
अप्रसारितगात्रं च चिन्ताशोकान्वितं च यत् ॥ १२२ ॥
नृत्तं तु द्विविधं यत्र गीतमातोद्यमेव च ।
स्त्रियः पुंवच्च चेष्टन्ते सा ज्ञेया पुष्पगण्डिका ॥ १२३ ॥
प्रच्छेदकः स विज्ञेयो यत्र चन्द्रातपाहृता ।
*स्त्रियः स्त्रियेषु न सज्जन्ते ह्यपि विक्रियकारिषु ॥ १२४ ॥
अनिष्ठुरश्लक्ष्णपदं समवृत्तैरवं कृतम् ।
नाट्यं पुरुषभावाढ्यं त्रिमूढकमुदाहृतम् ॥ १२५ ॥
रूपवाद्यादिसंयुक्तमव्यक्तकरणाश्रयम् ।
पाठ्यहीनं स्वभावोत्था विदुः सैन्धवकं बुधाः ॥ १२६ ॥
मुखप्रतिमुखोपेतं चतुरस्रपदक्रमम् ।
स्पष्टभावरसोपेतं नानार्थं च विमूढकम् ॥ १२७ ॥
उत्तमोत्तमकं विद्यादनेककरणान्वितम् ।

---

* स्त्रियः प्रियेषु सज्जन्ते ह्यपि विप्रिय० इति समीचीनः पाठः ।

विचित्रैः श्लोकबन्धैश्च लीलाभावविभूषितम् ॥ १२८ ॥
कोपप्रसादजननमधिक्षेपजनाश्रयम्।
उक्तप्रत्युक्तमेवं स्याच् चित्रगीतार्थयोजितम् ॥ १२९ ॥
भाणामुक्तितिलास्यं विज्ञेयं लेकपाति ह्यर्थत्वात्।
प्रकरवदुन्नकाव्यं संस्तवयुक्तं द्विविधभावात् ॥ १३० ॥
एतेषां लास्यविधी लक्षणमुक्तं मया तु विस्तरतः।
तदिहैव तु यन्नोक्तं प्रसङ्गविनिवृत्तिहेतोस्तु ॥ १३१ ॥
इति दशरूपविधानं सर्वं प्रोक्तं मया हि लक्षणतः।
पुनरस्य शरीरगतं सन्धिविधी लक्षणं वक्ष्ये ॥ १३२ ॥

इति भारतीये नाट्यशास्त्रे दशरूपकलक्षणं नामाऽध्यायो ऽष्टादशः ॥ * ॥

अथैकोनविंशतितमोऽध्यायः।

इतिवृत्तं हि नाट्यस्य शरीरं परिकीर्तितम्।
पञ्चभिः सन्धिभिस्तस्य विभागः सम्प्रलक्षितः ॥ १ ॥
इतिवृत्तं द्विधा चैव बुधस्तु परिकल्पयेत्।
आधिकारिकमेकं स्यात् प्रासङ्गिकमथाऽपरम् ॥ २ ॥
यत्कार्यं हि फलप्राप्त्या सभर्यं परिकल्प्यते।
तदाधिकारिकं ज्ञेयमन्यत् प्रासङ्गिकं विदुः ॥ ३ ॥
कवेः प्रयत्नान् नेतॄणां युक्तानां विध्युपाश्रयात्।
कल्प्यते हि फलप्राप्तिः समुत्कर्षात् फलस्य तु ॥ ४ ॥

कारणात् फलयोगस्य वृत्तं स्यादाधिकारिकम् ।
तस्योपकरणार्थं तु कीर्त्यते ह्यानुषङ्गिकम् ॥ ५ ॥
संसाध्ये फलसाध्ये तु व्यापारः कारकस्य यः ।
तस्याऽऽनुपूर्व्याद् विज्ञेयाः पञ्चावस्थाः प्रयोक्तृभिः ॥ ६ ॥
प्रारम्भश्च प्रयत्नश्च तथा प्राप्तेश्च सम्भवः ।
नियता च फलप्राप्तिः फलयोगश्च पञ्चमः ॥ ७ ॥
औत्सुक्यं सन्धभात्रस्य यो बीजस्य निबध्यते ।
महतः फलयोगस्य स खल्वारम्भ इष्यते ॥ ८ ॥
अपश्यतः फलप्राप्तिं यो व्यापारः फलं प्रति ।
परं चौत्सुक्यगमनं प्रयत्नः सम्प्रकीर्तितः ॥ ९ ॥
ईषत् प्राप्तिर्यदौचित्यं फलस्य परिकल्प्यते ।
भावमात्रेण तां प्राहुर्विधिज्ञाः प्राप्तिसम्भवम् ॥ १० ॥
रूपक्रियाफलप्राप्तिर्यदा भावेन पश्यति ।
नियतां तां फलप्राप्तिं सगुणां परिचक्षते ॥ ११ ॥
अभिप्रेतं समग्रं च प्रतिरूपं क्रियाफलम् ।
इति योगे भवेद् यत्र फलयोगः प्रकीर्तितः ॥ १२ ॥
इतिवृत्तादिकार्यस्य प्रारब्धस्य फलार्थिभिः ।
यथाऽनुक्रमते तास्तु पञ्चावस्था भवन्ति हि ॥ १३ ॥
तासां स्वभावभिन्नानां परस्परसमागमात् ।
विन्यात् स एकभावेन फलहेतुः प्रकीर्तितः ॥ १४ ॥
यद् वृत्तं हि समारब्धं पुरस्तादाधिकारिकम् ।
तदारम्भादिकर्तव्यं कलान्तं च यदा भवेत् ॥ १५ ॥

पूर्णसन्धि तु तत् कार्यं हीनसन्ध्यपि वा पुनः।
नियमात् पञ्चसन्धिः स्याद्धीनसन्ध्यथ कारणात्॥ १६॥
चतुर्थस्यैकलोपेन द्विलोपे त्रिचतुर्थयोः।
द्वितीयत्रिचतुर्थानां त्रिलोपे लोप इष्यते॥ १७॥
प्रासङ्गिके परार्थत्वान् न ह्येष नियमो भवेत्।
यद् वृत्तं सम्भवेत् किञ्चित् तद् योज्यमविरोधतः॥ १८॥
इतिवृत्ते यथाऽवस्थात् पञ्चारम्भादिकाः स्मृताः।
अर्थप्रकृतयः पञ्च तदा बीजादिका अपि॥ १९॥
अर्थप्रकृतयः पञ्च ससन्धिषु प्रकीर्तिताः।
बीजं बिन्दुः पताका च प्रकरी कार्यमेव च॥ २०॥
स्वल्पमात्रं समुत्सृष्टं बहुधा यद् विसर्पति।
फलावसानं यच् चैवं बीजं तदिह कीर्तितम्॥ २१॥
प्रयोजनानां विच्छेदे यदविच्छेदकारणम्।
यावत् समाप्तिं कार्यस्य स बिन्दुरिति कीर्तितः॥ २२॥
यद् वृत्तं हि फलार्थं स्यात् प्रधानस्याऽपकारकम्।
प्रधानवच् च कल्प्येत सा पताकेति कीर्तिता॥ २३॥
फलं ब्रूहि फलार्थं स्यात् प्रधानस्याऽपकारकम्।
प्रधानवच् च कल्प्येत परार्थं केवलं बुधैः॥ २४॥
अनुबन्धविहीनानां यथावदिति निर्दिशेत्।
यदाधिकारिकं कार्यं पूर्वमेव प्रकीर्तितम्॥ २५॥
यदर्थो यः समारम्भस्तत् कार्यं परिकीर्तितम्।
एतेषां यस्य येनाऽर्थो यतश्च गुण इष्यते॥ २६॥

तत्प्रधानं तु कर्तव्यं गुणभूतान्यतः परम् ।
एकोऽनेकोऽपि वा सन्धिः पताकायां तु यो भवेत् ॥ २७ ॥
प्रधानार्थानुयायित्वादनुसन्धिः प्रकीर्त्यते ।
आगर्भादाविमर्शाद् वा पताका विनिवर्तते ॥ २८ ॥
कस्माद् यस्माद् निबन्धोऽस्याः परार्थः परिकीर्त्यते ।
यत्राऽन्यस्मिंश्चिन्त्यमाने तल्लीनोऽन्यः प्रयुज्यते ॥ २९ ॥
आगन्तुकेन भावेन पताकास्थानकं तु तत् ।
सहसैवाऽर्थसम्पत्तिर्गुणवत्युपकारतः ॥ ३० ॥
पताकास्थानमित्याद्यमलङ्कारार्थसंयुतम् ।
वचः सातिशयश्लिष्टं काव्यबन्धसमाश्रयम् ॥ ३१ ॥
पताकास्थानकमिदं द्वितीयं परिकल्पितम् ।
अर्थोपक्षेपणं यत्र लीनं सविनयं भवेत् ॥ ३२ ॥
श्लिष्टं प्रत्युत्तरोपेतं तृतीयमिदमिष्यते ।
द्व्यर्थो वचनविन्यासः संश्लिष्टः काव्ययोजितः ॥ ३३ ॥
उपपत्त्या युतं यत् तच् चतुर्थं समुदाहृतम् ।
चतुःपताकापरमं नाटके काव्यमिष्यते ॥ ३४ ॥
पञ्चभिः सन्धिभिर्युक्तं तत् प्रवक्ष्याम्यतः परम् ।
मुखं प्रतिमुखं चैव गर्भो विमर्श एव च ॥ ३५ ॥
तथा निर्वहणं चैव नाटके पञ्च सन्धयः ।
पञ्चभिः सन्धिभिर्युक्तं प्रधानमनुकीर्त्यते ॥ ३६ ॥
शेषाप्रधानसन्धीनामनुग्राह्यास्तु सन्धयः ।
यत्र बीजसमुत्पत्तिर्नानार्थरससम्भवा ॥ ३७ ॥

काव्ये शरीरानुगता तन्मुखं परिकीर्तितम्।
बीजस्योद्घाटनं यत्तु दृष्टं नष्टमिव क्वचित्॥ ३८॥
मुखन्यस्तस्य सर्वस्य तद् वै प्रतिमुखं स्मृतम्।
उद्भेदस्तस्य बीजस्य प्राप्तिरप्राप्तिरेव च॥ ३९॥
पुनश्चाऽन्वेषणं यत्र स गर्भ इति सञ्ज्ञितः।
गर्भान् निर्भिन्नबीजार्थो विकल्पनकृतोऽपि वा॥ ४०॥
क्रोधव्यसनजो वाऽपि स विमर्श इति स्मृतः।
समानयनमर्थानां व्याख्यानां तु सबीजिनाम्॥ ४१॥
नानाभावोत्तराणां च भवेन् निर्वहणं च तत्।
एते तु सन्धयो ज्ञेया नाटकस्य प्रयोक्तृभिः॥ ४२॥
तथा प्रकरणस्याऽपि शेषाणां च निबोधत।
डिमः समवकारश्च चतुःसन्धी प्रकीर्तितौ॥ ४३॥
न तयोर्विमर्शस्तु स्यान् न च वृत्तिस्तु कैशिकी।
व्यायोगेहामृगौ वाऽपि सदाकार्यौ त्रिसन्धिकौ॥ ४४॥
गर्भाविमर्शौ न स्यातां तयोर्वृत्तिश्च कैशिकी।
द्विसन्धि तु प्रहसनं वीथ्यङ्कौ भाण एव च॥ ४५॥
मुखनिर्वहणे तेषां कर्तव्ये कैशिकीं विना।
एवं तु सन्धयः कार्या दशरूपप्रयोक्तृभिः॥ ४६॥
पुनरेषां तु सन्धीनामङ्गकल्पान् निबोधत।
सन्धीनां यानि वृत्तानि प्रदेशमनुपूर्वशः॥ ४७॥
सम्पद्गुणप्रयुक्तानि तान्यङ्गान्यवबोधयेत्।
इष्टस्याऽर्थस्य रचना वृत्तान्तस्याऽनुपक्षयः॥ ४८॥

रागप्राप्तिः प्रयोगस्य गुह्यानां चैव गूहनम्।
आश्चर्यवदविख्यातं प्रकाश्यानां प्रकाशनम्॥ ४९ ॥
अङ्गहीनं तथा काव्यं न प्रयोगक्षमं भवेत्।
काव्यं यदपि हीनार्थं सम्यगङ्गैः समन्वितम्॥ ५० ॥
दीप्तत्वात् तु प्रयोगस्य शोभामेति न संशयः।
उदात्तमपि यत् काव्यं स्यादङ्गैः परिवर्जितम्॥ ५१ ॥
हीनत्वाद् विप्रयोगस्य नैव तद् रञ्जयेन् मनः।
तस्मात् सन्धिप्रदेशेषु यथायोगं यथारसम्॥ ५२ ॥
कविताङ्गानि कार्याणि प्रदेशांस्तु निबोधत।
सामभेदप्रदानं च दण्डस्य वध एव च॥ ५३ ॥
प्रत्युत्पन्नमतित्वं च गोत्रस्खलितमेव च।
साहसं च भयं चैव ह्रीर्माया क्रोध एव च॥ ५४ ॥
ओजः संवरणं भ्रान्तिस्तथा हेत्ववधारणम्।
दूतो लेखस्तथा स्वप्नश्चित्रं मन्द इति द्विधा*॥ ५५ ॥
सन्ध्यन्तराणि सन्धीनां प्रदेशास्त्वेकविंशतिः।
एते विशेषाः सन्धिजाः स्युः सन्धेर्यस्त्वर्थयोगतः॥ ५६ ॥
पाद्याङ्गान्यथ योगेन सन्ति तानि निबोधत।
इतिपाद्य उपक्षेपः परिन्यासो विलोभनम्॥ ५७ ॥
युक्तिः प्राप्तिः समाधानं विधानं परिभावना।
उद्भेदः करणं भेदो द्वादशाङ्गानि वै मुखे॥ ५८ ॥

---

* मद इति द्विजा इति श्लो० १०८ पठ्यते।

तथा प्रतिमुखे चैव वक्ष्याम्यङ्गानि नामतः ।
विलासः परिसर्पश्च विधूतं शमनं तथा ॥ ५९ ॥
नर्म नर्मद्युतिश्चैव तथा च प्रगणं पुनः ।
निरोधश्चैव विज्ञेयः पर्युपासनमेव च ॥ ६० ॥
पुष्पं वज्रमुपन्यासो वर्णसंहार एव च ।
एवमङ्गानि बीजस्य सम्प्रसिद्धिकराणि च ॥ ६१ ॥
एतानि वै प्रतिमुखे गर्भे चैव निबोधत ।
अभूताहरणं मार्गो रूपोदाहरणे क्रमः ॥ ६२ ॥
सङ्ग्रहश्चाऽनुमानं च प्रार्थना क्षिप्रमेव च ।
तोटकाधिबले चैव ह्युद्वेगो विद्रवस्तथा ॥ ६३ ॥
एतान्यङ्गानि वै गर्भेऽथ विमर्शे निबोधत ।
अपवादश्च सम्फेटो हि द्रवः शक्तिरेव च ॥ ६४ ॥
प्रसङ्गो व्यवसायश्च विरोधश्च प्रकीर्तितः ।
प्ररोचना विचलनमादानं छलनं तथा ॥ ६५ ॥
व्याहारश्चाऽपि द्युतिश्च विमर्शेऽङ्गान्यमूनि च ।
सन्धिर्विबोधो ग्रथनं निर्णयः परिभाषणम् ॥ ६६ ॥
कृतिः प्रसादानन्दौ च समयश्चोपगूहनम् ।
आभाषणं पूर्वभावः काव्यसंहार एव च ॥ ६७ ॥
प्रशस्तिरिति संहारे सन्ध्यङ्गानि चतुर्दश ।
सन्धौ निर्वहणाख्ये तु कर्तव्यानि प्रयोक्तृभिः ॥ ६८ ॥
एतेषां त्वर्थसम्बद्धं पुनर्वक्ष्यामि लक्षणम् ।
काव्यस्याऽर्थसमुत्पत्तिरुपक्षेप इति स्मृतः ॥ ६९ ॥

यदुत्पन्नार्थबाहुल्यं ज्ञेयः परिकरस्तु सः।
भविष्यद्वस्तुकथनं परिन्यासं प्रचक्षते॥ ७०॥
गुणनिर्वर्णनं तज्ज्ञैर्विलोभनमिति स्मृतम्।
सम्प्रधारणमर्थानां युक्तिरित्यभिधीयते॥ ७१॥
सुखार्थस्योपगमनं प्राप्तिरित्यभिधीयते।
बीजार्थस्योपगमनं तत् समाधानमुच्यते॥ ७२॥
सुखदुःखकृतो योऽर्थस्तद् विधानमिति स्मृतम्।
कुतूहलोत्तरावेगो विज्ञेया परिभावना॥ ७३॥
बीजार्थस्य प्ररोहो यः स उद्भेद इति स्मृतः।
प्रकृतार्थसमारम्भः करणं नाम तद् भवेत्॥ ७४॥
सङ्घार्थभेदनार्थो यः स भेद इति कीर्तितः।
सम्भोगो रतिसम्पन्नो विलास इति कीर्तितः॥ ७५॥
दृष्टनष्टानुसरणं परिसर्प इति स्मृतः।
कृतस्याऽननयस्याऽऽदौ विधूतं त्वपरिग्रहः॥ ७६॥
तस्योपशमनं यत् तु शमनं नाम तद् भवेत्।
क्रीडाविलोभनार्थं तु हास्यं नर्म इति स्मृतम्॥ ७७॥
उत्तरोत्तरवाक्यं तु भवेत् प्रगमनं पुनः।
या तु व्यसनसम्प्राप्तिर्निरोधः स च कीर्तितः॥ ७८॥
क्रुद्धस्याऽनुनयो यस्तु भवेत् तत्पर्युपासनम्।
विशेषवचनं यत् तु तत् पुष्पमिति सञ्ज्ञितम्॥ ७९॥
विरुद्धवचनप्रायं वज्रमित्यभिधीयते।
उपपत्तिकृतो योऽर्थ उपन्यासस्तु स स्मृतः॥ ८०॥

चातुर्वर्ण्याभिगमनं वर्णसंहार इष्यते।
एतत्प्रतिमुखेऽङ्गानि अथ गर्भस्तु लक्षणम्॥ ८१॥
कपटाश्रयं यद् वाक्यमभूताहरणं विदुः।
तत्त्वार्थवचनं चैव मार्ग इत्यभिधीयते॥ ८२॥
चित्रार्थसमवायो यः तद् रूपमिति कीर्तितम्।
यत् तु सातिशयं वाक्यं तदुदाहरणं स्मृतम्॥ ८३॥
तत्त्वोपलब्धिर्वाक्यस्य क्रम इत्यभिधीयते।
सामदानार्थसंयुक्तः सङ्ग्रहः परिकीर्तितः॥ ८४॥
रूपानुरूपगमनमनुमानमिति स्मृतम्।
कार्यानुनयपूर्वस्तु नियोगः प्रार्थना भवेत्॥ ८५॥
गर्भस्योद्भेदनं यत् तु तदुपक्षिप्तमुच्यते।
संरम्भवचनप्रायं तोटकं त्विह संज्ञितम्॥ ८६॥
कपटेनाऽभिसन्धानं ज्ञेयं चाऽधिबलं बुधैः।
भयं नृपारिदस्यूत्थमुद्वेगः परिकीर्तितः॥ ८७॥
शङ्काभयत्रासकृतो द्रवं एव हि विद्रवः।
गर्भाङ्गलक्षणं प्रोक्तं विमर्शेऽथ निबोधत॥ ८८॥
दोषप्रख्यापनं यत् स्यादपवादस्तु स स्मृतः।
रोषग्रथितवाक्यं तु सम्फेटः परिकीर्तितः॥ ८९॥
गुरुव्यतिक्रमो यस्तु विज्ञेयो हि द्रवस्तु सः।
विरोधप्रशमो यस्तु सा शक्तिः परिकीर्तिता॥ ९०॥
प्रसङ्गश्चैव विज्ञेयो वाक्यैराधर्षयोजितैः।
व्यवसायस्तु कर्तव्यः प्रतिज्ञाहेतुसंश्रयः॥ ९१॥

उत्तरोत्तरवाक्यं तु विरोध इति सञ्ज्ञितः ।
प्ररोचना च विज्ञेया संहारार्थप्रदर्शिनी ॥ ९२ ॥
अनुमानार्थसंयुक्तं विन्द्याद् विचलनं तथा ।
बीजकार्योपगमनमादानमिति कीर्तितम् ॥ ९३ ॥
अवमानादिजनितसम्मोहच्छलनं भवेत् ।
प्रत्यक्षकथनं यत् तु स व्याहार इति स्मृतः ॥ ९४ ॥
साधिक्षेपं वचो यत्र तद् द्युतिरिति सञ्ज्ञितम् ।
लक्षणं विमर्शाङ्गानां संहारे तु निबोधत ॥ ९५ ॥
मुखबीजोपगमनं सन्धिरित्यभिधीयते ।
कार्यस्याऽन्वेषणं यत् तु विबोध इति स स्मृतः ॥ ९६ ॥
उपक्षेपस्तु कार्याणां ग्रथनं नाम तद् भवेत् ।
अनुभूतार्थकथनं निर्णयः समुदाहृतः ॥ ९७ ॥
परिवादकृतं यत् स्यात् तदाहुः परिभाषणम् ।
लब्धस्याऽर्थस्य शमनं कृतिरित्यभिधीयते ॥ ९८ ॥
शुश्रूषाद्युपसम्पन्ना प्रसादः प्रीतिरुच्यते ।
समागमस्तु योऽर्थानाम् आनन्दः स तु कीर्तितः ॥ ९९ ॥
दुःखापनयनं चैव समयः स निगद्यते ।
अन्वग्भूतस्य सम्प्राप्तिर्भवेत् तदुपगूहनम् ॥ १०० ॥
दानमानविनिष्पन्नमाभाषणमुदाहृतम् ।
पूर्वभावस्तु विज्ञेयः सद्भिः कार्योपदेशकः ॥ १०१ ॥
वरप्रसादसम्प्राप्तिः काव्यसंहार इष्यते ।
देवद्विजनृपादीनां प्रशस्तिः स्यात् प्रसाधनम् ॥ १०२ ॥

यथा सन्धिस्तु कर्तव्यान्येतान्यङ्गानि रूपके।
कविभिः काव्यकुशलैरसभावमपेक्ष्य तु॥ १०३॥
सम्मिश्राणि कदाचित् तु द्वित्रियोगेन वा पुनः।
कार्यं कालमवस्थां च ज्ञात्वा कार्याणि सन्धिषु॥ १०४॥
एतेषामेव चाऽङ्गानां सम्बद्धान्यर्थयोगतः।
सन्ध्यन्तराणि वक्ष्यामि त्वर्थोपक्षेपकाणि च॥ १०५॥
सामभेदप्रदानं च दण्डश्च वध एव च।
प्रत्युत्पन्नमतित्वं च गोत्रस्खलितमेव च॥ १०६॥
साहसं च भयं चैव ह्रीर्माया क्रोध एव च।
*ओजः संवरणं भ्रान्तिस्तथा हेत्ववधारणम्॥ १०७॥
दूतो लेखस्तथा स्वप्नश्चित्रं मद इति द्विजाः।
सन्ध्यन्तराणि सन्धीनां विशेषास्त्वेकविंशतिः॥ १०८॥
विष्कम्भचूलिका चैव तथा चैव प्रवेशकः।
अङ्कावताराङ्कमुखमर्थोपक्षेपपञ्चकम्॥ १०९॥
मध्यमपुरुषनियोज्यो नाटकमुखसन्धिमात्रसञ्चार.।
विष्कम्भकस्तु संस्कृतपुरोहितामात्यकञ्चुकिभिः॥ ११०॥
शुद्धः सङ्कीर्णो वा द्विविधो विष्कम्भकस्तु विज्ञेयः।
मध्यमपात्रैः शुद्धः सङ्कीर्णो नीचमध्यकृतः॥ १११॥
अन्तर्जवनिकासंस्थैः शूद्रन्यादिभिरनेकधा।
अर्थोपक्षेपणं यत्तु क्रियते सा हि चूलिका॥ ११२॥

---

* रूज इत्यादर्शे स्थितं।

अङ्कान्तरानुसारी सङ्क्षेपार्थमधिकृत्य बिन्दूनाम्।
प्रकरणनाटकविषये प्रवेशको नाम विज्ञेयः ॥ ११३ ॥
नोत्तममध्यमपुरुषैराचरितो नाऽप्युदात्तवचनकृतः।
प्राकृतभाषाचारः प्रवेशको नाम विज्ञेयः ॥ ११४ ॥
अङ्कान्तरेऽथवाऽङ्के निपतति यस्मिन् प्रयोगमासाद्य।
बीजार्थयुक्तियुक्तो ज्ञेयो ह्यङ्कावतारोऽसौ ॥ ११५ ॥
विश्लिष्टमुखमङ्कस्य स्त्रिया वा पुरुषेण वा।
यदुपक्षिप्यते पूर्वं तदङ्कमुखमुच्यते ॥ ११६ ॥
वृत्तिवृत्त्यङ्गसम्पन्नपदार्थप्रकृतिचयम्।
पञ्चावस्थाभिनिष्पन्नैः पञ्चभिः सन्धिभिर्युतम् ॥ ११७ ॥
सन्ध्यन्तरैकविंशत्या चतुःषष्ठ्यङ्गसंयुतम्।
षट्त्रिंशल्लक्षणोपेतं गुणालङ्कारभूषितम् ॥ ११८ ॥
महारसं महाभोगमुदात्तवचनान्वितम्।
महापुरुषसञ्चारं साध्वाचारं जनप्रियम् ॥ ११९ ॥
सुश्लिष्टसन्धिसंयोगं सुप्रयोगं सुखाश्रयम्।
मृदुशब्दाभिधानं च कविः कुर्यात् तु नाटकम् ॥ १२० ॥
अवस्था या हि लोकस्य सुखदुःखसमुद्भवा।
नानापुरुषसञ्चारा नाटके सा भवेदिह ॥ १२१॥
न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
न तत् कर्म समायोगो नाटके यन्न दृश्यते ॥ १२२ ॥
योऽयं स्वभावो लोकस्य नानावस्थान्तरात्मकः।
साङ्गाभिनयसंयुक्तो नाटके संविधीयते ॥ १२३ ॥

देवतानामृषीणां च राज्ञां लोकस्य चैव हि ।
पूर्ववृत्तानुचरितं नाटकं नाम तद् भवेत् ॥ १२४ ॥
यस्मात् स्वभावं संत्यज्य साङ्गोपाङ्गमतिक्रमैः ।
प्रयुज्यते ज्ञायते च यस्मात् तन् नाटकं स्मृतम् ॥ १२५ ॥
सर्वभावैः सर्वरसैः सर्वकर्मप्रवृत्तिभिः ।
नानावस्थान्तरोपेतं नाटकं संविधीयते ॥ १२६ ॥
यान्येकशिल्पजातानि एकरूपकृतानि च ।
तानि शेषाणि रूपाणि प्रयोज्यानि प्रयोक्तृभिः ॥ १२७ ॥
लोकस्य भावं सम्प्रेक्ष्य नराणां च बलाबलम् ।
सम्भोगं चैव युक्तिं च ततः कार्यं तु नाटकम् ॥ १२८ ॥
लोके प्रणश्यति प्रायो भवन्त्यविबुधा नराः ।
ये चाऽपि हि भविष्यन्ति येऽप्यल्पश्रुतबुद्धयः ॥ १२९ ॥
बुद्धयः कर्मशिल्पानि वैचक्षण्यं बलानि च ।
सर्वाण्येतानि यदा लोकः विना नाट्यं प्रणश्यति ॥ १३० ॥
तदेवं लोकभावानां प्रसमीक्ष्य यथा क्रमम् ।
मृदुशब्दं यथार्थं च तज्ज्ञैः कार्यं तु लक्षणम् ॥ १३१ ॥
चेक्रीडिताद्यैः शब्दैस्तु काव्यबन्धा भवन्ति ये ।
वेश्या इव न भान्ति व कमण्डलुधरैर्द्विजैः ॥ १३२ ॥
दशरूपविधानं हि मया प्रोक्तं द्विजोत्तमाः ।
अतः परं प्रवक्ष्यामि वृत्तीनामिह लक्षणम् ॥ १३३ ॥
इति भारतीये नाट्यशास्त्रे अङ्गविकल्पो नाम एकोनविंशति-
तमोऽध्यायः ॥ ० ॥

अथ विंशतितमोऽध्यायः।

समुत्थानं तु वृत्तीनां व्याख्यास्याम्यनुपूर्वशः।
तथा वस्तूद्भवं चैव काव्यानां च विकल्पनम्॥ १॥
एकार्णवं जगत् कृत्वा भगवानच्युतो यदा।
शेते स्म नागपर्यङ्के लोकान् संक्षिप्य मायया॥ २॥
अथ वीर्यबलोन्मत्तावसुरौ मधुकैटभौ।
तर्जयामासतुर्देवं तरसा युद्धकाङ्क्षिणौ॥ ३॥
निजबाहुविसृष्टौ तौ भूतभावनमव्ययम्।
जानुभिर्मुष्टिभिश्चैव योधयामासतुः प्रभुम्॥ ४॥
बहुभिः परुषैर्वाक्यैरन्योन्यस्पर्धयान्वितौ।
नानाविक्षेपवचनैः कम्पयन्ताविवोदधिम्॥ ५॥
तयोरनेकरूपाणि वचांसि वदतोस्तदा।
श्रुत्वा आकम्पितमना द्रुहिणो वाक्यमब्रवीत्॥ ६॥
किमियं भारती वृत्तिर्वाग्भिरेव प्रवर्तिता।
उत्तरोत्तरसम्बन्धान् नन्विमौ निधनं नय॥ ७॥
पितामहवचः श्रुत्वा प्रोवाच मधुसूदनः।
कार्यहेतोर्मया ब्रह्मन् भारतीयं विनिर्मिता॥ ८॥
वदतां वर भूयिष्ठा भारतीयं भविष्यति।
अहमेतौ निहन्म्यद्य इत्युक्त्वा वचनं हरिः॥ ९॥
शुद्धैरविकृतैरङ्गैः साङ्गहारैस्तदा भृशम्।
योधयामास तौ दिव्यौ बाहुयुद्धविशारदौ॥ १०॥

भूमिसंस्थानसंयोगैः पदन्यासैर्हरेस्तदा ।
अतिभारोऽभवद् भूमेर्भारती तेन निर्मिता ॥ ११ ॥
वल्गितैः शार्ङ्गधनुषा तीव्रदीप्ततरैरथ ।
सत्वाधिकैरसम्भ्रान्तैः सात्त्वती च विनिर्मिता ॥ १२ ॥
विविधैरङ्गहारैश्च देवो लीलासमुद्भवैः ।
बबन्ध यच्छिखापाशं कैशिकी तत्र निर्मिता ॥ १३ ॥
संरम्भावेगबहुलैर्नानाचारीसमन्वितैः ।
नियुद्धकरणैरङ्गैरुत्पन्नाऽऽरभटी ततः ॥ १४ ॥
यां यां देवः समाचष्टे क्रियां वृत्तिसमुद्भवाम् ।
तास्तदर्थानुगैर्जल्पैर्द्रुहिणः प्रत्यपूजयत् ॥ १५ ॥
यदा हतौ तावसुरौ हरिणा मधुकैटभौ ।
ततोऽब्रवीत् पद्मयोनिर्नारायणमरिन्दमम् ॥ १६ ॥
अहो विचित्रैर्ललितैः स्फुटैः सुविशदैरपि ।
अङ्गहारैः कृतं देव त्वया दानवनाशनम् ॥ १७ ॥
तस्मादयं सर्वलोके नियुद्धः समयः शुभः ।
सर्वशस्त्रविमोक्षेषु न्यायसञ्ज्ञो भविष्यति ॥ १८ ॥
न्यायसमुत्थितैश्चित्रैरङ्गहारैर्विभूषितम् ।
यस्माद् युद्धं कृतं ह्येतत् तस्मान् न्यायाः प्रकीर्तिताः ॥ १९ ॥
ततो वेदेषु निक्षिप्ता द्रुहिणेन महात्मना ।
पुनरिष्टसुजातेन नानाचारीसमाकुले ॥ २० ॥
पुनर्नाट्यप्रयोगेन नानाभावसमन्विताः ।
वृत्तिसञ्ज्ञा कृता ह्येताः काव्यबन्धसमाश्रिताः ॥ २१ ॥

वल्गितैस्तस्य देवस्य यद्यं यथादृशं कृतम् ।
ऋषिभिस्तादृशी वृत्तिः कृता चाऽप्यङ्गसम्भवा ॥ २२ ॥
नाट्यवेदसमुत्पन्ना वाचा याऽभिनयान्विताः ।
मया काव्यकृतं हेतोः प्रक्षिप्ता द्रुहिणाज्ञया ॥ २३ ॥
ऋग्वेदे भारती क्षिप्ता यजुर्वेदे च सात्त्वती ।
कैशिकी सामवेदे च शेषा चाऽथर्वणी तथा ॥ २४ ॥
या वाक्प्रधाना नृवरप्रयोज्या
स्त्रीवर्जिता संस्कृतपाठ्ययुक्ता ।
स्वनामधेयैर्भवनैः प्रयुक्ता
तां भारतीं वृत्तिमुदाहरन्ति ॥ २५ ॥
भेदास्तस्यास्तु विज्ञेयाश्चत्वारो ङ्गमागता ।
प्ररोचना मुखं चैव वीथी प्रहसनस्तथा ॥ २६ ॥
प्रजाभ्युदयिनी चैव मङ्गल्या विजयावहा ।
सर्वपापप्रशमनी पूर्वरङ्गप्ररोचिनी ॥ २७ ॥
नटी विदूषको वाऽपि पारिपार्श्विक एव वा ।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते ॥ २८ ॥
चित्रैर्वाक्यैः सकार्योत्थैर्वीथ्यङ्गैरन्यथापि वा ।
उद्घात्यकं कथोद्घातः प्रयोगातिशयस्तथा ॥ २९ ॥
प्रवृत्तकावलगिते आमुखाङ्गानि पञ्च वै ।
उद्घात्यकावलगिते वीथ्यङ्गे तु मयोदिते ॥ ३० ॥
शेषाणां लक्षणमहं व्याख्यास्याम्यनुपूर्वशः ।
सूत्रधारस्य वाक्यं वा यत्र वाक्यार्थमेव च ॥ ३१ ॥

गृहीत्वा प्रविशेत् पात्रं कथोद्घातः प्रकीर्तितः ।
प्रयोगेऽत्र प्रयोगं तु सूत्रभृद् यत्र योजयेत् ॥ ३२ ॥
ततश्च प्रविशेत् पात्रं प्रयोगातिशयो हि सः ।
कालं प्रवृत्तमाश्रित्य सूत्रभृद् यत्र वर्णयेत् ॥ ३३ ॥
तदाश्रयस्य पात्रस्य प्रवेशस्तत् प्रवृत्तकम् ।
एषामन्यतमं श्लिष्टं योजयित्वाऽर्थयुक्तिभिः ॥ ३४ ॥
पात्रग्रन्थैरसम्बाधं प्रकुर्यादामुखं ततः ।
एवमेतद् बुधैर्ज्ञेयमामुखं विविधाश्रयम् ।
लक्षणं पूर्वमुक्तं तु वीथ्याः प्रहसनस्य च ॥ ३५ ॥
इत्यष्टार्थविकल्पा वृत्तिरियं भारती मया प्रोक्ता ।
सात्त्वत्यास्तु विधानं लक्षणयुक्त्या प्रवक्ष्यामि ॥ ३६ ॥
या सात्त्वतेनेह गुणेन युक्ता
न्यायेन वृत्तेन समन्विता च ।
हर्षोत्कटा संहृतशोकभावा
सा सात्त्वती नाम भवेत् तु वृत्तिः ॥ ३७ ॥
वागङ्गाभिनयवती सत्त्वोत्थानवचनप्रकरणेषु ।
सत्त्वाधिकारयुक्ता विज्ञेया सात्त्वती वृत्तिः ॥ ३८ ॥
वीराद्भुतरौद्ररसा विज्ञेया स्वल्पकरुणशृङ्गारा ।
उद्धतपुरुषप्राया परस्पराधर्षणा चैव ॥ ३९ ॥
उत्थापक उपरिवर्त्तकश्च संलापकश्च सङ्घात्यः ।
चत्वारश्चैव भेदा विज्ञेया नाट्यतत्त्वज्ञैः ॥ ४० ॥
अहमुत्थास्याऽम्येवं त्वं तावद् दर्शयात्मनः शक्तिम् ।

इति संहर्षसमाश्रयमुत्थितमुत्थापको ज्ञेयः ॥ ४१ ॥
उत्थानसमारोपानयानुत्सृज्य योऽर्थयोगवशात् ।
अन्यानर्थान् भजते स चाऽपि परिवर्तको ज्ञेयः ॥ ४२ ॥
सामबीजानिरामर्षोऽपि लापो सल्लापको नाम ।
मन्त्रार्थकार्यशक्त्या दैववशादात्मदोषयोगाद् वा ॥ ४३ ॥
सङ्घातभेदजननं तज्ज्ञैः सङ्घातको ज्ञेयः ।
इत्यष्टार्धविकल्पा वृत्तिरियं सात्त्वती मया प्रोक्ता ॥ ४४ ॥
कैशिक्यास्त्वथ लक्षणमतः परं सम्प्रवक्ष्यामि ।
या श्लक्ष्णनेपथ्यविशेषचित्रा
स्त्रीपुंसयुक्ता बहुनृत्यगीता ।
कामोपभोगप्रभवोपचारा
तां कैशिकीं वृत्तिमुदाहरन्ति ॥ ४५ ॥
नर्म सनर्मस्फञ्जो नर्मस्फोटोऽथ नर्मगर्भश्च ।
कैशिक्याश्चत्वारो भेदा ह्येते समाख्याताः ॥ ४६ ॥
आस्थापितशृङ्गारं विशुद्धकरणं निवृत्तवीररसम् ।
हास्यप्रवचनबहुलं नर्म त्रिविधं विजानीयात् ॥ ४७ ॥
ईर्ष्याक्रोधबहुप्रायं सोपालम्भवचनानुविद्धं च ।
आक्षेपोपक्षेपकृतं सविप्रलम्भं स्मृतं नर्म ॥ ४८ ॥
नवसङ्गमसम्भोगो रतिसमुदायवेषवाक्यसंयुक्तः ।
ज्ञेयो नर्मस्फञ्जो ह्यवसानभयानकश्चैव ॥ ४९ ॥
विविधानां भावानां लवैर्लवैर्भूषितो बहुविशेषैः ।
असमग्राक्षिप्तरसो नर्मस्फोटोऽथ विज्ञेयः ॥ ५० ॥

विज्ञानगुणसम्भावादिभिर्नायको गुणैर्यत्र।
प्रच्छन्नैर्व्यवहरते कार्यवशान् नर्मगर्भोऽसौ॥ ५१॥
इत्यष्टार्धविकल्पा वृत्तिरियं कैशिकी मया प्रोक्ता।
अत ऊर्ध्वमुद्धतरसामारभटीं सम्प्रवक्ष्यामि॥ ५२॥
आरभटप्रायगुणा तथैव बहुकपटवञ्चनोपेता।
दम्भानृतवचनवती त्वारभटी नाम विज्ञेया॥ ५३॥
प्रस्तावपातप्लुतलङ्घितानि
छेद्यानि मायाकृतमिन्द्रजालम्।
चित्राणि युद्धानि च यत्र नित्यं
तां तादृशीमारभटीं वदन्ति॥ ५४॥
सङ्क्षिप्तकावपातौ च वस्तूत्थापनमथाऽपि सम्फेटः।
एते ह्यस्या भेदा लक्षणमेषां तु सम्प्रवक्ष्यामि॥ ५५॥
अन्वर्थशिल्पयुक्तो बहुपुस्तोत्थापनचित्रनेपथ्यः।
सङ्क्षिप्तवस्तुविषयो ज्ञेयः सङ्क्षिप्तको नाम॥ ५६॥
भयहर्षसमुत्थानं विद्रवविनिपातसंभ्रमाचरणम्।
क्षिप्रप्रवेशनिर्गममवपातमिमं विजानीयात्॥ ५७॥
सर्वरससमासकृतं सविद्रमविद्रवाश्रयं चाऽपि।
पश्चाद् विभाषते यत् तद् वस्तूत्थापनं नाम॥ ५८॥
संरम्भसम्प्रयुक्तो बहुयुद्धनियुद्धकपटनिर्भेदः।
शस्त्रप्रहारबहुलः सम्फेटो नाम विज्ञेयः॥ ५९॥
एवमेता बुधैर्ज्ञेया वृत्तयो नाट्यमातरः।
रसप्रयोगमासां च कीर्त्यमानं निबोधत॥ ६०॥

हास्यशृङ्गारकरुणैः वृत्तिः स्यात् कैशिकी रसैः ।
सात्त्वती चाऽपि विज्ञेया वीररौद्राद्भुताश्रया ॥ ६१ ॥
भयानके सबीभत्से रौद्रे चाऽऽरभटी भवेत् ।
भारती चाऽपि विज्ञेया वीररौद्राद्भुताश्रया ॥ ६२ ॥
वृत्त्यन्त एषोऽभिनयो मयोक्तो वागङ्गसत्त्वप्रभवो यथावत् ।
आहार्यमेवाऽभिनयप्रयोगं वक्ष्यामि नेपथ्यकृतं च भूयः ॥ ६३ ॥
इति भारतीये नाट्यशास्त्रे वागभिनये वृत्तिविकल्पो नाम
विंशतितमोऽध्यायः ।

अथ चतुस्त्रिंशत्तमोऽध्यायः ।

अत ऊर्ध्वं प्रवक्ष्यामि प्रकृतीनां च लक्षणम् ।
नायकानां च सर्वेषां चतुर्णामपि तत्त्वतः ॥ १ ॥
समासतस्तु त्रिविधा प्रकृतिः परिकीर्तिता ।
स्त्रीणां च पुरुषाणां च उत्तमा मध्यमाधमाः ॥ २ ।
नाट्ये चत्वार एवैते नायकाः परिकीर्तिताः ।
मध्योत्तमायां प्रकृतौ नानालक्षणलक्षिताः ॥ ३ ॥
धीरोद्धतो धीरललितो धीरोदात्तस्तथैव च ।
धीरप्रशान्तश्चैवेति नायका नाटकाश्रिताः ॥ ४ ॥
देवा धीरोद्धता ज्ञेयाः स्युर्धीरललिता नृपाः ।
सेनापतिरमात्याश्च धीरोदात्ताः प्रकीर्तिताः ॥ ५ ॥

ब्राह्मणा वणिजश्चैव प्रोक्ता धीरप्रशान्तकाः।
एते तु नायका ज्ञेयाः काव्यबन्धेषु सर्वदा ॥ ६ ॥
नायिकाश्चैव वक्ष्यामि चतस्रः पुनरेव हि।
दिव्या च नृपपत्नी च कुलस्त्री गणिका तथा ॥ ७ ॥
एतास्तु नायिका ज्ञेया नानाप्रकृतिलक्षणाः।
धीराश्च ललिताश्चैव उदात्ता निभृतास्तथा ॥ ८ ॥
दिव्या राजाङ्गना ह्येता गुणैर्युक्ता भवन्ति हि।
उदात्ता निभृता चैव भवेत् तु कुलजाङ्गना ॥ ९ ॥
गणिका शिल्पकारी च उदात्तललिते स्मृते।
प्रेष्या चैव हि विज्ञेया सङ्कीर्णा प्रकृतावपि ॥ १० ॥
नपुंसकश्च विज्ञेयः सङ्कीर्णोऽधम एव च।
शकारश्चैव चेटश्च ये चाऽन्येऽप्यधमा नराः ॥ ११ ॥
सङ्कीर्णास्ते च विज्ञेया नाटके हि द्विजोत्तमाः।
एते ज्ञेयाः प्रकृत्या तु पुरुषस्त्रीनपुंसकाः ॥ १२ ॥
एतेषां चैव वक्ष्यामि विभागं शीललक्षणैः।
सर्वासां प्रकृतीनां तु प्रकारो द्विविधः स्मृतः ॥ १३ ॥
तत्र राजोपचारो यो भवेदाभ्यन्तरस्तु सः।
तस्माद् राजोपचारेषु पुनरभ्यन्तराश्रयम् ॥ १४ ॥
स्त्रीविभागं प्रवक्ष्यामि उपचारं तथैव च।
महादेवी तथा देवी स्वामिनी स्थायिनी तथा ॥ १५ ॥
भोगिनी शिल्पकारी च नाटकीयाऽथ नर्तकी।
अनुचारी तथाऽऽयुक्ता तथा च परिचारिका ॥ १६ ॥

तथा सञ्चारिणी चैव तथा प्रेक्षणकारिका ।
महत्तरा प्रतीहारी कुमारी स्थविरा तथा ॥ १७ ॥
आयुक्तिकास्तु भूपानामेष आभ्यन्तरो गणः ।
तत्र मूर्द्धाभिषिक्ता च कुलशीलविभूषिता ॥ १८ ॥
समतुल्यवयस्था च मध्यस्था क्रोधवर्जिता ।
अभीष्टा नृपशीलज्ञा समदुःखसुखास्पदा ॥ १९ ॥
शान्तिस्वस्त्ययनैर्नित्यं भर्त्तृमङ्गलकाङ्क्षिणी ।
पतिव्रता क्षमायुक्ता अन्तःपुरहिते रता ॥ २० ॥
एभिर्गुणैश्च संयुक्ता महादेवी प्रकीर्तिता ।
एभिरेव गुणैर्युक्ता बहुमानविवर्जिता ॥ २१ ॥
गर्विता राजपुत्री स्याद् रतिसम्भोगतत्परा ।
बाला नित्योज्ज्वलगुणा प्रतिपक्षेर्ष्यसूयिनी ॥ २२ ॥
यौवनादिगुणोन्मत्ता सा देवीत्यभिधीयते ।
रूपिणी पद्मिनीजातिः सावधाना नृपाङ्गना ॥ २३ ॥
सेनापतिरमात्यानी दण्डिनी तत्पराश्रये ।
नतया नामतस्चैव स्वामिनीत्यभिसञ्ज्ञिता ॥ २४ ॥
शीलरूपगुणैर्या तु संयुक्ता नृपवल्लभा ।
स्वामिसत्कारसम्पन्ना स्वामिनीत्यभिसञ्ज्ञिता ॥ २५ ॥
रूपयौवनसम्पन्ना कर्कशा ललिता तथा ।
रतिसम्भोगकुशला *प्रतिपक्षेर्ष्यसूयिनाम् ॥ २६ ॥

---

* प्रतिपक्षेर्ष्यसूयिनीति समुचितः पाठः ।

दक्षाऽस्फुटा सुदान्ता च गन्धमाल्योज्ज्वला तथा।
नृपतिच्छन्दवृत्ता च सर्वदेर्ष्याविवर्जिता ॥ २७ ॥
उपस्थिता प्रमत्ता च त्यक्तालस्या सुनिष्ठुरा।
मान्यामान्यविशेषज्ञा स्थायिनी कथिता तथा ॥ २८ ॥
सुशीला लघुसम्माना मृदुर्नाऽत्युद्धता तथा।
मध्यस्था निभृता चान्ता भोगिनीति हि सा स्मृता ॥ २९ ॥
नानाकलाविशेषज्ञा नानाशिल्पविचक्षणा।
गन्धशिल्पविभागज्ञा लेख्यालेख्यविशारदा ॥ ३० ॥
शयनाशनयानज्ञा चतुरा मधुरा तथा।
दक्षा चित्रा स्फुटाऽतीक्ष्णा निभृता शिल्पकारिका ॥ ३१ ॥
ग्रहमोक्षलयज्ञा च रसभावविभाविका।
परभावेङ्गितज्ञा च आचार्यानुगता तथा ॥ ३२ ॥
चतुराऽभिनयज्ञा च ऊहापोहविशारदा।
निपुणा भाण्डवाद्येषु नाटकीया प्रकीर्तिता ॥ ३३ ॥
नानावाद्यप्रयोगज्ञा नृत्यगीतविचक्षणा।
सदा प्रगल्भा च तथा त्यक्तालस्या जितश्रमा ॥ ३४ ॥
समानता च नारीषु रूपयौवनकान्तिषु।
न दृश्यते गुणैर्युक्ता नर्तकी सा प्रकीर्त्तिता ॥ ३५ ॥
सर्वावस्थाप्रचारेषु अनुगच्छति या नृपम्।
विज्ञेया नामतः सा तु नृपतेरनुचारिका ॥ ३६ ॥
भाण्डागारे नियुक्ता च आयुधागार एव च।
ओषधीफलमूलेषु वाजेषु स्वावृता तथा ॥ ३७ ॥

गन्धाभरणवस्त्रेषु आख्यानकथनेषु च ।
तदर्थेषु नियुक्ता या आयुक्ता इति सा स्मृता ॥ ३८ ॥
छत्रशय्यासने युक्ता तथा व्यञ्जनकर्मणि ।
संवाहने च गन्धे च तथा चैव प्रसाधने ॥ ३९ ॥
तथाऽऽभरणसंयोगे माल्यसङ्ग्रहणे तथा ।
विज्ञेया नामतः सा तु नृपतेः परिचारिका ॥ ४० ॥
नानाकक्षाविचारिण्यस्तथोपवनसञ्चराः ।
देवतायतनक्रीडाप्रासादपरिसञ्चराः ॥ ४१ ॥
यत्नेषु च नियुक्ता यास्तथा च विविधाश्रये ।
सञ्चारिकास्तु विज्ञेया नाट्यज्ञैरुपचारतः ॥ ४२ ॥
प्रेक्षणैः कामसंयुक्तैर्गुह्यागुह्यसमुत्थितैः ।
याऽतियुक्ता बुधैः सा तु ज्ञेया प्रेक्षणकारिका ॥ ४३ ॥
सर्वान्तःपुररक्षायामाशीःस्वस्त्ययनादिभिः ।
या नित्यमभिनन्दन्ति ज्ञेयास्तास्तु महत्तराः ॥ ४४ ॥
सन्धिविग्रहसम्बन्धं नानाकार्यसमुत्थितम् ।
निवेदयन्ति याः कार्यं प्रतिहार्यस्तु ताः स्मृताः ॥ ४५ ॥
अप्राप्तरतिसम्भोगा असम्भ्रान्ता अनुद्धटाः ।
निभृता याः सलज्जाश्च ताः कुमार्य इति स्मृताः ॥ ४६ ॥
पूर्वराजभयाभिज्ञाः सर्वराजसु पूजिताः ।
पूर्वराजोपचारज्ञा वृद्धास्ता इति कीर्तिताः ॥ ४७ ॥
समासाल्लक्षणं तासां प्रवक्ष्यामि द्विजोत्तमाः ।
या नियोज्या नियोगेषु प्रयोगेषु तथैव हि ॥ ४८ ॥

अनुद्धटा ह्यसम्भ्रान्ताः स्ववेषाचारनिष्ठुराः।
शान्ता दान्ताः सुशीलाश्च जितक्रोधा जितेन्द्रियाः ॥ ४९ ॥
आकाशा निभृताश्चैव स्त्रीदोषैश्च विवर्जिताः।
ता नियोगे नियोक्तव्या वनिता मदवर्जिताः ॥ ५० ॥
यत् स्यान् नपुंसकं नाम तृतीया प्रकृतिस्तु सा।
सा ह्यन्तःपुरसञ्चारे योज्या पार्थिववेश्मनि ॥ ५१ ॥
स्नातकाः कञ्चुका ये च तथा वर्षधराश्च ये।
ये स्थायिकाश्च निर्मुण्डाः कचास्थानेषु योजयेत् ॥ ५२ ॥
अपुमांसस्तु पुरुषा ये च स्त्रीभोगवर्जिताः।
एते त्वन्तःपुरचराः कार्या नित्यं हि नाटके ॥ ५३ ॥
वस्त्वन्ते स्नातकं कुर्यादार्यमाचारसंयुतम्।
प्रेरणे चार्थसंयुक्ते कञ्चुकीयान् नियोजयेत् ॥ ५४ ॥
तथा वर्षधरांश्चैव कामचारेषु योजयेत्।
उपस्थायिकनिर्मुण्डाः स्त्रीणां प्रेषणकारणे ॥ ५५ ॥
मानकार्येषु नारीणां नियुञ्जीतानुचारिकाः।
सर्ववृत्तान्तयोगज्ञं नाट्यागारे नियोजयेत् ॥ ५६ ॥
ये त्वल्पसत्त्वाः कुशलाः क्लीबाश्च स्त्रीस्वभाविनः।
जात्या न दुष्टाः कार्ये तु ते वै वर्षधराः स्मृताः ॥ ५७ ॥
नपुंसका ये पुरुषाः स्त्रीस्वभावेन वर्जिताः।
निर्मुण्डा नामतो ज्ञेयाः कामविज्ञानवर्जिताः ॥ ५८ ॥
ये विद्यासत्यसम्पन्नाः कामदोषविवर्जिताः।
ज्ञानविज्ञानकुशलाः कञ्चुकीयास्तु ते स्मृताः ॥ ५९ ॥

एतदेव दशविधं प्रोक्तमन्तःपुरं मया ।
अतःपरं प्रवक्ष्यामि बाह्यं पुरुषसञ्चरम् ॥ ६० ॥
राजा सेनापतिश्चैव कुमारो मन्त्रिणस्तथा ।
सचिवाः प्राड्विवाकाश्च प्रयोगाधिकृतास्तथा ॥ ६१ ॥
एते चाऽन्ये च बहवः सभास्तारा नृपस्य तु ।
विभागमेषां वक्ष्यामि लक्षणं च पृथक् पृथक् ॥ ६२ ॥
शीलवान् बुद्धिसम्पन्नः सत्यवादी जितेन्द्रियः ।
दक्षः प्रगल्भः श्रुतिमान् विक्रान्तो धृतिमान् शुचिः ॥ ६३ ॥
दीर्घदर्शी महोत्साहः कृतज्ञः प्रियवागपि ।
लोकपालव्रतधरः शूरो धीरः क्षमान्वितः ॥ ६४ ॥
उत्थितश्चाऽप्रमत्तश्च वृद्धसेव्यर्थशास्त्रवित् ।
नानानयप्रचारज्ञ ऊहापोहविचक्षणः ॥ ६५ ॥
परभावेङ्गितज्ञश्च षाड्गुण्येनाऽप्यलङ्कृतः ।
नानाशास्त्रार्थतत्त्वज्ञो नानाशिल्पप्रयोजकः ॥ ६६ ॥
स्थानवृद्धिक्षयज्ञश्च पररन्ध्रे विचक्षणः ।
कृतज्ञोऽव्यसनी चैव गुणैरेतैर्भवेन् नृपः ॥ ६७ ॥
शीलवान् सत्यसम्पन्नस्त्वक्तालस्यः प्रियंवदः ।
पररन्ध्रविधिज्ञो यो यात्राकालविशेषवान् ॥ ६८ ॥
अर्थशास्त्रार्थतत्त्वज्ञो ह्यनुरक्तः कुले वृतः ।
देशवित् कालविच् चैव भवेत् सेनापतिर्गुणैः ॥ ६९ ॥
कुलीना बुद्धिसम्पन्नाः श्रुतिनीतिविशारदाः ।
स्वदेशजास्त्वनुरक्ताश्च शुचयो धार्मिकास्तथा ॥ ७० ॥

अमात्या मन्त्रिणश्चैव गुणैरेतैर्भवन्ति हि।
व्यवहारार्थतत्त्वज्ञा बुद्धिमन्तो बहुश्रुताः॥ ७१॥
मध्यस्था धार्मिका रक्ताः कार्याकार्यविचक्षणाः।
क्षान्ता दान्ता जितक्रोधा नोद्धताः समदर्शिनः॥ ७२॥
ईदृशाः प्राड्विवाकाश्च स्थाप्या धर्मायनेष्वपि।
उत्थिताश्चाप्रमत्ताश्च त्यक्तालस्या जितक्लमाः॥ ७३॥
स्निग्धाः क्षान्ता विनीताश्च मध्यस्था निपुणास्तथा।
नयज्ञा विनयज्ञाश्च ऊहापोहविचक्षणाः॥ ७४॥
नानारूपैः समायुक्ता गुणैरेतैर्भवन्ति हि।
बृहस्पतिमतादेषां गुणानां प्रविभावकम्॥ ७५॥
विज्ञेयश्चाऽपि कर्मज्ञैः सभास्तारादिकल्पनम्।
अत्रोच्यते यथा नाट्यमाहार्यगुणसंश्रयम्॥ ७६॥
कथं राजगुणाः कार्या नटैरल्पपरिच्छदैः।
अत्रोच्यते यदा लोके नाट्यधर्माः प्रवर्तिताः॥ ७७॥
तदैव सर्वं सम्पन्नं नाट्यमेतन् मया कृतम्।
वर्णकैश्छादितश्चैव भूषणैश्चाऽप्यलङ्कृतः॥ ७८॥
गाम्भीर्यौदार्यसम्पन्नो राजवत् तु भवेन् नटः।
सप्तद्वीपाद्या चैव मध्यमेको नटो भवेत्॥ ७९॥
वर्णकैश्छादितेनेह कार्यं लय विचेष्टितम्।
आचार्यबुद्ध्या शास्ता च सौष्ठवाङ्गपुरस्कृतः॥ ८०॥
राजवद् भरतस्तस्माद् राजाऽपि नटवद् भवेत्।
यथा नटस्तथा राजा यथा राजा तथा नटः॥ ८१॥

उभाभ्यां भावसम्पन्नैः समलीलाङ्गसौष्ठवा ।
यथाऽऽचार्योपदेशेन रङ्गशोभी भवेन्नटः ॥ ८२ ॥
एवं स्वभावतो राजा नित्यमेवोद्धतो भवेत् ।
दिव्यानां यः परीवारः पार्थिवानां भवेदिह ॥ ८३ ॥
नाटके सम्प्रयोक्तव्यो वेषभाषाक्रियान्वितः ।
यादृशं यस्य यद्‌ रूपं प्रकृत्या तस्य तादृशम् ॥ ८४ ॥
वेषे वेषविधानेन कर्तव्यं च प्रभुं पुनः ।
ऐवं राजोपचारेषु कार्यः पुरुषसङ्ग्रहः ॥ ८५ ॥
अत ऊर्द्ध्वं प्रवक्ष्यामि नानापुरुषलक्षणम् ।
नानाशीलगुणे लोके उत्तमाधममध्यमे ॥ ८६ ॥
प्रयोक्तव्याः पृथग्‌ भावैर्विज्ञेया प्रकृतिर्बुधैः ।
नानाशिल्पादिसम्पन्ना ज्ञानवन्तो जितेन्द्रियाः ॥ ८७ ॥
लोके तु ये विशेषज्ञा धर्माधर्मविचक्षणाः ।
शास्त्रेतिहासकुशलाः शीलवृत्तव्यवस्थिताः ॥ ८८ ॥
अहिंसासत्त्वसम्पन्नाः प्रकृत्या ह्युत्तमाः स्मृताः ।
लोकोपचारतत्त्वज्ञाः शिल्पशास्त्रविचक्षणाः ॥ ८९ ॥
मध्यप्रायगुणोपेताः प्रकृत्या मध्यमाः स्मृताः ।
रूक्षवाक्या दुराचारा निःसत्त्वाः स्वल्पबुद्धयः ॥ ९० ॥
क्रोधना घातकाश्चैव *कृतघ्नाः सर्वदर्शिनः ।
वृथारम्भप्रसक्ताश्च यत्किञ्चिद्‌ वाद्नात्मकाः ॥ ९१ ॥

---

* कृतघ्ना इति कृतघ्ना इति वा पाठो युक्तः ।

पिशुनाः पापनिरताः स्त्रीलोल्याः कलहप्रियाः ।
मान्यामान्यविशेषाणामनभिज्ञाश्च तस्कराः ॥ ९२ ॥
एभिर्दोषैश्च संयुक्ताः प्रकृत्यैवाऽधमाः स्मृताः ।
एवं तु शीलतो ज्ञेया प्रकृतिस्त्रिविधा बुधैः ॥ ९३ ॥
अत ऊर्द्धं प्रवक्ष्यामि प्रयोक्तॄणां तु तद्गुणान् ।

तत्र सूत्रधारगुणान् वक्ष्यामः । अस्याऽऽदित एव तावल्लक्षणज्ञता अहीनो वाक्संस्कारस्तथा गीतकालविधानज्ञता स्वरवादित्रतत्त्ववेदनं च ।

चतुरातोद्यकुशलः शस्त्रकर्मप्रतिष्ठितः ।
नाना च खण्डकार्यज्ञो नीतिशास्त्रार्थवित् तथा ॥ ९४ ॥
वेश्योपचारनिपुणः काव्यशास्त्रविचक्षणः ।
नानागतिप्रचारज्ञो रसभावविशारदः ॥ ९५ ॥
नाट्यप्रयोगकुशलो नानाशिल्पसमन्वितः ।
छन्दोविधानतत्त्वज्ञः सर्वशास्त्रविचक्षणः ॥ ९६ ॥
ग्रहनक्षत्रतत्त्वज्ञो देशव्याहारतत्त्ववित् ।
पृथिवीद्वीपवर्षाणां पर्वतानां जनस्य च ॥ ९७ ॥
प्रमाणचरितज्ञश्च राजवंशप्रसूतिवित् ।
श्रोता शास्त्रार्थकार्याणां श्रुत्वा चैवाऽवधारकः ॥ ९८ ॥
अवधार्योपदेष्टा च श्रेयोक्तावोपदेशने* ।
एवङ्गुणस्तथाऽऽचार्यः सूत्रधारो विधीयते ॥ ९९ ॥
स्वाभाविकान् गुणांश्चैव गदतो मे निबोधत ।

---

* श्रेयोवक्तोपदेशने इति भवितुमर्हति ।

स्मृतिमान् मतिमान् धीर उदारः स्थिरवाक् शुचिः ॥१००॥
अरोगो मधुरः क्षान्तो दान्तश्चैव प्रियंवदः ।
मध्यदोषविनिर्मुक्तः सत्यवाग् दक्षिणस्तथा ॥ १०१ ॥
अलुब्धः प्रतिमन्ता च स्वाभाविकगुणा अमी ।
सूत्रधारगुणैरेव किञ्चिदूनैः समन्वितः ॥१०२ ॥
मध्यमप्रकृतिस्तज्ज्ञैर्विज्ञेयः पारिपार्श्वकः ।
उज्ज्वलो रूपवांश्चैव दृष्टोपकरणक्रियः ॥ १०३ ॥
मेधावी च विधानज्ञः स्वकर्मकुशलो दृढः ।
सूत्रधारगुणैर्युक्ताः सर्व एव प्रयोगिणः ॥ १०४ ॥
वेश्योपचारकुशलो मधुरो दक्षिणः कविः ।
ऊहापोहक्षमो वाग्मी चतुरश्च विटो भवेत् ॥ १०५ ॥
शास्त्रार्थतत्त्ववेदी च निपुणो दैशिकेषु च ।
उज्ज्वलवस्त्राभरणः क्रुध्यत्यनिमित्ततः प्रसीदति च ॥१०६॥
अधमो मागधभाषी भवति शकारो बहुविकारः ।
वामनो दन्तुरः कुब्जो द्विजन्मा विकृताननः ॥ १०७ ॥
खलतिः पिङ्गलाक्षः संविधेयो विदूषकः ।
कलाप्रियो बहुकथो विरूपो गन्धसेवकः ॥ १०८ ॥
मान्यामान्यविशेषज्ञः खेटो ह्येवंविधः स्मृतः ।
एवं गुणैश्च संयुक्तो यतजैश्चेतरैस्तथा ॥ १०९ ॥
अतः परं प्रवक्ष्यामि स्त्रीणां च प्रकृतिं पुनः ।
मितभाषा विदग्धा च सलज्जा चाऽप्यनिष्ठुरा ॥ ११० ॥
कुलशीलगुणोपेता गुरूणां शासने रता ।

गाम्भीर्यधैर्यसम्पन्ना उत्तमा प्रकृतिः स्मृता ॥ १११ ॥
नानाशिल्पप्रयोगज्ञा नाट्ययोगविचक्षणा ।
कलोपयोगे चाऽऽर्या तु शुश्रूषाऽभिरता सदा ॥ ११२ ॥
लीलया भावहावाभ्यां सत्त्वेन विनयेन च ।
माधुर्येण च संयुक्ता चतुःषष्टिकलान्विता ॥ ११३ ॥
तत्रोपचारकुशला स्त्रीदोषैः परिवर्जिता ।
प्रियवादी प्रियकथा स्फुटा दक्षा जितश्रमा ॥ ११४ ॥
एभिर्गुणैस्तु संयुक्ता गणिका परिकीर्तिता ।
रूपगुणशीलयौवनसुवर्णमाल्याभरणसम्पन्ना ॥ ११५ ॥
विशदा स्निग्धा मधुरा पेशलशुभरक्तकण्ठा च ।
भाण्डाद्यैश्च सुभिता लयतालज्ञा रसैश्च सम्पन्ना ॥ ११६ ॥
एवंविधगुणयुक्ता कर्तव्या नायिका तज्ज्ञैः ।
समागतासु नारीषु वयोरूपवतीषु च ॥ ११७ ॥
नटविश्वाससमायुक्ता सहस्रेष्वपि नर्तकी ।
अस्थानहासिनी रुक्षा अविद्धगतिचेष्टिता ॥ ११८ ॥
दीर्घरोषा च दीना च तथा चाऽनिभृतोद्भटा ।
सर्वदोषाभिसंयुक्ता गन्धमाल्योपशोभिता ॥ ११९ ॥
एवंविधा प्रकर्तव्या प्रकृष्टा प्रकृतिर्बुधैः ।
एवमेताः प्रकृतयो विज्ञेया नाट्यसंश्रयाः ॥ १२० ॥
कृतवेषाभिजात्याश्च सर्वा एव प्रयोक्तृभिः ।
अतऊर्ध्वं प्रवक्ष्यामि लक्षणं भूमिकास्वपि ॥ १२१ ॥

इति श्रीभारतीये महानाट्यशास्त्रे प्रकृत्यध्यायो नाम चतुस्त्रिंशत्तमोऽध्यायः समाप्तः ॥ ० ॥